CC-0. In Public Domain. Digitization by eGangotri

2 Copy 7 14 47

हरिदास-संस्कृत-ग्रन्थमाला

१७५

॥ श्रीः ॥

परीक्षोपयोगि—

प्रबन्ध-पारिजातः

[प्रबन्धलेख-शिक्षको ग्रन्थः]

खेलाड़ी लाल एण्ड सन्स बनारस

लेखकः—

श्रीरामचन्द्रमिश्रः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

लघुशब्देन्दुकला

[लघुशब्देन्दुशेखर प्रश्नोत्तरी]

परीक्षोपयुक्त परिशिष्ट सहिता ।

इसमें परीक्षामें आने योग्य सभी प्रश्नोंके उत्तर ऐसे सरल तथा निर्दुष्ट परिष्कारों से युक्त लिखे गये हैं कि अभ्यास करलेने पर विद्यार्थी परीक्षामें पूरी सफलता प्राप्त कर लेगें तथा ग्रन्थ लगाने में भी विद्यार्थीको अत्यधिक सहायता मिलेगी । ऐसा प्रशंसनीय संस्करण यह प्रथम बारही प्रकाशित हुआ है । १।)

परिभाषेन्दु-प्रश्नपञ्जिका

प्रस्तुत संस्करण में परीक्षा में आने योग्य १२५ प्रश्नों के उत्तर ऐसे सरल तथा निर्दुष्ट परिष्कारों से युक्त लिख दिये गये हैं कि-"एक पन्थ दो काज" याने ग्रन्थ लगाने में भी इस से आपको अत्यधिक सहायता पहुँचेगी और कण्ठस्थ कर लेनेपर परीक्षा में अधिक से अधिक नम्बर भी पासकेगें । ॥)

परिभाषेन्दुशेखरः

'बृहच्छास्त्रार्थकला' टीका, प्रश्नोत्तरी तथा नाना परिष्कारादि संवलित बृहत्परिशिष्टों से विभूषित ।

विजया, भूति आदि ख्याति प्राप्त सभी टीकाएँ इसमें गतार्थ हो चुकी हैं । बहुत से दुष्प्राप्य कोड-पत्रों को संकलित कर के पूर्व प्रकाशित उन सभी टीकाओं के गुण-दोषों की समालोचना करके प्रस्तुत संस्करण प्रकाशित किया गया है ३)

ग्रहलाघवम्

विश्वनाथकृत व्याख्योदाहरणयुत-नूतनोदाहरणोपपत्ति संवलित माधुरी नामक संस्कृत हिन्दीटीका द्वयोपेतम् ।

आज तक इस ग्रन्थ की कोई भी ऐसी सरल टीका नहीं थी जिससे विद्यार्थी सुलभता पूर्वक ग्रन्थ का आशय समझ कर परीक्षामें पूरी सफलता प्राप्त करसकें । विश्वनाथी टीका के साथ इसकी माधुरी नामक परीक्षोपयुक्त संस्कृत हिन्दी टीकामें ग्रन्थाशय को अत्यन्त सरल शब्दों में समझाया गया है एवं विश्वनाथी उदाहरण के अतिरिक्त नवीन उदाहरण तथा उपपत्ति भी यथा स्थान दे दी गई है जिससे इस संस्करण का महत्व और भी बढ़ गया है । ३॥)

प्राप्तिस्थानम्-चौखम्बा संस्कृत पुस्तकालय, बनारस सिटी । २.....

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीः ॥

हरिदास–संस्कृत–ग्रन्थमाला

१७५.

॥ श्रीः ॥

प्रबन्ध-पारिजातः

[परीक्षोपयोगि–प्रबन्धलेख–शिक्षको ग्रन्थः]

मुजफ्फरपुरराजकीयधर्मसमाजसंस्कृतमहाविद्यालयवेदान्ता-

ध्यापक–व्याकरण–साहित्य–वेदान्ताचार्य-

मैथिलपण्डितश्रीरामचन्द्रमिश्रेण

विरचितः

प्रकाशकः—

जयकृष्णदास–हरिदास गुप्तः—

चौखम्बा संस्कृत सीरिज़ आफिस,

बनारस सिटी।

प्रथमं संस्करणम्] मूल्यम् १=) [सं २००३

[अस्य ग्रन्थस्य सर्वेऽधिकाराः प्रकाशकेन स्वायत्तीकृताः]

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रकाशकः—
जयकृष्णदास हरिदास गुप्तः
चौखम्बा संस्कृत सीरिज़ आफिस,
बनारस ।
वि० सं० २००३

All Rights Reserved by the Publishers.

1946

मुद्रकः—
विद्याविलास प्रेस,
बनारस ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भूमिका

मान्याः सज्जनाः,

प्रतिदिनं परिवर्त्तमानस्य कालचक्रस्य प्रवाहेण सर्वत्र परिवर्त्तनं विधीयत इति शिक्षाक्षेत्रेऽपि सम्प्रति परिवर्त्तनं प्रक्रान्तम्। 'पुरा यथा कस्यचिदेकस्य शास्त्रस्य सर्वाङ्गीणमध्ययनं विधाय कृतित्वमाकलयन्ति स्म विद्वांसः, सम्पद्यमानेऽपि तादृशेऽध्ययनेऽधुना न कार्यं चलति। पाश्चात्यशिक्षाया अबाधेन प्रसरेण लोकानां दृष्टिरेव तथा विपरीता जाता, यथा सर्वेऽपि प्राचीना व्यवहारा अनुपयुज्यमाना इव प्रतिभासन्ते। सभ्यतायाः सङ्घर्षस्य युगे सर्वत्रापि कर्मणि प्राच्यनव्यप्रवाहयोः सङ्क्रमेण नृसिंहाकृतिरेको नवः प्रकारः प्रकटति, एवमेवात्रापि विषये वक्तुमुचितम्। किञ्च सम्प्रतिपद्यन्ते जनाः परीक्षयैव शिक्षायाः परिमाणम्, परीक्षायां साफल्यं च यावतांशेन विषयज्ञानमपेक्षते, न ततो न्यूनया मात्रया लेखपाटवम्। विचार्यताम्—यस्मिन् समये परीक्षकाः केवलमुत्तरपत्राणि दृष्ट्वैव परीक्ष्याणां योग्यताया निर्धारणं कुर्वते, तस्मिन् समये लेखशक्तिः कियदुपकुर्यादिति। इदमेवानुसन्धाय परीक्षापाठ्यग्रन्थनिर्धारणाधिकारिणोऽपि प्रथमायां परीक्षायामनुवादं मध्यमायामनुवादेन सहैव प्रबन्धलेखमपि विषयत्वेन निरचैषुः। शास्त्र्याचार्यपरीक्षयोरपि क्वचित् २ प्रबन्धविषयाः प्रश्ना भवन्ति। न तानसमाधाय परीक्षोदधिपारगमनं शक्यविधानं, यदर्थमयं सकलः शिक्षासोपानाधिरोहक्रमः। कतिपये छात्रा एतादृशा अपि पुराऽभूवन्, येऽनतिविशेषायासेनैव प्रबन्धादिलेखकलायां पाटवमभजन्त, स्वाध्येयशास्त्रीयग्रन्थग्रन्थिचयभेदोद्भूतप्रभूतव्युत्पत्तिमत्त्वात्। परं गतानि तान्यहानि, सम्प्रति तु मध्यमावर्गीयाश्छात्राः प्रबन्धं स्वयं लिखेयुरिति नाशास्थानम्। शास्त्र्याचार्यवर्गेऽधीयानानामपि भूयांसो यथोचितप्रबन्धलेखपाटवं नाकलयन्तीति दृष्ट्वा व्यथते मानसम्। अस्यां स्थितावेकं प्रबन्धविषयकमीदृशं पुस्तकमपेक्ष्यते, यत्रैकत्रैव प्रबन्धलेखनशैली, तदन्तरङ्ग-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

परिचयप्रदानविधया बहवो नियमोपनियमाः, कतिपयादर्शप्रबन्धाः, प्रबन्धोपयोगिसूक्तिसमुदयाश्च समुपलभ्येरन् , इत्यन्तरभिलाषं बहूनां सुहृदां पुरस्तादुपास्थापयं कतिचन तद्योग्यताशालिनो विधिवदन्वरुन्धं च। परं सर्वैरुदासितमेव। एतादृशपुस्तकदर्शनाभिलाषः पुनर्मन्दतां नागमत्। व्यतीतेषु कतिषुचन वर्षेषु सर्वतो निराशीभूय स्वयमेवेदं पुस्तकं 'प्रबन्धपारिजात' संज्ञया प्रथयिष्यमाणं प्राक्रमे। फलं तस्य भवतां करकमलेषु समुपहृतमिदमिति।

एतस्य पुस्तकस्य निर्माणात्पूर्वं यावन्ति प्रबन्धविषयाणि पुस्तकानि मया निरीक्षितानि, तेषु कस्यापि मध्यमावर्गीयच्छात्रावगतियोग्यभाषानिबद्धता, परीक्षोपयोगिप्रबन्धपूर्णता, छात्राः स्वयं प्रबन्धं लिखितुं कथं शिक्षिताः स्युरिति चिन्ता च मया न दृष्टा, प्रत्युतैकत्र जातककथामालायाः कतिपयेऽध्यायाः, सुरभारतीसम्मेलनसभापतीनां भाषणानि, क्वचिच्च दीर्घदीर्घैः समासैर्मात्राबिन्दुविसर्गांशेऽपि नवीनतामस्पृशद्भिः शब्दस्तोमैर्विचारवर्त्म परित्यज्य प्रमाणपारतन्त्र्यपुरस्कारैश्च समुपबृंहिता एव निबन्धा वाऽदृश्यन्त, किमस्मिन्नपि युगे—यत्र पाश्चात्त्यशिक्षा प्रियस्नेहगर्वितेव सपत्नी सह चलन्ती संस्कृतभाषाया गतिविधिं सतर्कया दोषमात्रगवेषणव्यापृतया च दृशा पश्यति, समुचितमीदृशनिबन्धग्रन्थानालम्ब्य विश्रमितुम् ?—ईदृशीं वा निबन्धलेखनयोग्यतामाश्रित्य शिक्षा-समाप्तिं मन्यमानानां छात्राणां स्कन्धेषु संस्कृतसरस्वत्याः, संस्कृतेश्च भारतीयाया रक्षाया भारमर्पयितुं कथं विद्वांसोऽभिलषेयुः ? अतो यथासम्भवं सावधानतया प्रबन्धपारिजातमिमं छात्राणां सर्वात्मनोपकारकारिणं विधातुं प्रयासमाशिश्रियम्, तथाहि—प्रथमे पल्लवे प्रबन्धलेखनोपयोगिनः कतिपये सिद्धान्तास्तत्साफल्योपायाश्च प्रदर्शिताः, यैर्मनसि कृतैः स्वयमूहमानाः प्रबन्धतनुं कल्पयेयुर्विद्यार्थिनः, द्वितीये पल्लवे यथाप्रथमपल्लवप्रदर्शितपथं कतिचनादर्शप्रबन्धा लिखित्वा समुपन्यस्ताः, येन ते तानवलोक्यैव मनसि प्रबन्धलेखशैलीं साकारामिव भावयेयुः, भाषाप्रयोगादिविषये चशिक्ष्येरन् , तृतीये पल्लवे प्रबन्धरचनाया अलघूपादेये पत्रलेखनविधौ छा-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

त्राणां प्रवेशं कामयमानेन पत्रप्रबोधाध्यायोपि समुपनिबद्धो येन सकृदुद्दृकृपातपात्रतां नीयमानेन पत्रविषयकं रहस्यं स्फुटावभासतां समुपेयात् । चतुर्थे चरमे च पल्लवे सूक्तिनिवहा लौकिकन्यायाश्च सङ्गृह्य सन्दृब्धाः (सतिचावश्यकत्वे) टिप्पण्यां तदर्थाश्च लिखिताः । तदियता परिकरेण प्रस्तूयमानं 'प्रबन्धपारिजातं' प्रकाशमासादयन्तं दयालवो विद्वांसो निरतिशयस्नेहशालिनो बधन्वो विद्यार्थिनश्च यद्येकदापि सापेक्षया दृशा पावयेयुस्तद्भवैरुपकारैरात्मानं फलभाजं च कुर्युस्तदा कृतित्वभाग् भवेयम् ।

येषां ग्रन्थानां सहायतया निबन्धोऽयं मया समुपनिबद्धस्तेषां लेखकानां, मान्यानामुपदेशप्रदानां श्रद्धेयगुरुपादानां चोपकारभारमनतिश्रमसम्पाद्य–धन्यवादप्रदानमात्रेणाशोध्यं मन्यमानस्तत्सन्दानिततयाऽवस्थानमेवाहं स्वपक्षे हितमुत्प्रेक्षे ।

(संस्कृत कालेज)
मुजफ्फरपुरम् ,
सं. २००३

विदुषामाश्रवः
श्रीरामचन्द्रमिश्रः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रबन्ध-पारिजातस्य
विषयसूचीपत्रम् ।

विषयाः पृष्ठ०

प्रथमपल्लवे—

१ मङ्गलाचरणम् १
२ अवतारणिका २
३ प्रबन्धपरिचयः २
४ प्रबन्धरचनाविषयेऽवश्यध्येया नियमाः ३
५ लेखमात्रे साधारणा नियमाः ७
६ वाच्यपरिवर्त्तनम् ९
७ चिह्नप्रकरणम् १०
८ प्रबन्धलेखकलामध्यापयद्भिर्ध्येयाविषयाः १३
९ वर्णनीया विषयाः १५
१० प्रबन्धभेदादिकथा २१

द्वितीयपल्लवे—

आदर्शप्रबन्धाः

१ ग्राम्यपाठशाला २३
२ समाचारपत्राणि २७
३ मुद्रणकला २७
४ परोपकारः २९
५ एकता ३१
६ आवश्यकताऽऽविष्काराणां जननी भवति ३२
७ व्यापारः ३५
८ अनुशासनम् ३७
९ न संशयमनारुह्य नरो भद्राणि पश्यति ३९
१० वीरता ४१
११ नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण ४३
१२ अतिपरिचयादवज्ञा ४६
१३ सत्यवादिता ४८
१४ आत्मसँय्यमः ५०
१५ जातिव्यवस्था ५२
१६ भूकम्पः ५५
१७ विद्या ५७
१८ मितव्ययशीलता ५९
१९ व्यायामः ६२
२० औद्योगिकशिक्षा ६५
२१ देशाटनम् ६७
२२ स्वतन्त्रता ६९
२३ आशा ७१
२४ स्त्री-शिक्षा ७३
२५ लोभः पापस्य कारणम् ७५
२६ कर्त्तव्यपालनम् ७७
२७ देशभक्तिः ७८
२८ पितृभक्तिः ८१
२९ अतिथिसेवा ८३
३० उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः ८५
३१ सञ्चयी नावसीदति ८७
३२ गङ्गा ८९
३३ मिथिला ९२

तृतीयपल्लवे—

१ पत्रलेखनप्रकारः (सादर्शः) ९७

चतुर्थपल्लवे—

१ सूक्तिरत्नमाला १०८
२ सुभाषितगद्यावली ११४
३ सुभाषितपद्यांशावली ११८

पञ्चमपल्लवे—

१ लौकिकन्यायमञ्जरी १२३
२ ग्रन्थकर्त्तुः परिचयः ११८

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मैथिलपण्डितश्रीयुतरामचन्द्रमिश्रविरचितः

प्रबन्ध-पारिजातः

प्रथमः पल्लवः

स्फीतावतंसशशिसङ्कुचदङ्गसङ्गि-
रोमाञ्चसञ्चयमिषेण समुन्मिषन्तम् ।
गौरीकरग्रहमिलन्नववारिधारा-
सिक्तं स्मरामि गिरिशप्रणयप्ररोहम् ॥ १ ॥

राधासविभ्रमदृगन्तनिपातजात-
पत्रं प्रमोदकुसुमालिभिरुल्लसन्तम् ।
कूले कलिन्ददुहितुस्ततकेलिशाखं,
कृष्णानुरागतरुमादरतः प्रपद्ये ॥ २ ॥

वाणि ! प्रसीद करवाणि तव प्रसादान्-
नव्यं 'प्रबन्ध'विषयं रुचिरं निबन्धम् ।
भूयास्तथा मम सखि ! प्रतिभे ! सहाया,
स्वाराधयानि विबुधानमुना यथाहम् ॥ ३ ॥

कालानुकूलविविधाध्वविभिन्नशिक्षा-
कक्षासु ये विषयतां गमिताः प्रबन्धाः ।
विद्यार्थिनां तदवबोधसमृद्धयेऽय-
मालम्बितो भवतु मे सफलः प्रयासः ॥ ४ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्राचीनान्प्रथितान्प्रबन्धविषयानन्यासु भाषास्वपि,
प्रौढैः पण्डितमण्डलैर्विरचितानत्यादरादीक्षितान् ।
कृत्वा हृद्यतमं निबन्धघटना-योग्यं च सारं ततो-
निष्कृष्यारचि देववाचि रुचिरो ग्रन्थो मयाऽयं लघुः ॥ ५ ॥
दुर्गमाध्वचलनश्रमं हरन् , पारिजाततरुरेष सेवितः ।
किं प्रयच्छति मनोगतं फलं, वा नवेति कृपया परीक्ष्यताम् ॥ ६ ॥

प्रबन्ध-परिचयः ।

कमप्येकं विषयमवलम्ब्य रचितं परस्परसम्बद्धं वाक्यकदम्बकं प्रबन्धः । अथवा कमपि प्रपञ्चनीयं विषयमधिकृत्य तत्स्वरूपोपयोग-फलादिप्रदर्शनविधया तदन्तरङ्गबहिरङ्गपरिचयप्रदं मनोरमया गिरोपनिबद्धं वाक्यकदम्बकं प्रबन्धः । केचित्तु प्रतिपाद्यविषयप्रतिपादनसमर्थं मत्वोपनिबद्धं वाक्यमेव प्रबन्धमाहुः । प्रबन्धः, प्रस्तावः, रचना, सन्दर्भः, निबन्धः, इमे शब्दा अर्थतो न भिद्यन्ते । स चायं प्रबन्धः गद्येन पद्येन च कर्तुं शक्यते तेन द्विविधः, उभयथापि भाषायाः सालङ्कार-निरलङ्कारताभेदेन पुनर्द्वैविध्यम् । तत्र साधारणभाषयोपनिबन्धने निरलङ्कारत्वम्, अनुप्रासयमकोपमारूपकादिसमृद्धभाषानुसरेण सालङ्कारत्वम् ।

अयं च भेदो नार्थमनुसन्धाय कृतः, तथा-करणेन तु निरूपणात्मकाः, आख्यानात्मकाः, आलोचनात्मकाश्चेति त्रिविधाः प्रबन्धाः ।

१—कमपि सजीवं निर्जीवं वा विषयमाश्रित्य तत्स्वरूपोपयोगादिनिरूपणपराः प्रबन्धा निरूपणात्मकाः । (यथा गाम् , पुस्तकम् वाऽधिकृत्य लिखिताः)

२—कामपि पुरावृत्तां सामयिकीं वा घटनामधिकृत्य तद्वर्णनप्रवृत्ताः प्रबन्धा आख्यानात्मकाः कथ्यन्ते (यथा रामकथा-भूकम्प-स्वकृत-परकृत-विदेशयात्रा-जीवनचरितादिकमाश्रित्य लिखिताः प्रबन्धाः)

३—स्वचिन्तनशक्तिकल्पना-पुरस्कारेण कमपि गूढं विमर्शक्षमं च विषयमवलम्ब्य विरचिताः प्रबन्धा आलोचनात्मकाः प्रोच्यन्ते (यथा–

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सत्यभाषण-देशभक्ति-परोपकारोद्योगादिकमाश्रित्य रचिताः) अयं च भेदनिर्देशो नात्यन्तिकभेदं दर्शयितुं, किन्त्ववबोधसौविध्यार्थमेव। वस्तु तस्तु परस्परसङ्करो ह्यमीषां दृश्यते लेखकानां मतवैश्वरूप्यात्, तासु तासु भाषासु लेखकानां प्रसिद्धासु प्रबन्धविषयककृतिषु तत्तद्विषयविभागसाङ्कर्यदर्शनाच्च। अतोऽत्र प्रबन्धलेखनकलायां प्रवेशमिच्छतां बालकानां बुद्धेर्विकासायैव भेदनिर्देशः। एतेन पथा हि गृहीतप्रबन्धरूपाश्शक्नुवन्ति पश्चात्तत्स्वरूपं वस्तुतः परिचेतुम्, असत्येन वर्त्मना सत्यानुसन्धानस्य शास्त्रशैलीप्रचलितत्वात्।

प्रबन्धरचनाविषयेऽवश्यध्येया नियमाः।

(१) प्रबन्धसौन्दर्यं सम्पादयितुं न केवलं साधवो विचाराः क्षमन्ते, न वा रोचका वाग्-विस्तराः, अपितु प्रबन्धलेखांशविभागचातुरी-सहचरी वर्णनीयविषयसौष्ठवसम्पादनशैली तथा विधातुं क्षमा। तादृशी शैली च तावदशक्योपन्यासा, यावत्प्रबन्धा बुद्धिपथातिथीन् विचारान् यथावद् विभज्य शृङ्खलाबद्धान् न विधत्ते। प्रबन्धलेखको हि प्रथमं—यं विषयमधिकृत्य प्रबन्धमारचयितुं प्रयतेत, तत्र विषये, ध्यानाध्वनीनान् विषयान् पक्षेषु सम्भवत्सु परस्परासङ्कीर्णेषु विभागेषु विभज्य, उपरि विन्यस्येत्। एवं वर्गीकृतान् वस्तुभूतान् प्रतिपाद्यार्थान् एकैकशो निबध्नीयात्। एवं हि पुनरुक्तिरपुष्टिर्वृथापदोपन्यासश्च न भवति।

(२) भाषाऽपि प्रबन्धविषयानुसारिणी प्रबन्धकेन प्रयोज्या, प्रबन्धस्य पुंसो हि भाषा शरीरम्, भाव आत्मा। भाषादोषो हि प्रबन्धतनुं दूषयति, अतो यथोचितभाषाप्रयोगसामर्थ्यवैधुर्येऽपि सरससरणभाषाप्रयोगेण निर्वाहः सुकरः। एतदर्थं प्रसिद्धप्रबन्धाध्ययनकाले तद्भाषोपरि सावधानदृक्पातो महते फलाय जायते।

(३) विषयविभागकाले विभाज्यविषयपौर्वापर्यमपि तथा विधेयं, यथा न्यायविरोधो न जायेत। अर्थात् सति साध्यसाधनभावे द्वयोर्निर्देश्ययोः प्रथमं कारणमेव निर्देश्यमनन्तरं साध्यम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(४) यथासम्भवं तान् शब्दान् न प्रयुञ्जीरन् प्रबन्धलेखका येषां स्वरूपलिङ्गादिविषये सन्देहः स्यात्, न वा तान् सिद्धान्तानेवोपन्यस्येयुर्यें साधु समर्थयितुं न शक्येरन्, नच स्वशक्तिबहिर्भूतदीर्घसमासतादिनिर्वाहाय प्रयस्येयुः, तथा विधातारो हि परमावश्यकप्रतिपाद्यप्रतिपादनायापि नालं भवन्ति, दोषैश्च ध्रियन्ते।

(५) प्रथमं प्रबन्धविषयं दीर्घदीर्घैर्भिद्यमानाकारैश्चाक्षरैर्विन्यस्य तदधःकल्पितविभागलेख्यांशसूचीं निबध्नीयुः, ततश्च यथाक्रममेकमेकं विभागमादाय तमपि कियता स्वरूपभेदेन लिखेयुः, तं यथाविचारं विवेचयेयुश्च।

(६) इह चावश्यमवदध्युर्यद् यया शैल्या प्रक्रमः कृतः, समाप्तिरपि तामेव शैलीमनुगच्छेत्। कठिनेन बन्धेनोपक्रान्ता मध्ये सरलबन्धमुपनीताश्च प्रबन्धाः किमपि दारिद्र्यमिव सूचयेयुः प्रबन्धॄणाम्।

(७) प्रबन्धभाषासौन्दर्यं प्रतिपाद्यभावाभिव्यक्तिं च विधातुं प्राचीनान् प्रचलितप्रयोगान् न्यायान् सूक्तिनिचयांश्च यथास्थानमुपन्यस्येयुः, येन भाषायाः प्रौढता रमणीयता च प्रतिभायात्। सूक्तयो न्यायाश्च हि भाषास्रजि सुमेरुवदुद्द्योतमानाः पाठकानां मानसानि बलादिवावर्जयन्ति।

(८) प्रबन्धशरीरे समुपयुज्यमानाश्शब्दास्तन्नादृता अर्था वा यथासम्भवं पुनरुक्ता न विधेयाः, केवलमुपसंहारसमये परमापेक्षिता भागमात्रगा पुनरुक्तिर्न दुष्यते।

(९) ये विषयविभागाः शीर्षकस्थले स्थापितास्तेषां सर्वेषां विवेचनं यथाकृतं स्यात्, तथा प्रयतनीयमर्थात् सर्वेषामेव तेषां विवेचनं स्वल्पेन (सति काले महता वा) शब्दसमुदायेन विधेयमेव। एकस्यैव विभागस्य विवेचने यदि सुमहान् कालोऽतिवाह्येत, तर्हि परेषां भागानां विवेचनं न कृतं सत्प्रबन्धस्य स्वरूपमेव विघटयेत्।

येषां छात्राणां भाषादौर्बल्यं प्रबन्धलेखावसरे वाक्यानि सङ्कोचयति, ततश्च प्रबन्धसौष्ठवं प्रतिबध्नाति, तैरधो लिखित-विषयेषु ध्यानमाधेयम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(१) एकस्य विवेचनीयविषयस्य विवेचनावसरे तदन्यविषयेभ्यो बुद्धिरपकर्षणीया। एवं हि दृश्यते, प्रबन्धलेखनकाले छात्राः सम्पूर्णं प्रबन्धकलेवरमेव सहैव बुद्धौ समुत्कण्ठन्तेऽनुसन्धातुम्। एवं हि सति नानादिक्षु प्रसरन्ती तन्मतिर्व्यग्रतामवलम्बतेऽल्पोराशिरपामिव परिणाहिनि क्षेत्रे। स चैव क्षुद्रतमे भूभागे नियोज्यमानो यथा तमाप्लावयति, तथैवैकत्र निहिता मतिस्तं विषयं मूलतः परिमार्जयति। पृथक्पृथगनुसन्धीयमाना विवेच्यमानाश्च ते तावति देशे केन्द्रिताया बुद्धेः सम्पूर्णमपि प्रकाशमासाद्य प्रतिपद्यन्ते स्फुटीभावम्।

(२) एक एवार्थः स्वल्पेन शब्देन कथ्यते महताऽपि। तत्र सिद्धलेखकाश्शब्दस्याल्पतामेवाद्रियन्तेऽर्थांशे बद्धादरत्वात्। परं दुर्बलभाषाकोशार्थभरास्तुछात्रा भाषावर्द्धनालङ्करणप्रयासमवश्यमेव कुर्युः। एवं भावदरिद्रोऽपि प्रबन्धः पुमान् अगुणो वस्त्रादिनोत्तमेनेव शोभते। अतः प्रबन्धभाषाभूषणवर्द्धनाभ्यां यतमानैः प्रथमं कर्तृपदस्य कतिचिद्विशेषणीभूतानि पदानि प्रदेयानि, तत्रापि मनोहरशब्दानामन्वेषणे ध्यानं देयम्, एवमेव कर्मपदस्यापि। यथा श्यामो ग्रामं गच्छति। अत्र कर्तृपदं श्याम इति, तस्य—'स्वच्छपरिधानः', 'सरोजसुन्दरनयनः' 'सितोष्णीषवेष्टितशिराः' इत्यादीनि विशेषणानि, एवं 'ग्रामम्' इत्यस्य 'वापीविकचकमलशोभाभिरामम्' 'कदलीवनहरितिमहृतपथिकजननयनम्' 'चत्वरसञ्चरच्चपलचरणशिशुसमुदयम्' इत्यादीनि विशेषणानि। तथा च—'सरोजसुन्दरनयनः श्यामः कदलीवनहरितिमहृतपथिकजननयनं ग्रामं गच्छति' इति वाक्यं जातम्, तेन प्रबन्धस्य कायोऽपि कियतांशेन वर्द्धितः, शोभापि सम्पादिता। इदं परमिहावधेयम्—वाक्यवर्द्धनकाले वैरस्यं यथा नागच्छेत्तथा चेष्टितव्यं यथास्यैव वाक्यस्य 'विद्याप्रभावविजितहयग्रीवगौरवः श्यामः जितदेवपुरं ग्रामं स्वव्यापारेणोत्पाद्यमानस्य संयोगस्याश्रयं कुरुते' इत्थं विन्यासे महतो महतो गौरवगणस्योपादानादप्रचलितप्रायशब्दावलीप्रयोगाच्च किञ्चिद्वैगुण्यमिव प्रतिभाति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(३) प्राचीनप्रबन्धपुस्तकपाठकाले सावधानेन मनसा तदीय-वाक्यविन्यासार्थप्रकाशनशैलीविषयविभाजनचातुरीषु सतर्कताऽऽस्थेया, यथा च ते ते विषया हृदयङ्गमाः सन्तः प्रबन्धलेखावसरे साहाय्यमादध्युः।

(४) कस्य प्रसङ्गे किं वर्ण्यते, कस्य कीदृशं विशेषणमुपयुज्यते, कस्यामवस्थायां के भावाः प्रादुर्भवन्ति, कीदृशस्य पुरुषस्य कीदृग्वेशभूषादिकं भवितुमुचितमित्यादिवस्तुवृत्तजातस्य ज्ञानायापि यत्नः करणीयो विद्यार्थिभिः। यथा—यदि मुनेः प्रसङ्गे चूडामणिखड्गलतादिकमुपादीयते, भक्त्या शिवमाराधयितुं प्रतिष्ठमानस्य वा प्रयाणकाले उपानच्छत्रालङ्कारादिकं वर्ण्यते तदाऽस्थाननिवेशितं तन्न शोभते (कस्य कृते किं वर्ण्यत इत्यस्यैव पुस्तकस्याग्रिमेऽध्याये प्रदर्शयिष्यते)

(५) प्रायशः परीक्षाकाले नियतः समयस्सर्वेषामेवच्छात्राणां कृते स्वल्पः प्रतीयते, तावतैव समयेन सुचिन्तितस्य मनोरमया शैल्या लिखितस्य च प्रबन्धस्योपस्थापनं तत्तत्परीक्षार्थिनां कृते न सुकरमतश्छात्रैः स्वयोग्यतामनुसृत्य नातिदीर्घो न चातिस्वल्पः प्रबन्ध उपक्रम्यः। तत्र लिपिदोषाणां दूरीकरणे सङ्गतवाक्यावलीविन्यासे च प्रयत्नः करणीयः। महान्तस्प्रबन्धमुपस्थापयितुं यतमाना हि विद्यार्थिनः प्रबन्धसारं पुनरावर्त्तयन्तो भाषाशैथिल्यं पुनरुक्तिं च कुर्युः, तथा करणेन च परीक्षकाणां घृणाया भाजनं जायेरन्।

किञ्च अर्थतो व्यवहारतश्चाज्ञाताश्शब्दा नैव व्यवहार्याः, तथा करणेन हि परीक्षार्थिनामज्ञानमनायासमेव लक्षयन्ति परीक्षकास्तेन च तेषां दृष्टिर्विपर्येति। व्यक्तिविशेषस्यैकान्तत आत्मीया विचारा उक्तयश्च नोपन्यस्तव्याः, नवा परीक्षकाणां समीपे तदीयां सहानुभूतिमात्मनि समर्जयितुं किमपि लेख्यम्, प्रबन्धं लिखित्वा सकृत्, सति सम्भवे द्विर्वा तस्य संशोधनं विधातव्यं, येन तत्राक्षरच्युतिह्रस्वदीर्घदन्त्यतालव्यवक्तव्यानुक्तिकृता दोषा न तिष्ठेयुः, अल्पकायोऽपि परिमार्जितः प्रागुदीरितदोषास्पृष्टः प्रबन्धः परीक्षकेभ्यो यथा रोचेत, न तथा तुन्दिलतनुरपि तत्तद्दोषदूषितः। अतः—

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

'गुणानामादरः कार्यो न कायगुरुता मता'

इदमवश्यं सदा स्मरणीयम् ।

लेखमात्रे साधारणा नियमाः ।

(१) प्रबन्धेऽन्यादृशेऽपि वा लेखे निम्नलिखितान् नियमाननुध्यायतां छात्राणां लेखश्चमत्कारयुतो भवति तत्र प्रथमो नियमो यथा—

कर्त्तृप्रत्ययस्थले क्रिया कर्त्तारमनुसरति । अर्थात् कर्त्तुः वचनं पुरुषं च क्रियामनुवर्त्तते । यथा-रामः पुस्तकं पठति । अत्र कर्त्तृपदं राम इति तच्चैकवचनान्तं प्रथमपुरुषरूपं च तेन पठति इति क्रियापदेऽपि तथा । एवं 'त्वं ग्रामं गच्छसि' इत्यत्रापि कर्त्तृपदं त्वमिति मध्यमपुरुषीयैकवचनं तेन क्रियापि तथा । एवमेवान्यदप्युदाहार्यम् ।

कर्मप्रत्यये पुनः क्रिया कर्मानुसरति, यथा—मया पुस्तकं दृश्यते, अत्र कर्मपदं पुस्तकमिति तदनुरोधेन दृश्यत इत्यत्रापि प्रथमपुरुषैकवचनमेव न कर्त्तृसमर्पकमयापदप्रकृतिभूतास्मच्छब्दबलेनोत्तमपुरुषः ।

(२) विशेष्ये या लिङ्गसंख्याविभक्तयस्ता एव विशेषणेऽपि प्रयोज्याः । यथा 'सुन्दरो रामः' अत्र विशेष्येरामे—पुँस्त्वम् एकत्वं, प्रथमा चास्ति, तेन तद्विशेषणे सुन्दरपदेऽपि तथैव । 'सुन्दर्यः स्त्रियः' अत्र च विशेष्यभूते स्त्रिय इत्यत्र स्त्रीत्वम् , बहुत्वम् , प्रथमा चास्ति तदनुरोधेन च तद्विशेषणभूते 'सुन्दर्यः' इत्यत्रापि तथा । एवमन्यत्रापि बोध्यम् * ।

---

* इदं पुनरिहावधेयम् , अयं नियमः कतिषु चित्स्थलेषु नापि चलति, यथा-'शतं ब्राह्मणाः' अत्र विशेष्ये ब्राह्मणशब्दे सत्यपि बहुत्वे 'विंशत्याद्याः सदैकत्वे' इत्युक्त्या शतं—पदे एकवचनमेव । एवमेव 'वेदाः प्रमाणम्' 'धनजनप्रभावाः कारणम्' इत्यादावपि विभिन्नवचनकत्वदर्शनेनासाधुत्वं न शङ्कनीयम् , अन्नत्य-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(३) यथासम्भवं कर्त्तृपदविशेषणानां सर्वतः प्रथमं, ततः कर्त्तृपदानां तदनन्तरं विशेषणपुरस्कृतस्य कर्मपदस्य ततः क्रियायाः प्रयोगः।

यथा—'विचारचतुरो रामः शुभलक्षणां वनितामवोचत्' अत्र कर्त्तृविशेषणं विचारचतुर इति वनितारूपकर्मणो विशेषणं शुभलक्षणाम् इति। व्यस्तप्रयोगतायां तु वाक्यस्य त्वरयार्थसमर्पकत्वं विहन्यते—यथा रामः शुभलक्षणां वनितां विचारचतुरोऽवोचत् अत्र चिरं चिन्तयित्वैव कोऽपि यथायुक्तं परस्परसम्बन्धमनुसन्धायार्थं प्रतिपद्येत। अत एव चेदृशोऽन्वयो दोषतया गणितो रीतिग्रन्थकृद्भिः।

(४) शब्दमैत्रीसमीक्षणमपि प्रबन्धं लिखद्भिः करणीयं भवति। सा च शब्दमैत्री समानश्रुतिवर्णारब्धशब्दसमुदयप्रयोगेण निरुह्यते यथा—'गदाधरो धरति' अत्रैवार्थे 'गदाधरो बिभर्त्ति' इत्यपि सुवचं, परं प्रथमं चरमापेक्षया चमत्कारकम्। एवं रामो मायिनं रावणं जघान' अत्रैवार्थे रामो मायाप्रवीणं रावणं प्राणितुं नामुञ्चत्' अयं प्रयोगः प्रकर्षमावहति। इत्थमन्यत्रापि भावनाऽभ्यासावुपयोज्य कल्पनीयम्। इदन्तु पुनर्न विस्मरणीयं, यदयं क्रमो दुराग्रहतां न यथा यायात्। दृश्यन्ते हि कतिपये तादृशाः प्रयोगपण्डिता ये शब्दमैत्रीमर्जयितुं निखिलमपि गुणगणं परित्यजन्ति। परमियं प्रवृत्तिर्न प्रशंसाऽऽस्पदम्। अयमपि क्रमो मात्रयैव प्रयुक्तो रोचते लवण इव व्यञ्जनेषु। कियती मात्रा स्वादाय, कियत्या वा मात्रयाऽतिशय्यते सीमेति रसज्ञा एव ज्ञातुमीशाः, सामान्यतस्तु यावताऽर्थकाठिन्यं श्रुतिकटुत्वं च नापतेत्, तावदत्र प्रसङ्गे प्रयतनीयम् इति मध्यमो मनोरमो मार्गः।

(५) यावतांशेन भाषाप्रौढिर्लब्धा भवेत्तावतांशेनैव प्रबन्धस्यार्थांशमपि परिमार्जयितुं चेष्टेरन् विद्यार्थिनः। अर्थात् प्रबन्धलेखाभ्याससमये यथा यथा भाषाया गतिः साध्वी बुद्ध्येत तथा तथाऽर्थगौरवमर्जयितुं

सूक्ष्मविचारस्तु विस्तरभयादत्रानावश्यकत्वाच्चोपेक्षितः, सति कुतूहले स्वगुरवः प्रष्टव्याः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रयतनीयम् नहि भाषाविन्यासमात्रं प्रबन्धः, किन्त्वर्थप्रत्यायनप्रमुखा-कथकृदस्यकं प्रबन्ध इति जानन्तो हि च्छात्रा अर्थसाधुतायै यतेरन्। तदर्थं च प्राचीनप्रबन्धपठनम् विधेयम्। तत्पठनकाले च कथमत्रार्थाभिव्यञ्जनचातुर्यमाचरितमिति समाधाय मनो ध्येयम्। तथा कुर्वन्तो हि विद्यार्थिनः कियतैव कालेन ज्ञातरहस्याश्चमत्कारकरं प्रबन्धं लिखेयुः।

वाच्यपरिवर्त्तनम्।

प्रबन्धलेखावसरे प्रायश इदं दृश्यते यच्छात्रा एकत्रैव द्वित्राणि वाक्यानि कर्तृवाच्यानि प्रयुज्य मध्ये कतिचित् कर्मवाच्यानि प्रयुञ्जते, परतश्च पुनः प्राचीनप्रक्रममनुसरन्ति, परमिदं पण्डितेभ्यो न रोचतेऽतः स्त्यामपि स्फूर्त्तौ प्रसङ्गमनुसन्धाय वाक्यं प्रयोज्यम्। यत्र कर्त्तृप्रत्ययान्तक्रियाप्रवाहः प्रचलति, तदभ्यन्तरे यदि क्वापि कर्मप्रत्ययान्ता क्रिया ध्यानमवगाहते तदा तां कर्तृप्रत्ययान्तत्वेन विपरिणमय्य प्रयुञ्जीरन् प्रियच्छात्राः। एवं करणेन हि प्रक्रमनिर्वाहो भवति। एतदर्थं च वाच्यपरिवर्त्तनप्रक्रियाया ज्ञानमभ्यासश्चापेक्ष्यते। तत्र कर्त्तृप्रत्ययान्तस्य कर्मप्रत्ययान्तता भावप्रत्ययान्तता चेति द्वयी गतिः। तत्र सकर्मकधातुसत्त्वे कर्मप्रत्ययान्तता तदितरधातुप्रयोगे तु भावप्रत्ययान्तता। तथा च पाणिनेः सूत्रम्—

"लः कर्मणि च भावे चाकर्मकेभ्यः" ३।४।६९"।

तत्राकर्मकधातूनां वाच्यपरिवर्त्तने प्रक्रान्ते क्रिया कर्त्ता च परिवर्त्तेते (कर्म तु नैवास्ति) प्रथमान्तः कर्त्ता तृतीयान्तो भवति। (वचनं पुनः प्राचीनमेव) क्रिया च तत्तल्लकारस्य प्रथमपुरुषैकवचनमात्रस्य (मध्यमोत्तमपुरुषौ नात्र भवतः, नापि द्विवचनबहुवचने। (अत्रत्यां युक्ति सिद्धान्तकौमुदीभावकर्मप्रकरणे पश्यन्तु।) यथा—रामो हसति, (रामेण हस्यते) रामोऽहसत् (रामेणाहस्यत)। सकर्मकधातुप्रयोगे तु क्रिया (कर्त्तृप्रत्ययस्थले कर्त्तारमिव) कर्मप्रत्ययस्थले कर्मानुसरन्ती

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भवति, अर्थात् कर्म यदि बहुवचनान्तं तदा क्रियापि तादृशी, कर्मणि मध्यमपुरुषीये क्रियाया अपि तथाविधत्वमेव । यथा—रामो मां पश्यति (रामेण अहं दृश्ये । कर्मप्रत्ययस्थले कर्त्तरि तृतीया तु न्यायप्राप्तैव) राम आवां पश्यति (रामेण आवां दृश्यावहे) । रामः अस्मान् पश्यति (रामेण वयं दृश्यामहे) रामः त्वां पश्यति (रामेण त्वं दृश्यसे) रामः युवाम् पश्यति (रामेण युवां दृश्येथे) रामः युष्मान् पश्यति (रामेण यूयं दृश्यध्वे) रामः भवन्तं पश्यति (रामेण भवान् दृश्यते) रामः भवन्तौ पश्यति (रामेण भवन्तौ दृश्येते) रामः भवतः पश्यति (रामेण भवन्तो दृश्यन्ते) एवमन्यान्यप्युदाहरणानि कल्पनीयानि *

चिह्नप्रकरणम् ।

वर्त्तमानयुगे कस्यांचिदपि भाषायां किमपि लिखद्भिः प्रचलित-चिह्ननिवहप्रयोगोऽवश्यकर्त्तव्यतामुपगतस्तं विना भाषाया अर्थबोधन-शक्तेः कुण्ठनात्, सत्यप्यर्थबोधनसामर्थ्ये स्फुटप्रतीतेः सिद्ध्यै लेख-शोभासम्पत्तये च तत्प्रयोगस्य परमप्रयोजनीयत्वाच्च । तस्माद्विद्यार्थि-भिः प्रबन्धं लिखितुमुपक्रममाणैरधोलिखितनियमेषु ध्यानं देयम् ।

चिह्न-परिचयः—

यानि प्रयुक्तानि सन्ति विरामं व्यञ्जयन्ति, तस्य मात्रां च प्रकटय-न्ति, वाक्यानां परस्परसम्बन्धमभिदधते, तदर्थान् स्पष्टयन्ति, अग्रिम वाक्यानामुच्चारणे (विश्रामप्रदानविधया) साहायकं चाचरन्ति, तानि चिह्नानि कथ्यन्ते । तानि बहुविधानि, तेषु—

---

* वाच्यपरिवर्त्तनविषयकज्ञानस्य दृढीकरणाय सकर्मकाकर्मकधातुरूपैः सह शतं वाक्यानि विरचय्य तेषां वाक्यानां वाच्यपरिवर्त्तनं विद्यार्थिनो विदध्युः । सर्वेष्वपि लकारेषु वाच्यपरिवर्त्तनं विधाप्य तत्रापतिताशुद्धी रध्यापका अपाकुर्युः । दृढीभूते च तत्त्वतस्तज्ज्ञाने वाक्यविन्यासः सरलोऽतोऽत्र ध्यानं देयम् ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अल्पविरामः (,)

यत्र (,) एतदाकारं चिह्नं भवेत् तत्रैकवर्णोच्चारणकालपर्यन्तो विरामोऽवलम्ब्यः, अस्यैव सङ्केतस्य नाम-'अल्प विरामः' इति उदाहरणं, यथा—माता, पिता, गुर्वादयश्च श्रेष्ठाः पूज्याः। (अथवा) यदि भवान् स्वपुत्रस्य शिक्षायाः साधु प्रबन्धं न करिष्यति, तदा सोऽलसो जनिष्यते, समयं व्यर्थतां नेष्यति, उन्नतेः स्थानेऽवनतिं च यास्यति।

एतस्य चिन्हस्योपयोगस्थानानि यथा –

(१) यदि बहवः शब्दाः वाक्यांशाः बहूनि खण्डवाक्यानि वा तुल्यदशायां भवेयुस्तदाऽन्तिमं विहाय शेषाणामग्रे विरामचिह्नं देयम् , यथा रामः, श्यामश्चेदं कार्यं चक्रतुः।

(२) यत्रार्थबाधा पतति, तामपाकर्त्तुमपि, चिह्नं प्रयुज्यते। यथा—राजा स्वदेशीयो, विदेशीयो वा भवतु, राज्ञो धर्म एव प्रजापालनम्। अत्र यदि' चिन्हं न प्रयुज्यतेऽर्थबोध एव प्रतिबध्यते।

(३) सम्बोधनान्तपदेभ्यः परतोऽपि, चिह्नमिदं प्रयोक्तव्यम्। यथाः—बालकाः, सदा सदाचारमाद्रियध्वम्।

(४) यदि द्वयोः परस्परान्वितयोः पदयोर्वाक्यांशयोः खण्डवाक्ययोर्वा मध्ये किमपि पदं खण्डवाक्यं वा पतति, तेन च तयोः सम्बन्धो विच्छिद्यत इव, तदा तत्र, चिह्नं प्रयुज्यते। यथाः—देवदत्तः, यं भवान् बहोः कालात्परिचिनोति, अतिमनस्वी बालकोऽस्ति।

(५) यत्र इदं तत् प्रभृति सापेक्षं पदं न प्रयुज्यते तत्रापि, चिह्नं प्रयुज्यते। यथा—कदाऽवकाशो भविता, नाहं वक्तुं प्रभुः।

(६) परोक्तेरुद्धरणे ततः पूर्वमल्पविरामचिह्नमुपयुज्यते। यथाः-रामो ब्रूते स्म, तेन मदीयं पुस्तकं गृहीतम्।

अपूर्णविरामः(ः—)

यत्र (ः-) एताद्दृशं चिन्हं भवेत्तत्राल्पविरामापेक्षयाऽधिककालपर्यन्तं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विरमणीयम्। अस्य प्रयोगश्च तत्र क्रियते यत्र किमपि वक्तव्यं पृथक्-कृत्य विवक्ष्यते, किमपि स्फुटं वा गणयितुमिच्छा क्रियते। यथा—निम्नलिखितेषु पञ्च साधयत :- रामः, देवाः, गणेशः, इत्यादि। अस्य चिह्नस्य स्थाने(—) एतादृशेनापि चिह्नेन कार्यं चलति।

पूर्णविरामः (।)

यत्र (।) एतादृशं चिह्नं भवेत्तत्र चिरं स्थीयते। अयमेव पूर्ण-विराम इत्युच्यते। प्रत्येकवाक्यसमाप्तावस्योपयोगः क्रियते यथा—संस्कृतं राष्ट्रभाषा भवतु। अत्र विशेषः।

प्रश्नचिह्नम् (?)

प्रश्नबोधकवाक्यानामग्रे पूर्णविरामचिह्नस्य स्थाने प्रश्नचिह्न-मेव प्रयुञ्जते प्रयोगविदः। यथा—त्वं क्व वससि ? त्वं किं पठसि ?

विस्मयादिचिह्नम् (!)

विस्मय, शोक, करुणाद्यन्यतमचित्तवृत्तिबोधकपदवाक्यतदंशाना-मग्रे (!) एतादृशं चिह्नं दीयते। तदेव विस्मयादिचिह्नम्। यथा—अये ! कीदृशमुद्यानमिदम् ? अहो ! अन्यायेन पीड्यते वसुन्धरा।

निर्देशकचिह्नम् (–)

(१) यत्र किञ्चिदुक्त्वा तस्यैव दृढीकरणाय किञ्चिदन्यदुच्यते, यत्र वा किमपि दुरुक्तं संशोधयितुमन्यद्वाक्यं प्रयोक्तुमिष्यते तत्र—निर्देशकचिह्नमुपयुज्यते। यथा—तदुक्ताः शब्दाः—बाणा आसन्। यथा वा—मया त्वमादिश्यसे—ममायं भ्रमस्त्वं तत्पात्रं नासि।

(२) शीर्षकसमुदायोपनिबन्धे प्रत्येकशीर्षकस्यावसाने निर्देशक-चिह्नं प्रयुज्यते। यथा—रामकथा—तस्या उपादानानि—सामयिकेति-वृत्तानि।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कोष्ठचिह्नम् ( ) वा { }

कमपि शब्दं वाक्यं वा प्रयुज्य तदर्थं एव शब्दान्तरं वाक्यान्तरं वा प्रयुज्यते तत्र चिह्नमिदं प्राप्तावसरं भवति । यथा—

उपपादनं (कथनं) रोचकं प्रार्थ्यते ।

उद्धरणचिह्नम् " "

यत्र परोक्तेरुद्धरणं क्रियते तत्र चिह्नमिदमुपयुज्यते । यथा—रामः कथितवान् "मम ग्रामे कोऽपि मूर्खो नास्ति" इति ।

योजकचिह्नम् (-)

लिखनावसरे यदि कोपि शब्दः पङ्क्तेरवसानेऽपि समाप्तिं न याति तस्य कतिपयान्यक्षराणि शिष्यन्ते तदेदं चिह्नं दीयते यथा—

रामावतारे रामो ज्येष्ठभावमुप-
गतवान् ।

वर्जनचिह्नम् (. . . .)

यत्र किमपि निन्दनीयम्, अश्लीलं, व्यर्थोपादानं, स्फुटावसेयं वा न प्रयोक्तुमिष्यते तदा वर्जनचिह्नं प्रदीयते यथा—स............

उक्त्वा रामं भर्त्सयामास । तस्य मुखात्‥शब्दो निर्गतो येन सर्वे जहसुः ।

लाघवचिह्नम् (०)

यः स्फुटमवसीयते तादृशं पुनः पुनरुपादीयमानं वा शब्दं लेखकाः सङ्कोचयन्ति तत्र चेदं चिह्नं प्रयुञ्जते । यथा ति० (तिथिस्थाने) रामचन्द्रः गच्छति । रा० पठति ।

त्रुटिचिह्नम् (٨)

यत्र पङ्क्तौ किमपि लेख्यं हीयते तत्र यदग्रे तस्य सन्निवेशनमुचितं तत्र ٨ एतादृशं चिह्नं दत्त्वा त्रुटितं लिख्यते । यथा—रामः सीता

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पादौ
स्वयंवरे गुरोः /\ नत्वा धनुरुत्थापयामास ।

एवं प्रकारेण चिह्नानि साधु परिचित्य तत्प्रयोगस्थलानि च मनसि समवधार्य सावधानतया किमपि लिखद्भिर्यथोपयुक्त—चिह्नानि प्रयोज्यानि, तेन लेखस्य कायः साध्वलङ्कृतः प्रतीयते पाठकैश्चार्थांशे शीघ्रतया ध्यानमाधीयते, चिह्नादिच्युतौ "दशरामशराहताः" इत्यनेन कोऽपि नार्थः फलति, तदेव च पदकदम्बकं "दश रामशराहताः" एवं लिखितं सदर्थमाशु समर्पयति । अतोऽत्रयुगेऽवश्यध्यातव्योऽयं विषयः ।

प्रबन्धलेखकलामध्यापयद्भिर्ध्येया विषयाः—

(१) प्रथमं शिक्षकेण सरलसरलो मन्दमतिनापि सुबोधश्च विषयो विद्यार्थिनां पुर उपस्थापनीयः, अनन्तरं स्वयं तमेव विषयमधिकृत्य विद्यार्थिभिः सह वार्त्तालापः करणीयो येन विद्यार्थिनो लेखोपयुक्तानर्थान् मनसि व्यवस्थितक्रमेण समासञ्जयेयुः ।

(२) उपर्युक्तप्रकारेण वार्त्तालापप्रश्नोत्तरादिरूपेण समुन्नीतलेख्यांशं विषयमधिकृत्य प्रबन्धं लिखितुं विद्यार्थिन आज्ञापनीयाः ।

(३) प्रबन्धरचनायां सञ्जाता विद्यार्थिनामशुद्धयः स्फुटं बोधनीयाःयस्य च विद्यार्थिनः प्रबन्धे या अशुद्धयस्स्युस्ताश्शोधयितुं स एव वक्तव्यः । याश्चाशुद्धयस्तैर्विद्यार्थिभिर्न शोधयितुं शक्येरँस्ताः शिक्षकेण स्वयं शोधयित्वा दर्शयितव्याः ।

(४) कस्मिंश्चिद्विषये (उपशीर्षकभूतान्) लेख्यांशान् निर्दिश्य विद्यार्थिनस्ताननुसृत्य प्रबन्धं रचयितुमाज्ञापनीयाः ।

(५) आदर्शभूतप्राग्लिखितप्रबन्धानामन्यतमं निर्दिश्य तत्र विवेचितान् लेख्यांशान् उद्धर्त्तुं विद्यार्थिनः प्रेरणीयाः, एवं हि कृते सति लेख्यांशनिर्धारणशक्तिरुद्भवति छात्रेषु ।

(६) आदर्शप्रबन्धानामन्यतमं प्रबन्धं स्वसंस्कृते परिवर्त्तयितुं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विद्यार्थिनोऽनुयोक्तव्याः, तदीयमाशयं वाऽऽश्रित्य स्वभाषया नवीनं प्रवन्धं रचयितुमाज्ञापनीयाः ।

(७) यथा समयं विद्यार्थिभिः प्रवन्धा लेखनीयाः स्वयं लिखिताश्च प्रवन्धा विद्यार्थिभ्यो दर्शनीयाः, तैर्लेखनीयाश्च ।

(८) विद्यार्थिनां प्रवन्धान् संशोध्यानन्तरं स्वमतं प्रकाशनीयम् ।

यथा-लेखे सौन्दर्यं नास्ति, अशुद्धयोऽधिकाः सन्ति, पुनरुक्तिबाहुल्यमस्ति, अत्र प्रयुक्तया भाषया भावो न स्फुटति, उल्लेख्यविषयक्रमो मनोरमो नास्ति, भावसौन्दर्यं पर्याप्तं नास्ति, इत्यादि ।

वर्णनीया विषयाः ।

प्रबन्धलेखनकाले प्रसङ्गागतानां पदार्थानां वर्णनमवश्यकर्त्तव्यतामवलम्बते, तेन विना भावगभीरोऽपि प्रवन्धो निरलङ्कारः सुन्दरो बाल इव प्रतिभाति । अतो यथावसरं ते ते पदार्था वर्णनीयाः । वर्णने च करणीये कस्य विषये किं वर्ण्यत इत्यस्य ज्ञानमावश्यकम्, इति तत् प्रदर्श्यते । तत्र—

राजवर्णने—

नृपे कीर्त्ति, प्रतापाज्ञादुष्टशास्ति†-विवेकिताः ।
धर्म-प्रमाण-सङ्ग्राम-शास्त्राभ्यास-नय-क्षमाः ॥
प्रजारागोऽरिशैलादि‡-वासोऽरिपुर¶-शून्यता ।
औदार्य-धैर्य-गाम्भीर्यैश्वर्य-शौर्योद्यमादयः ॥

राजमहिषीवर्णने—

देव्यां सौभाग्य-लावण्य-शील-शृङ्गार§-मन्मथाः ।
त्रपा-चातुर्य-दाक्षिण्य-प्रेम-मान-व्रतादयः ॥
वेणी-धम्मिल्ल‖-सीमन्त-भाल-श्रवण नासिकाः ।

† शासनम् । ‡ अरीन् पराजित्य शैलतामुपगमितेषु तद्वासस्थलेषु निवासः ।
¶ अरीणां पुराणि, तेषां शून्यता, भयेन लोकानां पलायनात् ।
§ शृङ्गारः-वेषभूषाविन्यासः । ‖ असंयताः केशाः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कपोलाधरनेत्रभ्रू कटाक्षरदकन्धराः ।
गण्ड* बाहुकरोरोजनाभिमध्यवलित्रयम् ।
रोमाणि श्रोणि-जङ्घोरु-पादयुग्मनखक्रमाः † ॥

पुरोहितवर्णने—

पुरोहितो हितो वेद-स्मृतिज्ञः सत्यवाक् शुचिः ।
ब्रह्मण्यो ‡ विमलाचारः प्रतिकर्त्ताऽऽपदा ¶ मृजुः ॥

कुमारवर्णने—

कुमारे शस्त्र-शास्त्र-श्री-कला-बल-गुणोच्छ्रयाः ।
गजाश्वविद्याचातुर्यं, भक्तिः सुभगतोदयः ॥

मन्त्रिवर्णने—

मन्त्री भक्तः शुचिः शूरोऽनुद्धतो बुद्धिमान् क्षमी ।
आन्वीक्षिक्या§ दिकुशलः परिच्छेदी $सुदेशजः ॥

सेनापतिवर्णने—

सेनापतिर्जितायासः ‖स्वामिभक्तः सुधीरभीः ।
अभ्यासी वाहने शस्त्रे शास्त्रे च विजयी रणे ॥

देशवर्णने—

देशे रत्न-खनि-द्रव्य-पण्य-धान्या-करोद्भवाः ÷ ।
दुर्गग्रामजनाधिक्य-नदीमातृकतादयः ॥

ग्रामवर्णने—

ग्रामे धान्य-लता-वृक्ष-सरसीपशुपुष्टयः ।

---

* कपोलः, † पादविक्षेपः । ‡ वेदनिष्णातः,
¶ विपत्तीनां प्रतीकारस्य कर्त्ता । § आन्वीक्षिकी—तर्कविद्या ।
$ परिच्छेदी—विचारवान् । ‖ जितायासः—श्रमसहिष्णुः ।
÷ आकरोद्भवाः-आकराः खनयस्तत उद्भवो येषां ते (अभ्रक, कोइला आदि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

क्षेत्रा-ऽरघट्ट-✠केदार ग्रामेयी %सुखविभ्रमाः ॥

राजधानीवर्णने—

पुरेऽट्ट-परिखा-वप्र प्रतोली-तोरण-ध्वजाः ।
प्रासादा-ऽध्व-प्रपा-ऽऽराम-वापी-वेश्याः-सती-स्वरी ॥

सरोवर्णने—

सरस्यम्भोलहर्यम्भोगजा-द्यम्बुज-षट्पदाः ।
हंस-चक्रा-द्यस्तीरोद्यान-स्त्रोपान्थकेलयः ॥

समुद्रवर्णने—

अब्धौ द्वीपा-ऽद्रि-रत्नोर्मि-पोत-पाथो * जलप्लवाः ।
विष्णुः कुल्यागमश्चन्द्रवृद्धि-रौर्वो†-ऽब्दपूरणम् ॥

नदीवर्णने—

सरित्यम्बुधिगामित्वं वीच्यो जलगजादयः ।
पद्मानि षट्पदा हंसचक्राद्याः कूलशाखिनः ॥

उद्यानवर्णने –

उद्याने सारणिः,‡ सर्वफल-पुष्प-लता-द्रुमाः ।
पिकालि-केकि-हंसाद्याः क्रीडावाप्य-ध्वगस्थितिः ॥

शैलवर्णने—

शैले, मेघौ-षधी-धातु-वंश-किन्नर-निर्झराः ।
शृङ्ग-पाद-गुहा-रत्न-वनजीवा-द्युपत्यकाः ॥

अरण्यवर्णने—

अरण्ये-ऽहि-वराहे ¶भ-यूथ-सिंहादयो द्रुमाः ।

✠ अरघट्टः—कूपाज्जलोत्तोलनयन्त्रम् (रहटघड़ी)

% ग्रामेयी–ग्रामवनिता (क्वचिद् ग्रामस्त्रीत्यपि पठ्यते) सुखविभ्रमा इत्यस्य स्थाने मुग्धविभ्रमाः इति च पाठान्तरम् । अर्थांशे तु नान्तरम् ।

* पाथः—पानीयम् । † और्वः—बड़वानलः । ‡ सारणिः–कृत्रिमा-नदी, (नहर) ¶ इभाः—गजाः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शुक-काक-कपोताद्या भिल्ल-भल्लू-$दवाद्रयः ॥

आश्रमवर्णने—

आश्रमे-ऽतिथिपूजैण ‖ विश्वासः शान्तहिंस्रता ।
यज्ञधूमो मुनिसुता-द्रुसेको + वल्कलद्रुमाः ॥

मन्त्रवर्णने—

मन्त्रे पञ्चाङ्गता † शक्तिः, षाड्गुण्यो‡पायसिद्धयः ।
उदया-श्चिन्तनीयाश्च, स्थैर्यौन्नत्यादिसूक्तयः ॥

दूतवर्णने—

दूते स्वस्वामितेजः-श्री-विक्रमौन्नत्यकृद्वचः ।
शत्रुक्षोभकरी चेष्टा-धाष्ट्यं दाक्ष्य-मभीरुता ॥

युद्धवर्णने—

युद्धे तु वर्म-¶ बल-चार-रजांसि-तूर्य-
निर्घात-नाद-शरमण्डप-§रक्तनद्यः ॥
छिन्नातपत्र-रथचामर-केतु, कुम्भि-
योधाः सुरी$वृतभटाः सुरपुष्पवृष्टिः ॥

प्रयाणवर्णने—

प्रयाणे भेरि-निःस्वान-भूकम्प-बलधूलयः ।
करभोक्ष‖गजच्छत्रवणिक्शकटवेसराः + ॥

$ दवः—वनवह्निः । ‖ एणाः—मृगाः ।

+ द्रुः—वृक्षः (पलाशी द्रुद्रुमागमाः) । † "सहायाः, साधनोपाया, विभागो देशकालयोः, विनिपातप्रतीकारः, सिद्धिः पञ्चाङ्गमिष्यते" ।

‡ षड्गुणा एव षाड्गुण्यम् स्वार्थे ष्यञ्, ते च सन्धिविग्रहयानासन-द्वैधीभावसमाश्रयाः' । ¶ वर्म—कवचः । § शरैर्निर्मितो मण्डपः ।

$ सुरी–देवाङ्गना (ताभिर्वृताः, (मृता देवाङ्गनाभिर्वृता इत्यर्थः)

‖ उक्षा—वृषः । + वेसरः—अश्वतरः (खच्चर इति भाषा)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अश्ववर्णने—

अश्वे वेगित्व-मौन्नत्यं-तेजः. सल्लक्षणं-स्थितिः ।
खुरोत्खातरजः-प्रौढिर्जातिर्गतिविचित्रता ॥

गजवर्णने—

गजे सहस्रयोधित्व-मुच्चता कर्णचापलम् ।
अरिव्यूहविभेदित्वं-कुम्भ-मुक्ता-मदादयः ॥

सूर्यवर्णने—

सूर्येऽरुणता-†रविमणि-चक्रा-‡म्बुज§पथिकलोचनप्रीतिः ।
तारेन्दुदीप¶कौषधिघूकतमश्चौरकुलटार्त्तिः ॥

चन्द्रवर्णने—

चन्द्रे कुलटाचक्राम्बुजचौरविरहितमोऽर्त्तिरौज्ज्वल्यम् ।
जलधिजलनेत्रकैरवचकोर-चन्द्राश्म$दम्पतिप्रीतिः ॥

वसन्तवर्णने—

सुरभौ दोलाकोकिलदक्षिणवातद्रुपल्लवोद्भेदाः ।
जातीतरपुष्पचया—म्रमञ्जरी-भ्रमरझाङ्काराः ॥

ग्रीष्मवर्णने—

ग्रीष्मे पाटल-मल्ली-ताप-सरःपथिकशोषवातोल्काः ।
सक्तु-प्रपा*-प्रपास्त्री-मृगतृष्णा-ऽऽम्रादि-फलपाकाः ॥

वर्षावर्णने—

वर्षासु घन-शिखि×स्मय-हंसगमाः पङ्क-कन्द†लोद्भेदौ ।

---

† रविमणिः-सूर्यकान्तः । ‡ चक्रवाकः (तस्य निशि प्रियावियोगात्)
§ पथिकानां दिवा सव्यापारत्वेन कान्तास्मृत्यनुदयात् ।
¶ दीप एव दीपकः (स्वार्थे कः) $ चन्द्राश्मा—चन्द्रकान्तः ।
* 'प्रपा' पानीयशालिका ।
× शिखिनां-मयूराणां स्मयो-हर्षः (घनदर्शनात्)
† कन्दलम्-'भुइचाय' इतिप्रसिद्धो रक्तवर्णः पृथ्वीरूढः पुष्पविशेषः । अस्यैव

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

जाती-कदम्ब-केतक-झञ्झा-ऽनिल-निम्नगा हलिप्रीतिः ॥

शरद्वर्णने—

शरदीन्दुरविपटुत्वं-जलाच्छता-गस्त्य-हंस-वृषदर्पाः ।
सप्तच्छदा-ऽसिताभ्रा-ऽब्जरुचिः शिखि-पक्ष-‡मदपाताः ॥

हेमन्तवर्णने—

हेमन्ते दिनलघुता मरुबकयववृद्धिशीतसम्पत्तिः ।

शिशिरवर्णने—

शिशिरे कुन्दसमृद्धिः कमलहतिर्वा गुडामोदः ।

विवाहवर्णने—

विवाहे स्नानशुद्धाङ्गभूषातूर्यत्रयीरवाः ।
वेदीसङ्गीतहोमादिलाजमङ्गलवर्त्तनम् ॥

स्वयंवरवर्णने —

स्वयंवरे शची§ रक्षा—मञ्च मण्डपसज्जनाः ।
राजपुत्री नृपाकारान्वयचेष्टाप्रकाशनम् ॥

सुरापानवर्णने —

सुरापाने विकलता स्खलनं वचने गतौ ।
लज्जा मानच्युतिः प्रेमाधिक्यं रक्ताक्षताभ्रमः ॥

पुष्पावचयवर्णने—

पुष्पावचये पुष्पावचयः पुष्पार्पणार्थने दयिते ।
माला-गोत्र§स्खलने क्रोधो वक्रो¶क्तिसंभ्रमाश्लेषाः ॥

मृगयावर्णने—

मृगयायां च सञ्चारो वागुरा नीलवेषता ।

'शिलीन्ध्र—' शब्देन व्यवहारः 'कर्त्तुं यच्च प्रभवति मही मुच्छिलीन्ध्राम् ' इत्यादौ।

‡ वर्षासु मयूराणां पक्षाः (चिरनर्त्तनादिना) च्यवन्ते ।

§ शची—इन्द्रपत्नी । तस्या रक्षा—स्थापन पूजनपूर्वाङ्गम् ।

(§) गूढस्य प्रेम्णो महिम्नाऽनिष्टत्वेऽपि कदाचिदकस्मात् प्रियस्य नामग्रहणं तत् । (¶) वक्रोक्तिः—अन्यापदेशेनान्यस्यार्थस्य प्रकटनम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मृगाधिक्यं मृगत्रासो हिंस्रद्रोहो गतित्वरा ॥

इयता प्रकृतविषयपरिचये इत्थमन्यान्यपि वर्णनीयानि वर्णयितु-मारभमाणो लेखको यथा स्वबुद्धिवैभवमूहं कृत्वा वर्णयेत्। एषा वर्ण-नीयविषयसूच्यपि न परिगणनार्था, किन्तूदाहरणार्थैव। नैतावतामेव वर्णनेन परिसमाप्यते कर्त्तव्यम्। नानाविधावस्थासु वर्णनीयभेदस्य नानाविधत्वसम्भवात्। अतश्चेदं निदर्शनमात्रं बोध्यम्। इदं पुनरिहा-वधेयम्—उपरि निर्दिष्टा वर्णनीयसूचीयं सर्वेषु प्रबन्धेषूपयोगमानेयै-वेति नास्ति नियमो, नवा मयाऽदर्शतयाऽत्रोपनिबद्धेष्वेव प्रबन्धेषु सर्व-त्रेयं वर्णनशैली निभालिता स्याद् भवद्भिः, परं यैरुपयोगाय वर्णनीय-विषयसूचीगवेष्यते ये च क्रमशो जाताभ्यासाश्छात्रास्ते सूचीमिमां दृष्ट्वा तदनुसारेणापि वर्णनात्मकान् प्रबन्धानलङ्कर्त्तुं शक्नुयुः। अध्याप-काश्च प्रबन्धलेखशैलीं शिक्षयितुं लब्धावसरा इमान् विषयान् मनसि-कृत्यच्छात्राणां शक्तिं रुचिं च वीक्ष्य सुप्तां तदीयां शक्तिं जागरयितुमुप-क्रममाणा-एषामपि ज्ञानाय तानाग्रह्णीयुः। नात्र केनापि विशेषतो निर्ब-न्धः करणीयो यदिमान् विषयान् ज्ञात्वैव प्रबन्ध उपक्रमणीयो भव-तीति। एषां ज्ञानं शोभाधिक्याय, नस्वरूपलाभायेति संक्षेपः।

प्रबन्धभेदादिकथा।

एवं वर्णनीयानां विषयाणां ज्ञाने जाते तेषामुपन्यसनेन प्रबन्धेषु शोभाधिक्यमर्जनीयम्।

इतः परं प्रचितप्रचारान् विषयानवलम्ब्य कतिचनादर्शप्रबन्धा लि-ख्यन्ते। तत्र प्रबन्धस्त्रिप्रकारक इति प्रागेवावोचाम। तत्र कस्य प्रबन्धस्य कुत्र प्रकारेऽन्तःपात इति विद्यार्थिभिर्लक्षणसङ्गमनेनोन्नेयम्। अत एव च मया विविच्य प्रकरणभेदो न कृतः। केवलं छात्राणामुपकारायैवायं हि मम व्यापारः। इति।

अध्यापकैः किञ्चिदिहावधेयम्।

इत्थं हि दृश्यते श्रूयते च यत् प्रबन्धाँल्लिखितान्प्राप्य विद्यार्थिन-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स्तान् कण्ठस्थीकर्त्तुमुत्कण्ठन्ते, तथा विधायैव परीक्षासूत्तरन्ति, परमेतेन तेषां शक्तिर्न विकसति, येन शिक्षाया लाभेन वञ्चिता एव ते तिष्ठन्ति, तथाविधाश्च सन्तो गुरूणां गौरवं मलिनयन्ति। अतो यथासम्भवमायस्य कण्ठस्थीकरणप्रवृत्तिरवरोध्या। छात्राणां लेखसामर्थ्यं यथोदियादेतदर्थं तैरेकैकस्य प्रबन्धविषयस्य प्रागुक्तप्रकारेणाभ्यासः कारयितव्यः। इयता प्रकरणेनोक्तस्यार्थराशेर्यथावज्ज्ञाने जाते स्वयं समुत्पन्नलेखशक्तयः समेधितभाषारुचयश्छात्राः कामपि विलक्षणां स्फूर्त्तिमासाद्य प्रवर्त्तेरन्नत्र कर्मणीति मम सुदृढो विश्वासः।

एकमिदं पुनरवशिष्यते—कतिपये कथयन्ति—

'येषां छात्राणां व्युत्पत्तिरुद्भवति ते शास्त्रीयज्ञाने मन्दायन्त' इति। अत्र विषये चिरं चिन्तयतापि मया कारणं नोन्नेतुमपारि। सत्यं कोमलमतित्वं कठिनतरतर्कशास्त्रप्रवेशप्रतिबन्धकरं, परं किमशुद्धिबहुलभाषालेखनाभ्यासोऽपि कस्यापि मते तर्कशास्त्रप्रवेशहेतुतया मतः? अथ तथा, किमिति प्राचां पण्डितानां व्युत्पत्तिस्तेषां शास्त्रीयज्ञानं न प्रत्यबध्नात्?। अवश्यं कोमलमतीनां बालानां सततं सुखश्रव्यहृद्यार्थकाव्यश्रवणाध्ययनतच्चिन्तनादिकं तदीयं मनो वैषयिकसुखाभिलाषुकं कृत्वोन्नतिवर्त्म निरुणद्धि परं शुद्धमार्जितभाषाज्ञानतल्लेखनाभ्यासो तु सर्वथा सर्वत्रोपकुरुत एव। अतः सर्वथाऽत्र प्रयसनीयम्।

तदिति विदितवद्भिः शुद्धभाषानिबन्ध-
प्रखरतरमनीषैः सेवितं शास्त्रजातम्।
फलति, समुपदीप्ते कृष्णवर्त्मन्यशेषं
ज्वलति हुत-मिदं किन्नावगच्छन्ति सन्तः?।

इति प० श्रीरामचन्द्रमिश्रकृते 'प्रबन्धपारिजाते' प्रथमः पल्लवः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

द्वितीयः पल्लवः ।

आदर्श-प्रबन्धाः ।

(१) ग्राम्यपाठशाला ।

१ को ग्रामपाठशालापदार्थः, २ तत्स्वरूपपरिचयः, ३ तत्पाठ्यविषयाः, ४ गुरुमहाशयः, ५ आयव्यवस्था, ६ ग्राम्यपाठशालाया लाभः ७ तदीया दोषाः, ८ उपसंहारः ।

१—ग्राम्यपाठशालापदेन वयं प्राचीनरीत्या चलितान् लघुविद्यालयानवगच्छामः, ये पूर्वं प्रतिग्राममतिष्ठन्, सम्प्रत्यपि बहुषु ग्रामेषु विद्यन्ते, येषु नूतनरीत्या व्यवस्थापिताः प्रारम्भिकविद्यालया न चलन्ति । ग्राम्यपाठशालासु पठनं, लिखनं, प्रारम्भिकगणितं च शिक्ष्यते । तासु कन्या बालाश्चाल्पवयसः सममधीयते ।

२—ग्रामपाठशालायाः सर्वमपि बाह्यं रूपं विद्यालयतुल्यमेव, केवलं सर्वत्र लघुताऽऽकर्षकसामग्रीविरहश्च भवति । एतस्याः कृते पुरा पृथग्भवनं नापेक्ष्यतेस्म । कस्यापि देवमन्दिरस्य बहिश्शाले कस्यापि ग्रामीणस्य सदाशयस्य द्वारदेशे वा ग्रामपाठशाला सञ्चाल्यतेस्म । क्वचिच्च ग्राम्यजनतया किञ्चित् किञ्चिद्दत्त्वा ग्राम्यपाठशालार्थं पृथग्भवनमपि निरमाप्यत । तत्र शिक्षकस्य शिष्यगणस्य वा कृते रमणीयानामासनानां प्रबन्धो न भवतिस्म । विद्यार्थिनः स्वमासनं स्वगृहेभ्य एव नयन्तिस्म । केवलं गुरुमहाशयस्य कृते किञ्चिदुच्चं 'स्टूल' नामकमासनं तिष्ठति ।

३—ग्रामपाठशालासु बालानामपरिमार्जिता मतिरनावश्यकविषयाणां भारान्न क्लेश्यते, केवलं लिपिप्रक्रिया, पठनशैली, प्रारम्भिकगणितं च शिक्ष्यते । आधुनिकविद्यालयवत् तासु पाठशालासु सर्वे सहैव नापाठ्यन्त, किन्तु यथाबुद्धिबलं बालाः पृथक् पृथक् पाठ्यन्तेस्म । गणितस्य शिक्षा मौखिकी दीयतेस्म । एको वयसा योग्यतया च श्रेष्ठो

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

बालो यद् वदति, सर्वेऽपि बालास्तदावर्त्तयन्ति, एवं प्रतिदिनं विद्यालयसमयसमाप्तिकाले क्रियते। लिखनविषये प्रथममक्षराणि भूमौ, तदनु यथाभ्यासपाटवं शिलापट्टके, ततः पत्रेषु लिखित्वा विद्यार्थिभिरभ्यासः क्रियते।

४—ग्राम्यपाठशालासु प्राय एक एव गुरुर्भवति। स नाधिकविद्याशाली, परं पाठनीयविषयं साधु जानन् भवतिस्म। स च दृढ़स्वभावः, शासनदक्षः, दयालुश्च प्रशस्यते। विद्यार्थिनश्च तदीयामाज्ञां भयेन यावतांशेन पालयन्ति न तावत्यंशे प्रणयेन। स च महाशयः स्वविद्यार्थिनां योगक्षेमं सर्वांशेनानुसन्धत्ते, येन विद्यार्थिनां हृदि तद्विषये निरूढा भक्तिश्चिरमनुवर्त्तते, याऽऽधुनिकविद्यालयेषु गृहीतप्रवेशैरपि तच्छात्रैर्न विस्मर्यते।

५—पाठशालाशिक्षकाः प्रायो निःस्वा एव भवन्ति। ते किमपि वेतनं नियतं नासादयन्ति। विद्यार्थिभिः प्रतिमाससमर्पितैरल्पैः शुल्कैस्तेषां जीविका चलति। एतदतिरिक्तं पर्यायक्रमेण भोज्यमन्नमपि विद्यार्थिभिरुपहृतं तेषां जीविकां निर्वहति। पर्वसु विशिष्यसमर्पितैर्द्रव्योपहारैस्तेषामायस्य सुमहान् भागः समायाति। अल्पीयसि सामयिके चाये सन्तुष्टहृदयास्तेऽध्यापकाः स्वं जीवनं यापयन्तो ग्रामवासिनां बालान् शिक्षासोपानमारोहयन्ति।

६—ग्राम्यपाठशालाया लाभः प्रचुरप्रकारको भवति। अत्र शिक्षा स्वल्पव्ययेन लभ्यते। यो व्ययसाध्यां शिक्षामधिगन्तुमनीशस्तस्यापि साक्षरताऽत्र जायते। प्रत्येकच्छात्राणां गुणावगुणौ ज्ञात्वाऽध्यापकमहाशयस्तस्य तस्य गुणस्य समृद्धये दोषाणामपचयाय च प्रयतते। एषा पाठशाला सारल्येन जीवननिर्वाहं मितव्ययशीलतां च शिक्षयित्वा भाविजीवनयात्रापथं प्रशस्तयति।

७—यद्यपि पाठशालासु प्रागुक्ता गुणा भवन्ति, परं तत्र दोषा अपि सन्ति। एक एवाध्यापकः सर्वेषामपि विद्यार्थिनां सर्वेष्वप्यंशेषु समु-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

च्चितां शिक्षां समुचितेनोपयुक्तेनैव च कालेन विदध्यादिदं न सम्भवति। किञ्चैकस्यैवाध्यापकस्य सुगुणदुर्गुणौ द्रष्टुमवसरं लभमानाश्छात्रास्तमेवादर्शं स्थिरयन्ति। ईदृशपाठशालासु पाठ्यक्रमोऽपि निश्चितो न भवति। पाठशालाध्यापकाश्च प्रायेणालसा दृश्यन्ते। गुरुमहाशय एव पाठशालायाः सर्वमधिकारं धारयतीत्यनेनापि कतिपये दोषाः सम्भवन्ति।

८—सम्प्रति ग्रामपाठशालानां ह्रासस्य समयः समुपस्थितः। नवीनयुगस्य नीतिरीती अनुसृत्य चालिता एव शिक्षणालयाः सर्वत्र स्थाप्यन्ते, ग्रामपाठशाला यत्र विद्यतेऽपि तत्रापि तस्या अवस्था शोचनीयैव। तद्दोयान् दोषान्दूरीकर्त्तुं प्रयस्य यदि पुनः प्रतिग्रामं प्रतिपल्लि च तासां प्रतिष्ठापनं क्रियते, महानुपकारः कृतो भवति भारतवर्षस्य दरिद्रतयोष्णं निःश्वसतः स्वां सन्ततिं शिक्षयित्वैव सम्भाव्यमानमुदयं कामयमानस्य। तथाऽस्तु। पाठशालामल्लशाला ग्रामे ग्रामे च जायताम्॥

(२) समाचारपत्राणि।

१ समाचारपत्रपरिभाषा, २ कैरेतानि लिख्यन्ते, ३ एषामुद्भवस्येतिहासः, ४ भारतीयसमाचारपत्राणां कर्त्तव्यम्, ५ एषामुपयोगिता, ६ उपसंहारः।

१—यानि लघूनि बृहदाकाराणि वा पुस्तकानि नियततिथिषु भिन्नभिन्नस्थानानां समाचारान् सङ्कलय्य सम्पाद्य च मुद्रितानि कृत्वा विक्रीयन्ते तानि समाचारपत्राणि कथ्यन्ते। एषु केवलं समाचारा एव न भवन्ति किन्तु मानसिक, चारित्रिक, व्यावहारिकसमुत्कर्षसम्पादका विचारा अपि प्रकाश्यन्ते। एषु कतिचित् साप्ताहिकानि भवन्ति, कतिचिदर्धसाप्ताहिकानि, दैनिकानि च। विदेशेषु त्वर्धदैनिकानि पत्राण्यपि प्रकाश्यन्ते। मासिकत्रैमासिकषाण्मासिकवार्षिकपत्राणां तु पुस्तकतया परिगणनमेव समुचितं तेषु समाचारस्यानादरणीयतयोल्लेखात्प्रबन्धप्रकाशनस्यैव तेषामुद्देश्यत्वात्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

२—एषां समाचारपत्राणां न कश्चिदेको नियतो लेखकः परन्तु भिन्नभिन्नपुरुषैर्लिख्यमानानां लेखानां सम्पादनाय कश्चिदेकः प्रधानसम्पादकस्तिष्ठति यो रीतिं नीतिं च नियमयति, स एव च तत्र प्रकाश्यमानानामर्थानामुत्तरदायी मन्यते।

३—सर्वप्रथमं समाचारपत्रं वेनिस (इटली) नगरे प्रकाशमासादयत्। तदुद्भवां ख्लाभान् दृष्ट्वा यूरोपस्य सर्वे देशाः समाचारपत्राणां प्रकाशनमारब्धवन्तः। महाराज्ञ्या एलिजाबेथनाम्न्याः शासनकाले इङ्गलैण्डदेशे सर्वप्रथमस्य समाचारपत्रस्य प्रकाशनं प्रारभ्यत। अस्माकं देशे भारते तु १७८० तमेशवीयवर्षे 'इण्डिया गजेट' नामकस्य पत्रस्य प्रकाशनं प्रावर्त्तत। सम्प्रति तु सङ्ख्यामीषां सहस्रमप्यतिशेते। परमियमपि संख्या देशान्तरीयपत्रसङ्ख्यया तुलनायां लघुतमैव।

४—सर्वेषामपि समाचारपत्राणां कर्त्तव्यतया निर्धारितमुद्देश्यं भिन्नं भिन्नं भवति। किमपि राज्ञो जनतायाश्च वृत्तमन्योन्यस्य समीपे समुपस्थापयति येन तदीयं पारस्परिकं मालिन्यमपयाति। किञ्चिच्च पत्रं सदा जागरूकं सत् देशस्य राजनीतिकीं गतिं नियन्त्रयति। किञ्चन च धार्मिकीं स्थितिं समेधयति। एवमन्यत्। सम्प्रति प्रायः प्रचलितेयं परिपाटी यद्या संस्था स्वीयं प्रचुरं प्रचारमिच्छति तस्या मुखपत्रं प्रचरत्येव येन तदीयमभिमतं जनानां पुरः स्थाप्यते। समाचारपत्रै राजानो नियम्यन्ते, शासनसूत्रं तथा समालोच्यते यथा नापैति पथः। एकत्राविष्कृतस्य कस्यापि पदार्थस्य यन्त्रस्य वा प्रचारः समाचारपत्रैरेव क्रियते येन तन्मूल्यं वर्द्धते, तदाविष्कर्त्तुश्च प्रतिष्ठा समेधते। देश-विदेशभवानतिप्रयोजनीयान् वृत्तान्तान् ज्ञातुमपि पन्थाः सरलतया पत्राण्येव।

५—समाचारपत्राणां कर्त्तव्येषु दृष्टिं ददतां कृते तदुपयोगिता न दुरूहा। एतैर्हि लोकरुचिः प्रकाशिता क्रियते शासनं च सरलतां नीयते। दुष्पथप्रवृत्तं शासकमण्डलमङ्कुशेनेवाकृष्य प्रकृतौ स्थापयितुमेषां महानुपयोगः। अस्माकं देशस्य शासको विदेशीयः, तदीयां शासन-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पद्धतिं पत्राणि तथा समालोचयन्ति यथा स कदाचित् कुप्यत्यपि। तत्र स्थितौ सम्पादका दण्डमपि लभन्ते। परं तु सम्पादकैः सदा निर्भीकैः सत्यव्यवहारिभिः विघ्नबाधासहिष्णुस्वभावैश्च भाव्यम्। एवं सत्येव पत्रस्य गौरवं भवति।

६—भारतीयानि बहूनि पत्राणि, कस्यचिदेकस्य प्रधानपुरुषस्य समुत्साहमेवाधारं कृत्वा प्रकाशमासादयन्ति, तेन तदीयोत्साहसमाप्तौ तदायुरपि समाप्नोति। यथा स्व० हृषीकेशशास्त्रिणां 'विद्योदयः'। म०म० विधुशेखरशर्मणां 'मित्रगोष्ठी'। म०म० मुरलीधरशर्म्मणां 'मिथिलामोदः', 'प्रदीपः', 'अमरभारती' च। पाश्चात्यदेशेषु नेदृशी स्थितिः। तत्र ग्राहकाणां सङ्ख्या भूयसी भवति येनार्थिककष्टं नोपतिष्ठते ऽतोऽन्येऽन्ये प्रकाशकप्रबन्धकाः सदा समुद्यता एव तिष्ठन्ति। पश्याम भगवान् भारते कदा तामवस्थामानयति।

---

(३) मुद्रणकला।

१ पूर्वाभासः, २ मुद्रायन्त्रस्य सृष्टिः क्रमश उन्नतिश्च, ३ एतेनोपकारापकारौ, ४ उपसंहारः।

१—शिक्षाविस्तारेण सममेव मानवजातेः सभ्यतापि दिनानुदिनमुत्कर्षं भजते। नानाप्रकाराणां यन्त्राणामाविष्कारेणास्माकं सुखस्य स्वाच्छन्द्यस्य च पन्थाः प्रशस्ततां नीयते। गतशताब्दीत्रयस्याविष्कारा भावनावर्त्म नीता आश्चर्यमुत्पादयन्ति। यन्मुद्रणयन्त्रमधुना प्रतिपल्लिसमुपलभ्यते, यदीयमुपयोगं प्रायः पांसुलपादो हालिकोऽपि जानाति, शताब्दीपञ्चकात्पूर्वं तस्य यादृशी स्थितिरासीत्तां—भावयतोऽपि सम्प्रति विस्मयते मनः। मानवीयसभ्यताविकाससाधनानि यावन्ति—यन्त्राणि प्रकटीकृतानि तेषु मुद्रायन्त्रं प्रधानतममत्र न प्रायो विप्रतिपद्यन्ते विपश्चितः।

२—ईशवीय नवमशताब्द्यां चीनदेशे मुद्रायन्त्रस्य प्रथमः प्रयोगः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रारब्धः। तस्मिन् काले तत्र काष्ठफलकखण्डेषु (चित्राकाराणि चीन-देशीयानि) अक्षराणि क्षुण्णानि। तैरेव च मुद्रणकार्यं समपाद्यत। पञ्चदशैशवीयशताब्द्यांम् यूरोपदेशेषु मुद्रणं प्रारब्धम्। जर्मनदेशोऽस्याः कलाया उन्नतौ मुख्यं भागमधित। प्रख्यातः शिल्पी 'स्टेनहोप' महोदयो मुद्रणयन्त्रं निर्माय समाचारपत्राणि पुस्तकानि च प्राकाशयत्। अस्माकं देशे तु १६ शताब्द्या मध्यभागं यावत् कोपि मुद्रणप्रबन्धो नासीत्। तदनन्तरमपि शिलालिपिः प्रचरिता, या नातिसुन्दराकृतिश्चिरसाध्या चासीत्। सप्तदशशताब्द्या अवसाने कथञ्चित् मुद्रणकार्यं लौहमयैरक्षरैः प्रारब्धम्। (स्टीम) वाष्पीयमुद्रणयन्त्रं तु ऊनविंशशताब्द्यां जगति जातप्रकाशमिति विदन्ति विज्ञाः। सम्प्रति तु अस्य विज्ञानस्यैतावान् परिष्कारो जातो यदेकदोपभुज्यमानमक्षरं तत्क्षणमेव विलाप्य तदग्रे पुनरुपयोजयितुं निर्मान्ति नवमक्षरं (तेन द्रुतद्रव्येण) यन्त्राणि। पुनरेकदा कृतमुद्रणं तु तदक्षरं प्रागुक्तदिशा विलाप्यते। अधुनावधिकृताविष्काराणां तद् यन्त्राणां मध्ये (Rotary Machine) रौटरी मैशिन् संज्ञया व्यवह्रियते।

२—सम्प्रति मुद्रणकला ज्ञानविस्तारस्य प्रधानं साधनम्। प्राचीनकाले पुस्तकानि हस्तेन लिख्यन्तेस्म। तत्रैकस्यैव पुस्तकस्य लेखनेऽत्यधिकः कालोऽपेक्ष्यतेस्म। तावता परिश्रमेण लिखितस्य पुस्तकस्य मूल्यमत्यधिकं भवतिस्म, तथा च पुस्तकानां सङ्ग्रहोऽतिव्ययसाध्य आसीत्तेन च ज्ञानसाधनविद्योपार्जने सर्वेषां सामर्थ्यं नोपपद्यतेस्म। जाते तु मुद्रायन्त्राविष्कारे कियतोभिरेव होराभिरेकस्य पुस्तकस्य लक्षाधिकाः प्रतयः सम्पाद्यन्ते, येनाल्पेन मूल्येन समयलाघवेन च ज्ञानं सुखमर्जयितुं शक्यते। मुद्रायन्त्राविष्कारात्पूर्वं कोपि कस्यापि कमपि समाचारं (विना दूतप्रेषणं) ज्ञातुं नाशकत्। समाचारपत्राणि नाप्रकाश्यन्त। देशान्तराणां का कथा? प्रान्तान्तराणामपि समाचारो ज्ञातुमशक्य एवाभवत्। यदि मुद्रायन्त्रस्याविष्कारो नाभविष्यन्नूनमस्माकं ज्ञानराशेः प्राचीनग्रन्थनिवहस्य कियान् भागः काल-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

महिम्ना कटुकीटपटलसन्दंशनेन पाथः पृषतपातेन वाऽलोप्स्यत।

मुद्रायन्त्रस्य कृपया येन प्रकारेण देशस्य तावन्त उपकारा जाताः, ज्ञानविस्तारस्य पन्थाः सरलीकृतः, तथैव कियतांशेन हानिरपि जाता। कियन्ति कुरुचिपूर्णानि सद्भिर्गर्हितान्यश्लीलानि च पुस्तकानि प्रकाशमानीतानि, येन मानसिकी स्थितिः कलुषीक्रियते। परं हानिरल्पीयसी, लाभस्य तुलनायामगण्या। सर्वथा निर्दोषं वस्तु प्रायो गुणदोषमये विरञ्चिप्रपञ्चे नैवास्ति।

४—इदं मुद्रणयन्त्रमस्माकं ज्ञानमवर्द्धयत्। विदेशीयैर्देशीयैश्च विद्वद्भिः सहपरिचयमकारयत्। धर्मग्रन्थानरक्षत्। किञ्च संसारयात्रायाः पन्थानं सरलमकार्षीत्। सत्यं! मुद्रणयन्त्रं मानवसभ्यतायाः श्रेष्ठतमः स्तम्भः।

---

(४) परोपकारः।

१ पूर्वाभासः, २ परोपकारः प्रकृत्यापि शिक्ष्यते, ३ परोपकारेण लाभः, ४ उपकारः कथं क्रियते ? ५ क उपकारस्य पात्रम् ? ६ उपसंहारः

१—किमपि प्रत्यर्पणमनभिलष्य परकीयहितानुसन्धानं परोपकारः मनुष्येषु श्रेष्ठतायाः साधनानि यान्यपेक्षितानि तेषु प्राधान्यं परोपकारस्य। येषु मनुष्येषु गुणोऽयं नास्ति तान् मनुष्यतनुमाधाय चरतः पशूनेवाभिधातुं ममात्मनो निर्बन्धः।

२—उचितमिदं यद्वयं प्रकृतेः सकाशात् परोपकारस्य शिक्षामुपाददीमहि। इयं पृथ्वी किमस्मभ्यं न ददाति ? भोजनं धरैव ददाति। पृथ्वी एव जलं पाययति। किञ्च नानाविधं शीतमातपं च सहमानाऽस्माकं मनः प्रसादयितुं प्रयतते। प्रातः प्राप्तोदयः सूर्यः सम्पूर्णमपि दिनं वियति भ्रमन् प्रकाशमर्पयति नः। सुधादीधितिश्चायं सुधयाऽस्मान् प्रीणयति। एते च पृथ्वीसूर्यचन्द्राः किमपि नास्मभ्यमभिलषन्ति। -

३—परोपकारात् प्रबलं किमपि पुण्यमत्र जगति नास्ति। एष मान-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वानां हृदये पवित्रतां, सहनशीलतां, दयां, भक्तिं, प्रेमाणं च प्रादुर्भावयति। एतान् हि गुणान् विना शुनो मार्जारान् वा किमिति हसेम वयम्, तेऽपि तु खादन्ति, शेरते, जाग्रति च।

४—बुभुक्षितेभ्यो भोजनस्य, पिपासितेभ्यः पयसः, वस्त्रहीनेभ्यो वस्त्रस्य दानम्। येषां प्राणाः सङ्कटे सन्ति तेषां प्राणत्राणम्। जीवमात्रं प्रति तदाशापूरकसहयोगप्रदानं चोपकारिणां प्रधानं करणीयम्। किञ्च विद्यादानमपि परोपकारस्य श्रेष्ठो मार्गः। दत्तं भोजनं वस्त्रं च कियतः कालस्य कृते तदावश्यकतां शमयति, परं विद्या मनुजानां जीवनसहचरीसती तान् सुखयति।

५—यदि वयं धनिकेभ्यो धनं दद्मो न तेन तेषां किमपि फलं जायते, समुद्रे वर्षणमिव तदनतिप्रयोजनकतां प्रतिपद्यते। एवमेव यः स्वबाह्वोः श्रमेण भोजनमर्जयितुं क्षमस्तस्मै भोजनप्रदानं परोपकारस्य कोटौ नायाति, प्रत्युत तथाविधानामलसानां सङ्ख्यां वर्द्धयेत्। अत उपकाराय प्रवर्त्तमानैः प्रथममिदं विचारणीयं यत् कस्मै किमर्प्यताम्? कस्य वस्तुनः क आवश्यकतायाम्? अक्षिणी निमील्य कस्मैचित् कस्यचिद्वस्तुनः प्रदानं परोपकारस्य संज्ञां नार्हति। अत एवोपकारकाले पात्रविवेकः परमापेक्षितः पदार्थः। ये सबलस्वस्थतनवस्ते जीवनयात्रायास्साधने तादृशे वर्त्मनि योजनीया ये तत्र साफल्यमासाद्य सुखिनो जायेरन्। शास्त्रेषु परोपकारस्य महतीप्रशंसा कृता। तथाहि-

"अष्टादशपुराणेषु व्यासस्य वचनद्वयम्।
परोपकारः पुण्याय पापाय परपीडनम्"॥ इति।

भारते शिविः, दधीचिः, दिलीपः, इत्यादयो बहवः परोपकारिणो महात्मानो जाताः, ये जीवानामुपकारार्थं स्वं सुखं शरीरं चापि तृणायामन्यन्त। दधीचे! धन्योसि, यस्त्वं परेषां प्राणान् परित्रातुं स्वमस्थि समर्पितवान्। त्वादृशानामेव महात्मानां यशः श्रद्धया गायति त्रिलोकी।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

"परोपकरणं येषां जागर्त्ति हृदये सताम्।
नश्यन्ति विपदस्तेषां सम्पदस्तु पदे पदे" ॥

६—इत्थं परोपकारस्य सर्वाङ्गीणं स्वरूपं मङ्गलमयमवगत्य यथाशक्ति तत्र वर्त्मनि स्थेयं विचारचतुरैः। सदा मनसि स्थापनीयं—धिक् स्वोदरैकभृतिमात्रकदर्यान्। इति।

---

(५) एकता।

१ परिभाषा, २ एकता कीदृशीं शक्तिं रक्षति ?, ३ एकताया उपकारः, ४ उदाहरणम्, ५ उपसंहारः।

१—कस्य चिदेकस्य निश्चितोद्देश्यस्य साधनाय बहूनां जनानां विहाय बुद्धिभेदमैकमत्येन प्रवृत्तिमेकतामाहुः। यद्वा निश्चितकार्यविशेषं प्रति, सत्यपि कार्यान्तरविषयकमतभेदे, तत्साधनप्रवृत्तानामेकबुद्धिकतामेकतां ब्रुवते।

२—एकतायाः शक्तिरतुला वर्त्तते, येनैकेन तृणेन लघुरेकः कीटोऽपि न बध्यते, तस्यैव समूहेन मत्तदन्तिनोऽपि सुखेन बद्धयन्ते। जलस्यैको बिन्दुः कस्मैचिदपि कार्याय नालम्, परं तस्यैव समुदायो नदीभावमापन्नः प्रबलेन वेगेन वहमानः क्षितिधरानपि मार्गरुधो भित्त्वा निर्याति, देशं प्लावयति, तालतरूनपि तिरोदधाति। इयमेव दशा प्राणिनामपि। यदा कोपि सङ्घः कस्मैचिदपि कार्याय सन्नह्यति तदा तत्कार्यं सिध्यत्येव। तदन्तः पातिना चैकेनः शतशः प्रयतमानेनापि न कर्त्तुं शक्यते। पिपीलिकाऽतिलघुर्जीवः, सा (एका) तृणखण्डमपि नवोढुं क्षमा, परं तस्या एव सङ्घः कीदृशमपि विषधरं बद्ध्वा भक्षयति। अत इदं सिद्धयति यदेकेनासाध्यं कार्यमपि (एकताशालिना) तत्समुदायेन सुखं सम्पाद्यत इति।

३—सर्वेष्वपि कार्येषु सिद्धिप्राप्तये प्रबलं साधनमेकतैव विद्यते। यदि वयमेकतामलप्स्येमहि तदा सांसारिकं—पारलौकिकं सर्वमपि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कार्यं विनैव कष्टं साधयेम। यदि दरिद्रपरिवारेऽपि परस्परमैक्यं भवेत्तदा तत्रापि शान्तिसुखावासः। एकताया अभावे तु कोऽपि केनापि सह कामपि सहानुभूतिं न रक्षति, भ्राता भ्रातुः कृते स्वार्थं न त्यजति तदा राजप्रासादेऽपि सुखं नोपलभ्यते, इन्द्रभवनमपि श्मशानभयङ्करं प्रतिभाति।

यस्मिन् समाजे ऐक्यं नास्ति तस्य दुर्बलस्य समाजस्य पतनमपश्यं भावि। स कदापि सम्पदुन्नत्योर्मुखं न वीक्षिता। एकताया अभावे समाजस्य का गतिर्भवति, देशस्य कीदृशो दुरवस्था भवति—नात्र दृष्टान्तान्वेषणाय बहुचिन्तनीयम्—अत्र अस्माकं देश एवोदाहरणम्।

४—इतिहासानां विलोकनेन ज्ञायते यद् यत्र गृहे, समाजे, जातौ वा एकता विद्यते तदेव गृहं, स एव समाजः, सैव च जातिरभ्युदयशालिनी वर्त्तते। अत्रास्माकं—शासिका अङ्ग्रेजजातिरेवोदाहरणम्। इयं जातिरेकतयैव जगति सर्वापेक्षया गौरवस्योच्चं स्थानमासाद्य राज्यं विस्तारयन्ती स्वामेकतां तत्समेधितां क्षमतां च प्रत्याययति। इयम् अङ्ग्रेजजातिर्यत्र कार्यं करं व्यापारयति, सर्वत्र तत्र स्वदेशस्य गौरवरक्षार्थं प्रस्तुता तिष्ठति। स्वदेशगौरवरक्षार्थं स्वानसूनपि विस्रष्टुं सदा सज्जा तिष्ठति।

५—एकताया एतादृशो महिमा, ईदृशं चेदं रत्नं, परं खेदस्यायं विषयो यदस्माकं देशो नेत्रयोः पुरतो बहूनि तदुदाहरणानि पश्यन्नपि न पश्यति, चकितहरिणशावनयनतुलित मक्षियुगलं दधानोऽपि एकताया अभावेऽहरहर्भवन्तीमात्मनोऽधोगतिं न वीक्षते। भगवान् अतिशीघ्रमस्माकमपि देशे एकतामुद्भावयतु।

---

(६) आवश्यकताऽऽविष्काराणां जननी भवति।

१ परिचयः, २ आविष्काराणां क्रमः, ३ वाह्यावश्यकतानामिव मानसिकावश्यकतानामपि आविष्कारे सहायता, ४ उपसंहारः।

१—यानि वस्तूनि स्वप्नेऽपि नानुभूतानि, येषां स्वरूपस्य कल्पनापि मानसं नावगाहतेस्म। यदि प्रकृत्या तेषामावश्यकता कस्यापि कृते

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रसूयते तानि वस्तूनि निर्मातुं स प्रवर्त्तते, अयमेवार्थो विवेच्यतया शीर्ष-स्थाने लिखितस्यास्य प्रबन्धविषयस्य। यदि वयं पुरातनयुगेतिहासेषु दृष्टिं क्षिपामः—यदा सभ्यता प्रारम्भोऽपि नासीत्, आविष्कारा आवश्यकतयैव प्रसूता इदं स्पष्टमवगच्छामः। तस्मिन् समये मनुष्याः पशुवद् वर्त्तन्तेस्म, पत्रेषु भुञ्जतेस्म, वस्त्राणामुपयोगं नाज्ञासिषुः, वृक्षशाखासु कुशकाशादिसङ्कुलायां वा धरायामशयिषत। तेऽस्त्राणामुपयोगं वह्निकार्यं च नाविदन्। परमयं समयोऽपगतः, क्रमशस्त एव मानवा शीतातपवात्याभ्यः स्वं गोपायितुं गृहस्यावश्यकतामनुभवितुमारभन्त, ततश्च गृहनिर्माणप्रक्रियामुदभावयन्, एवं वस्त्राणां स्थाने पशूनां चर्माणि समुपायुञ्जत। यदा च मनुष्याः परेभ्यः स्वस्य रक्षाया आवश्यकतां मनसि विविदुः भोजनार्थं पशूनां मांसं चापेक्षितवन्तस्तदनन्तरं प्रस्तरखण्डानि तेष्वेव सङ्घृष्य नानाविधानि शस्त्राण्यस्त्राणि च निरमायिषु यैं भेदनच्छेदनादिकार्यं सुकरं समपाद्यत। कतिचिद्वत्सराणि चाममांसमश्नतां तेषां जात मुखवैरस्ये ते पाकक्रियाया आवश्यकतां भिरधारयन् यतस्ते पाकप्रक्रियामनुसमधिषत।

२—उपर्युक्ताद्विवरणादिदमवधार्यते यदतिभूमिङ्गताऽऽवश्यकता, नान्तरीयकता, किमपि वस्तु बलादिवाविष्कारयति। एवं हि वस्तुस्थितिः—कोपि किमपि वस्तु विना कस्यांचित् कठिनायां स्थितौ पतति, नचोपलभते प्रतिकारपथम्, विमनायते च तदनुपलब्ध्या, ततः कञ्चनोपायं तत्प्रतीकारस्य सर्वात्मना चिन्तयति लभते च तदुपाया एवाविष्कारस्वरूपतया परिणमन्ते। यदि मनुष्यः कश्चित् सर्वमपि मनोऽभिलषितं वस्तु सद्य एवाधिगच्छेत्, न प्रतिबद्धमनोरथतया खिद्येत, किमर्थं स व्याप्रियेत चेतसि, कुतश्च निर्गच्छेयुर्नवाः पदार्थाः। परमत्र प्रतिक्षणं नूतनतामर्थयमाने जगति केवलं भोजनेनाच्छादनेनैव च मानवस्य तृष्णा नोपशाम्यति, स किमप्यन्यदपि कामयते, तदर्थमपि तस्य बुद्धिर्व्याप्रियते ततोपि च बहव आविष्कारा जन्म लभन्ते।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

३—अत्र जगति बहव ईदृशा अपि सन्ति पदार्था येषामाविष्कारो नावश्यकतापारवश्यकृतः, यथा वाष्पशक्तिविद्युदादिकाः पदार्थाः, तानन्तरापि मनुष्याणां जोवनं न प्रत्यबध्यत, भोजनादिकमेव वा न न्यरुध्यत, एवं च आविष्कारा आवश्यकताभिरेव जन्यन्त इति रिक्तं वच इति ब्रुवतः प्रति वक्तव्यं यत् मानवानामावश्यकता न केवलं काथिक्य एव भवन्ति, ते मानसिकभोजनं लब्धुं प्रयतन्ते जातेऽपि जीवनधारणोपाये। मानसिकं तद्भोजनं च तदीयाविरतबुद्धिव्यापारप्रभावेण समुपतिष्ठते, यदा च तेषामन्तरङ्गाणि मानसिकखाद्यान्वेषणाय व्याप्रियन्ते, तदाऽऽविष्कारा जन्म गृह्णन्ति, शब्दप्रसारणयन्त्रम्, वायुयानम्, तडित्पत्रम्, इत्यादय एवंप्रकारा एव।

एवं हि श्रूयते कुत्रापि पर्वतशिखरे समासीन एकः काकः पिपासाक्षामकण्ठो भूमौ विवरे जलमपश्यत्, पर्वतशिखराच्च भुवमवततार परं भुवि समवतीर्णस्यापि तस्य विवरस्थं जलं पातुं शक्तिर्नाभवत्। पिपासया पीडितश्च स इतस्ततः पश्यन्नपि किमपि वर्त्म नाद्राक्षीत्। जलं विना शुष्यदाननविलस्य तस्य मनस्येक उपायः स्फुरतिस्म। तत्र वर्त्तमानानि लघूनि प्रस्तरखण्डानि चञ्चुपुटेनादायादाय विले क्षेप्तुमारभत, तेन विले भृते तत्रत्यं जलं बहिरभवत्, स काकः स्वां पिपासां शमितवान्। दृश्यतामत्र कथायामाविष्कारः कथमावश्यकतया बाधितेन काकेन व्यधीयत। यदि पक्षिष्वेवं—का कथा पुरुषाणाम्?। 'थौमस एडिसन' महोदयः कियतांशेन बधिरोऽतः शब्दव्यापारान्वेषणे प्रवृत्तश्चासीत्, अनुसन्धानप्रवृत्तेनैव च तेन 'फोनोग्राफ' नामकं यन्त्रमाविष्कृतं यदधुना प्रतिपल्लि लब्धसञ्चारम्। अस्माकमेव देशस्यालङ्कारः श्रीमान् इन्दुमाधवमलिकमहोदयः स्वयं प्रवाहिकया पीडित आसीत्, स सुपचं भोजनं पक्तुं प्रकारमनुसन्दधान एकं यन्त्रमाविष्कृतवान् यदधुना जनाः 'कुकर'नाम्ना व्यवहरन्ति।

४—एतावता समर्थितं साधु तथ्यमिदं यद् यदा कापि परमावश्य

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कता पुमांसं व्याकुलयति तदा तदीया मतिर्न विश्राम मधिगच्छति अविश्रान्तं व्याप्रियमाणा च सा मतिः सुप्तां स्वां शक्तिमुद्बोधयति, तत्प्रभावेणैव चाऽलसाः सव्यापाराः, दुर्बला बलवन्तः, अविचारका विचारचतुराश्च सम्पद्यन्ते। जगतः सर्वोऽपि व्यापार आवश्यकताप्रसूत एव। यद्यावश्यकता दिनानुदिनं नैधेत, यथावस्थितमिदं जगत् पदमपि पुरतो न स्पन्देत। प्रतिदिनं वर्द्धमाना जनसंख्याऽऽवश्यकतां वर्द्धयन्तो संहारकराण्यस्त्राण्यपि समुत्पादयति। अतः साधुसमर्थितमिदं—

"यदाविष्कारा आवश्यकतया जन्यन्त" इति।

(७) व्यापारः

१ परिचयः, २ व्यापाराल्लाभः, ३ हानिः, ४ उपसंहारः।

१—एकस्य स्थानस्य देशस्य वा वस्तु स्थानान्तरे देशान्तरे चोपयोगार्थं क्रीत्वा नीयते यत्स व्यापारः। एवमेव स्वयमुत्पादितस्य क्रीतस्य वा वस्तुनः परकीयं धनमादाय विक्रयोपि व्यापारः। तत्र प्रथमः क्रेतुर्व्यापारोऽपरश्चोत्पाद्य क्रीत्वा विक्रेतुः। देशस्य स्थितेर्भेदात् किञ्चिद्वस्तु कुत्रचिदावश्यकताया अधिकमुत्पद्यते किञ्चिदत्यपेक्षितमप्यत्यल्पम्। यथाऽस्माकमेव देशे पञ्चनदप्रान्ते गोधूमस्याधिक्यम्, वङ्गप्रान्ते च तण्डुलस्य। एवं पञ्चनदप्रान्ते तण्डुलानां न्यूनता वङ्गाले च गोधूमस्य। परमावश्यकतोभयत्रापि द्वयोरपि वस्तुनोर्भवत्येव। तेन वङ्गालप्रान्तः पञ्चनदप्रान्ताद्गोधूममानयति, पञ्चनदप्रान्तश्च वङ्गालतस्तण्डुलान्।

एकतः स्थानादानयनम्—"आयातम्" निर्गमश्च "निर्यातम्" कथयन्ति व्यापारविदः। एवञ्च द्वयम्—आयातम्, निर्यातञ्चेदं मिलित्वा 'व्यापारः' समभिधीयते। सम्प्रति कस्यापि देशस्य कार्यं व्यापारं विना चलत्येव नहि। यथा जीवनोपयोगिसर्वविधसामग्री सम्पन्नमपि भारतं क्रीडाविलाससामग्रीणां कृते देशान्तरस्य व्यापारं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वर्द्धयति। यदि रूसदेशे तैलमधिकमुत्पद्यते कार्पासं च नास्ति तदा तेन तैलं दत्त्वा कुतोऽपि देशात्कार्पासमासादनीयमेव। व्यापारः स्वेन प्रचारेण कस्यापि देशस्यांशे प्रकृत्यानुपहृतमपि वस्तु समर्पयति येन तस्यावश्यकता पूर्यते।

२—व्यापाराद्नानाप्रकारको लाभो भवति, कस्यापि देशस्य सम्पत्तिर्भौतिकी समुन्नतिश्चैकान्ततो व्यापारमेवाधारीकुरुते। "व्यापारे वसति लक्ष्मीः" इयं प्राचीना सूक्तिर्यमर्थमभिधत्ते नास्यांशतोऽपि सन्देहस्य पदम्। यदि वयं समृद्धेषु शक्तिशालिषु च "अमरीका" 'बृटेन' प्रभृतिदेशेषु दृष्टिं प्रक्षिपाम तदा स्फुटमिदं प्रत्येतुमवसरं लभेमहि यत् सर्वापि समृद्धिश्शक्तिश्चैषां व्यापारेणैव जनिता। ब्रिटिशजातीयाः पुरा व्यापारस्य कृत एव भारतं समायाताः। तस्मिन् काले तेषां व्यापारोऽपि लघुरेवासीत्। परं क्रमशो व्यापारमुन्नमयन्तस्ते तन्महिम्नैव नष्टशासनसूत्रस्यास्य देशस्य शासकाः समजायन्त। व्यापारेणैव 'अमरीका' देशो धनिकानां देशानां मूर्धन्यः समवर्त्तत। प्राचीनतमयुगे भारतमपि परदेशेषु व्यापारं प्रसार्य धनिकत्वमसादितवत्।

नकेवलं समृद्धिरेवैधते व्यापारेण, परं सभ्यताया अपि विकासे व्यापारेण साहायकमाचर्यते। यस्य देशस्य येन देशान्तरेण व्यापारसम्पर्को भवति तयोः परस्परं यातायातेन प्रवृत्तेन विचारस्य, व्यवहारस्य चादानप्रदानयोर्जातयोः सभ्यता समेधते।

व्यापारेण 'अकार्यकता' दूरीक्रियते, यस्य देशस्य व्यापारः समृद्धः स स्वीयं वस्तु प्रचुरया मात्रया परदेशेषु प्रेषयितुमिच्छति, प्रचुरवस्तुनिर्माणार्थं प्रचुरस्य जनसमूहस्य नियुक्तिरपेक्ष्यते, येन व्यर्थजीवनानामपि जनानां समयः सार्थकतां भजते। अन्येषु क्षेत्रेष्विवात्र क्षेत्रे वृत्तिसाङ्कर्यम् वृत्तिकार्कश्यं वा न भवति, यथायथा व्यापारपरा वर्द्धन्ते, देशः समृद्ध्यति, व्यापारान्तराणि च प्रसूयन्ते।

३—व्यापाराल्लाभा भूयांसो दर्शिताः, परं हानिरपि भवति ततः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

व्यापारेण धनवृद्धौ जातायां देशस्य विलासिताऽतिभूमिमृच्छति। यथा यथा भौतिकी वृद्धिर्भवति तथातथाऽऽध्यामिकी शक्तिरपचीयते। परं "विधातुर्हि सृष्टिरेव मधुरविधुरमिश्रा" अतो दोषाः सन्तीति कृत्वा व्यापारो न त्याज्यतामर्हति, नहि गावः सन्तोति यव नोप्यन्ते। अल्प-दोषो बहुगुणः पदार्थः सदा सदादरपात्रमेव भवति। अतः सर्वैराष्ट्रै-रात्मोन्नतये व्यापारः समेधनोयस्तेन विनोन्नतेरसम्भवात्। भगवान् भारतीयमपि व्यापारमुन्नमयतु।

(८) अनुशासनम्।

१ परिचयः, २ नानाक्षेत्रेष्वनुशासनस्यावश्यकता, ३ लाभाः, ४ उपसंहारः।

१—कस्यापि व्यवस्थितस्य नियमसमुदयस्य पालनमनुशासनमुच्यते, अथवा कस्यापि नियन्तृतया नियुक्तस्य वचसोऽनुवर्त्तनमनुशासनम्। एकमपि प्रश्नमकृत्वा तदनुवृत्तिः साधोयसोऽनुशासनस्य स्वरूपमवधार्यम्। कापि व्यवस्थिता संस्थाऽनुशासनं विना न प्रचलितुं पारयति। तद्विना तस्या गतिरतीव दुरन्ता जायते। यथा नावि नियताः कूपदण्डाः, चालनदारवः, प्रसार्यमाणवस्त्रप्रसारसङ्कोचरज्जवो वा यदि नियमपूर्वकं न चाल्येरन् मध्येसरिन्नौर्विपद्यते, तथैव ते ते पुरुषा यदि दलप्रधानमक्षरशो नानुवर्त्तेरन् कोऽपि समुदायः सफलप्रयासो न भवेत्। अस्माकं जोवनस्य सर्वास्वपि दशासु प्रकाममावश्यकमनुशासनं नाम। बाल्ये, यौवने, प्रौढ़त्वे, वार्द्धकेऽपि वाऽनुशासनमपेक्ष्यत एव। विद्यालये, गृहे, सार्वजनिकसंस्थासु विनादः कार्यं न चलति। बालको जातमात्र एवानुशासनं शिक्षणीयः। एतेन तस्य भाविजोवनं तस्मै महत्त्वमुपहरिष्यति।

एको बालो योऽनुशासनं न शिक्षितो निजमेव मनोगतं हितं मन्यमानो यथार्थतः स्वहितं न लभते। स यथेच्छमाचरन् अनर्थमुपैति। यो बालो नानुशासनं प्रापितो नासौ पित्रोराज्ञामनुवर्त्तते नवा मान्यानाद्रियते, केवलमभिमन्यते स्वं च भाविजोवनं विफलं कुरुते।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यस्मिन् गृहेऽनुशासनं नास्ति, कदाचिदपि तत्र शान्तिर्न पदं दधाति। तस्मिन् हि गृहे सर्वेऽपि जनाः प्रधानस्याज्ञामनादृत्य यथा—स्वेच्छं व्यवहरन्ति, तेन शान्तिः पलायते। शान्तावपसृतायां विवादाः, अविश्वासाः अथाव्यवस्थाश्च पदमादधते।

विद्यालयेऽपि महते फलाय कल्पतेऽनुशासनम्। विद्यार्थिनः सुव्यवस्थितस्यानुशासनस्य पात्रतां नेयाः, येन ते स्वगुरूनाद्रियेरन्, तेषामुपदेशाँश्चाशेषमनुसरेयुः। यावत्तेष्वनुशासनसँय्यमो नागच्छति तावत्ते शिक्षिता न मन्यन्ताम्। ते सर्वं शास्त्रमभ्यस्य सकलासु परीक्षासु साफल्यमासाद्यापि मनुष्यपदं तावन्न लब्धुमीशते यावद्दृढेनानुशासनेन सन्दानिता न जायेरन्। कापिचित्सार्वजनिकसंस्था विनानुशासनं न प्ररोहति, तत्सदस्याः कुतोऽपि तावन्न बिभ्यति यावदनुशासनभङ्गसम्भवात् दण्डात्। ये भारतीयकाङ्ग्रेसस्येतिहासं जानन्ति, वक्तुं शक्नुवन्ति ते, यद्यावत्कालपर्यन्तमस्यां संस्थायामनुशासनं नासीत् कीदृशा अनिष्टव्यवहारा अत्र क्रियन्तेस्म। अनुशासनयन्त्रितस्यास्य प्रतिष्ठानस्य बलं कया मात्रयाऽवर्द्धत, तन्न तिरोहितं चक्षुष्मताम्।

शासनसंस्थायाः कृते तु शस्त्रास्त्रेभ्योऽपि समधिकप्रयोजनीयमनुशासनम्। यदि शासनेऽनुशासनं न स्यात् सर्वमपि राष्ट्रं क्षणादेव विशृङ्खलतां यायात्। अनुशासनभङ्गसम्भवापराधभयादेव निम्ना अधिकारिणो स्वतः श्रेष्ठानामधिकारिणामाज्ञामविचिकित्सं पालयन्ति। यदीदं न स्यात्सर्वोऽपि स्वमेव सम्राजमुत्प्रेक्षमाणो निखिलान् नियमानेव शिथिलान् कुर्यादात्मनश्चेच्छया वर्त्तेत, येन राष्ट्रमेव विपद्येत। कीदृशोऽपि क्रमः शासनस्य कथं न भवतु, प्रतिनिधिशासनम्, एकराजवादः, स्वबलकृतं प्रातिनिध्यमाधारीकृत्य चलितं शासनम्, वैदेशिकं, स्वदेशसम्भवं वा शासनमस्तु, नानुशासनमन्तरा सिद्ध्यति साफल्यमिति हि भूतार्थव्याहृतिः।

युद्धेऽपि दृश्यते—अनुशासनशून्याऽल्पानुशासनावा बहुसङ्ख्याकापि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सेनाऽल्पसङ्ख्याकयापि सम्यगनुशासनशालिन्या सेनया पराजीयते। सेनायान्तु सैनिकास्सद्यो विपदं पुरः पश्यन्तोपि सेनापतेराज्ञयाऽग्रत एव प्रतिष्ठन्ते, न स्वं विचारं पुनरावर्त्तयन्ति चेतस्यपि। इदमुत्तमस्यानुशासनस्य निदर्शनम्।

३—एवं सञ्जातानुशासनाः सर्वत्रापि वर्त्मसु साफल्यं लभन्ते, जीवनं च फलवद् विदधते।

४—अतश्चज्ञायते यज्जीवने सफलतामानेतुमनुशासनमत्यपेक्षितं वस्तु। तेन सर्वैरपि स्वहितमर्थयमानैरनुशासनेनात्मा नियमनीयः। अनुशासनं सौवर्णी शृङ्खला, सा मलमपि जनयति स्वाधिष्ठिते भागे, परमियं तमपि दोषं न स्पृशति। परमात्मा सर्वानपि भारतीयान् साध्वनुशासनयन्त्रितान् विदधातु।

---

(९) 'न संशयमनारुह्य नरो भद्राणि पश्यति'

१ अभिप्रायः, २ सन्दिग्धे पदन्यासस्यावश्यकता, ३ सन्देहे सत्यप्रवृत्ते र्हानयः, ४ उपसंहारः।

१—प्रबन्धविषयतामायातेयं भगवतोसूक्तिः सूचयति यत् कोपि पुरुषः किमपि तावन्न लभते यावदात्मानं सन्दिग्धे पदमाधातुं न प्रेरयति न वा जीवने कमप्युदयमासादयति। यदि जीवनयात्रामात्रप्रयोजनानि कर्माण्येव कुर्वन् स्थास्यति, साफल्यमपि तं दूरतः परिहरिष्यति। मानसिकशान्तिभङ्गं भाविनमुत्प्रेक्ष्य नवे संशयितसाफल्ये च वर्त्मनि पदमनिदधतां जनानां जीवनं महत्या समुन्नत्या कथं युज्यताम्। किमपि प्राधान्यप्रदं पदं, धनं, गौरवं वालिप्सुभिरवश्यं किञ्चित् साहसिक्यमनुष्ठेयम्। उत्साहसहायस्य सर्वा अपि बाधाः पङ्क्त्यां दलयत एव साफल्यलक्ष्मीरङ्कमाश्रयति सन्दिग्धे पद एव पदं निदधानो भाग्यानुकूल्ये सति समृद्ध्यति। यः संशयितसाफल्यं कर्म प्रारभते स त्वरया विलम्बेन वा साकल्येनांशतोऽपि वा फलमधिश्रयत्येव। दृश्यतां व्यापारे—सम्प्रति विक्रये शतं रूप्यकाणि लाभे सम्भवन्ति,

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

परं 'दशदिनानि स्थित्वा विक्रये द्विशतां रूप्यकाणां लाभे समायाति' अस्यां स्थितौ बुद्धिमान् जनो विलम्बत एव न त्वरते, परं विलम्बेन हानिरपि सम्भवति तदिदं सन्दिग्धं तत्र प्रवर्त्तमानो व्यापारादेव विरमेत् कुतस्तस्याभ्युदयवार्त्ता ?

२—जगति यावन्त आविष्काराः, वैज्ञानिकाश्चमत्काराः, अन्ये व प्रत्यक्षपरिचया आश्चर्यकरा व्यापाराः, ते सन्दिग्धे पदमादधानैरेव कृता दृश्यन्ते। यः प्रथमं 'वैलून' नामकं वस्तु प्रादुरभावयत्स यदि तत्प्रथमप्रदर्शनावसरे वियतोऽपतिष्यत् किं तस्य जीवितस्याभविष्यत्? किन्तेनेदं भयमननुमायैव प्रवृत्तम्? हिमालयशिखरपरिशोधप्रवृत्तानां वीराणां सङ्घो जीवनं करतले कृत्वैव तु पुरस्सरतिस्म। यदसम्भवं मत्वा साधारणैः पुरुषैः परित्यज्यते, तदेव कार्यं प्राणांस्तृणीकृत्य प्रयत्नमारभमाणेन केनचिद्धु धोरधौरेयेण साधयित्वा प्रदश्यते।

कुतोऽप्यपराधान्निगृहीतस्य कस्यापि सेनापतेः सर्वास्वपि पुनर्विचारप्रार्थनासु बन्ध्यतामुपगतासु तदीया दुहिता तदपराधस्य क्षमां कारयितुं राज्ञः समीपं गच्छामीति स्वपितरं प्रार्थयामास। महत्सु पुरुषेषु विफलेषु तस्मिन्नेव कार्यं स्वस्याः साफल्यमाशंसमानां स्वां दुहितरं स सेनापतिर्मुग्धां भावुकप्रवृत्तिकां चाभ्यधत्त। परं भाविनं राज्ञः कोपमपि न बहु मन्यमाना सा राजधानीं प्रति प्रतस्थे तत्र चानेकैरुपायैः स्वपितुस्तमपराधं क्षमाविषयं विधायैव परावृते। इयं रूसदेशस्य कथा। अत्रापि पश्यन्तु सचक्षुषः, यदि सा साहसावतारभूता ललना राज्ञो भयमुत्प्रेक्षमाणा राजधानीं नायास्यत्कथं साफल्यमध्यगमिष्यत्।

३—यः सन्देहे सति प्रवृत्तिं नावलम्बते, प्राणानां धनानां वा मोहेन सांशयिकं प्रयोजनं प्रति नाग्रेसरो भवति तेन किमपि श्रेयस्साधनं, युगपरिवर्त्तनक्षमं, सदादर्शभूतं वा कार्यं कर्त्तुं न प्रभूयते। जीवनं तदेव सार्थकं यत्र दोलाधिरोहणमिवानुभवति जनः। एकतः सिद्धिः परतश्च विनिपातः, यदि जीयते सुखं सुखम्, अथ विपद्यतेऽतलस्पर्शो

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विनिपातः। एतादृश एव जीवने महदभ्युदयपदं कार्यं कृतं भवति। निस्तरङ्गा जलाशया न समीपस्थमपि तटमाप्लावयितुं प्रभूभवन्ति। इदमत्रावधेयम्-संदेहे पदन्यासेन सिद्धिर्भवति, एतेन सर्पाणां शिरांसि पद्भ्यामाक्रमणीयानि, सिंहानां दन्ता गणनीयाः, समुद्रा वा बाहुभ्यां तरणीया इदं न मन्तव्यम्, विचारं कृत्वा-लाभं हानिं कृतिसाध्यतां नान्तरीयक्लेशातिरिक्तक्लेशराहित्यं, बलवदनिष्टाननुबन्धितां च समीक्ष्यैव कस्मिंश्चिदपि कर्मणि पदं निधेयम्। अविचार्य प्रवर्त्तमानः साहसी न कथ्यते नवा सिद्धिं समवाप्नोति, किन्तु स दुस्साहसी विपत्तिमेवासादयति।

४—अतः साहसेन सिद्धिरासादनीया, संदिग्धे साध्ये हिते कर्मणि सदा प्रवृत्तिराश्रयणीया। इदं न विस्मरणीयम् यत्-"वीरभोग्या वसुन्धरा" इति। वीरश्च न कायिकपराक्रमेण भवति, किन्तु मानसिकेन साहसेनैव वीरो भवति, अस्यां स्थितौ स्वहितं कामयमानैर्वीरता समाश्रयणीया।

---

(१०) वीरता।

१ वीरतापरिभाषा, २ अत्र विशेषाः, ३ अस्या आवश्यकता तथोपयोगाः, ४ उदाहरणानि, ५ उपसंहारः॥

१—वीरतोत्साहस्यैवातिभूमिं गतस्य नामान्तरम्, अथवोत्साह एव प्रकर्षं साधीयस्त्वं च गतो वीरतेत्युच्यते, वीरतायां स्वार्थस्य मात्रयापि स्पर्शो न भवति वीरो भाविनः प्रशंसनस्य प्राप्तेः पारितोषिकस्य वा समीहया न वीरतायै सन्नह्यति, स यत्करोति तत्पीडितायाः प्राणिजातेरुपकारायैव। तदीयामापदमपाकर्त्तुं केवलं तस्य प्रवृत्तिर्भवति। लोकास्सामान्यतो यत्कार्यमसम्भवं पौरुषातिशायि वा मन्यन्ते वीरास्तदेव कार्यं विधातुमात्मानं संशये निमज्जयन्ति। वीरता कदाचिदसत्यं, न्यायस्यापमानं च न सहते।

२—वास्तविका वीरा न्यायस्य पदध्वनिं परिचिन्वन्ति, सत्यन्याय-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पक्षपातितया ते कदाचिदपि नीचमनुचितं च व्यवहारं नाद्रियन्ते नच स्वयमाचरन्ति। कापि विभीषिका कापिचित् पीड़ा वा न तान् पथश्च्यावयितुमीष्टे। ते तमेव मार्गमनुसरन्ति यं सत्यं सुविचारं शुद्धं च विश्वसन्ति। इदमेकं कारणं वीरपूजाप्रचारस्य यत् ते स्वीयपरकीयविभागं मनस्यपि नानयन्ति। हेतुनानेनैव ग्रीकदेशीया वीरं परमात्मनः स्वरूपं मन्यन्ते।

३—वीरता केवलं युद्धक्षेत्रेऽस्त्रप्रयोगकुशलतया स्वप्रतिपक्षान् प्रतिक्षिपतामेव धर्मो नेदं विचारसहम्। इयं सर्वविधमपि क्षेत्रं स्वीकृतवद्भिः प्रदर्शयितुं कल्प्यते। वास्तविकेऽर्थे मनुष्यपदव्यवहार्यतां कामयमाना नीचं कुत्सितं च जीवनं यापयितुमनीहमाना आदरपात्रतां प्रार्थयमानाश्च पुरुषाः कुत्रापि क्षेत्रे वीरतामामन्त्रयितुं क्षमन्ते, अत एव दानवीर-दयावीर-युद्धवीर-प्रभृतयो भेदा अस्याः प्रचलिताः, नैतावदेव, किन्तु विद्यावीरनामकोऽप्यस्य भेदः प्रचलितः। एतैश्च प्रभेदप्रचारैरस्य भावस्य सर्वतोमुखता प्रदर्शिता भवति। अस्माकं जीवनं न केवलं भुक्त्वाऽन्नपाचनमात्रमुद्दिश्य कृतं—किन्तु वयं मनुष्याः किमपि विशिष्टं कर्म कर्तुमेव समासादितजन्मानः, तच्च विशिष्टं कर्म वीरतयैव जायते। वीरतां विनाऽन्याया न प्रतिरुध्यन्ते, असत्यं न सत्यभावं प्राप्यते, अनुचितं नौचितीं नीयते न वा कर्मैव किमपि साध्वनुष्ठीयते।

४—महात्मा शुकरातो यत्सत्यमवगतवान् तस्य प्रचारे कारावासं, नानाविधमुत्पीड़नं, परतः प्राणत्यागमपि मृष्टवान्, परं तस्य सत्यस्य मिथ्यात्वं न प्राचारयत्, अयं वास्तविको वीर आसीत्, किञ्च प्रह्लादो यं धर्ममात्मनो हितममन्यत, तस्य कृते पयसि प्रक्षेपं, धराधरशिखरादधः पातनं, कुपितफणिफणामण्डलोपवेशनं, हुताशनप्रवेशं चासहत। एतादृश एव वीरो वीरः कथ्यते। इयं पुराणी कथाद्वयी। आधुनिकेष्वपि नरेषु महात्मगान्धिप्रभृतयो वीराः पुरुषाः सन्ति, ते देशं स्वतन्त्रयितुं कृतनिश्चयाः। न कस्यापि पारितोषिकस्याशया ते तथा निश्चितवन्तः, किन्तु भवन्तमन्यायं निरोद्धुमेव तेषामयं क्रमः। ते स्वा-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भिमतसिद्धये, सत्यामावश्यकतायां प्राणानपि समुत्स्रष्टुमीशाः, कष्टं यच्चे सहन्ते न तत्र प्रकाशस्यावश्यकता। यथाकालं तपसस्तेषामस्य फलं प्रत्यर्पणीयमेव दैवेन। तेषामयमसहयोगो जगतः सर्वाधिकबल-शालिन्याः शक्तेः प्रतिरोधे व्यापृतोऽस्ति, चिरायास्य शक्तिः तदीयां शक्तिं नमयिष्यतीति हि तेषां दृढो विश्वासः। वीराणां हि स्वभावोऽकृतक एतादृशो भवति यच्चे नैतत् पश्यन्ति कत्यस्मान् अनुयान्तीति, ते हि स्वसिद्धान्तेषु तथा विश्वसन्ति येन तेषां हृदि विश्वासो भवति यत्तदीयं मतं सम्प्रति परतो वा जगतानुसरणीयमेव अत एव च ते किमपि कष्टमपि न गणयन्ति, उद्देश्यांशे कृतनिश्चयतया तद्व्याघातांशेषु सर्वथानादरात्। तदुक्तम्—

"को वीरस्य मनस्विनः स्वविषयः को वा विदेशः स्मृतो
यं देशं श्रयते तमेव कुरुते बाहुप्रतापार्जितम् ॥" इति।

५—ईदृशीयं वीरता यथा सर्वानस्मानाश्रयेत् तथा प्रयतनीयमस्माभिरेवं सति धरातलमिदं स्वर्गत्वमुपैष्यति। नचेदमतिदुर्गमं वर्त्म केवलं सत्यस्यानुसरणं, विरमणमन्यायात्, स्वार्थराशेश्च विसर्जनम् ईश्वरे विश्वसितं च वीरतया योजयिष्यत्यस्मान्। भगवान् सर्वानपि भारतीयान्नो वीरतया सँय्युनक्तु यथा वयं मनुष्या जायेमहि।

(११) "नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण"

१ प्रस्तावना, २ कतिचिदुदाहरणानि, ३ उपसंहारः।

१—कस्यापि दशा सदा समाना न तिष्ठति, यस्योत्कर्षोऽधुनोन्नति-शिखरमारूढस्स एव श्वः अपकर्षगर्त्ते पतन् दृश्यते, अथ सम्प्रत्यधोगतेरन्धकूपे यः पतितोऽवलोक्यते स एव परश्वः पुरः प्रतिष्ठमानः प्रेक्षिष्यते। योऽधुना समुदयसमुद्रे तरति स एव श्वः पतनमरुषु म्रियमाणदशामनुभवन् दृश्यते। योऽद्य हताशः श्वसिति स एव श्वः सदाशाभिः प्रसीदति। अतः परिवर्त्तनशीलमिदं विश्वम्। एतेन यस्य

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

दशा सम्प्रति नोचा तेन नियमकृते परिवर्त्तने कदाचिदुपरि गन्तव्यम्। तमेवार्थमुपादाय सूक्तिरियमुपनिबद्धा।

२—इतिहासा अस्य तथ्यस्य साक्षिणः सन्ति, ते प्रतिपादयन्ति केन प्रकारेण समयः कञ्चनदेशं, काञ्चिज्जातिं, कमपि पुमांसं वा नर्त्तयतीति। प्राचीने काले—यूनानदेशः, रोमदेशश्चोन्नतिशिखरमारूढ़ावास्ताम्। सम्पूर्णं जगदनयोर्गौरवं नतेन मूर्ध्ना स्वीचक्रे। अनयोः शासनपद्धति, नीतिः, ज्ञानं विज्ञानं च संसारे समाद्रियन्त। यूनानः सुकरात 'प्लैटो' 'अरस्तू' प्रभृतीन् महापुरुषानुत्पाद्यात्मानं कृतार्थयामास। परं सम्प्रति—तयोरेव देशयोः कापि प्रतिष्ठा नास्ति, तेषां भाग्यसूर्यश्चिरं धरित्रीं प्रकाश्यास्तमितो वर्त्तते।

ये च जापान, जर्मन, रूस, ब्रिटेन, प्रभृतयो देशाः पुरा न बहुमन्यन्त, ये केवलमुदरपूरणमात्रार्थं व्यवसायं मत्स्यव्यापारं च कृत्वा जीवनं यापयन्तिस्म, तेषामेव सर्वत्र समादरः समवलोक्यते, प्रतिष्ठा च विधीयते।

किञ्च प्राचि समये यस्या हिन्दुजातेः कीर्त्तिपताका सर्वत्र धूयतेस्म, या हिन्दुजातिः सर्वाधिकसभ्यतायाः पात्रमासीत्, यस्या ज्ञानं सर्वतः प्रबलं प्रसृतं च स्वीक्रियतेस्म, यस्याः समृद्धिः सीमानमत्यशेत, यस्या जातेः सन्ततयोऽतिप्रतिभाभाजो महात्मानः, संसारं स्वतेजसाऽवभ्राजन्, सा जातिरधुना कान्दशामवलम्बते। आन्तरिकप्रभावरहितेयं जातिः सर्वतः कान्दशीकतां भजते। इयं जातिः कदाचिज्जगतो मुकुटमणिरासीत् सैवेयं सम्प्रति विदेशिनां मुखानि पश्यति। पुरा यादृशमस्या उत्थानमभवत्तादृशमेवाधुना पतनम्। इयं सम्प्रति वैदेशिकानां सभ्यतामवलम्बितुं प्रयतमाना तत्तालैरेव नृत्यति। वयमेतदङ्गभूताः प्राचीनानि वस्तूनि घृणया पश्यामः, मातृभाषामवमन्यमाना आङ्ग्लभाषामाद्रियामहे परस्परमपि मातृभाषया व्यवहारे लज्जामहे, आङ्ग्लभाषां शिक्षाया माध्यमतया ग्रहीतुमुत्सहामहे विदेशीयां रीतिमात्मनो भवनेषु पुरस्कुर्महे, सर्वतो भारतीयां संस्कृतिञ्चावमन्या-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

महे ।-एतावतैवास्माकं हीनतमाया दशायाः परिचयो लब्धुं शक्यते ।

सम्प्रति अङ्ग्रेजजातेरुत्कर्षस्य समयो विद्यते । कतिपयभूखण्डान्यस्या आधोन्येसन्ति । अस्या विद्याबुद्धिबलानि सुखसम्पदश्चानुदिनमेधन्ते । यदेकमाध्यात्मिकतानिष्ठानामकं वस्तु नास्ति तदेते पाश्चात्या अलसानां व्यवसायं ब्रुवाणा नैव सम्मन्यन्ते । अस्मिन् भौतिकतावादस्य समृद्धेर्युगे को नाम पाश्चात्यसभ्यतयानुप्राणितो जन आध्यात्मिकभावनां प्रशंसेदपि का कथा पुनस्तदनुकूलव्यवहारपरायणतायाः ? परमस्या एवाङ्ग्रेजजातेः कदाचिन्नामापि न जानन्तिस्म जनाः । अधुनेव पुरापि सभ्यतया समृद्धभावेन बुद्धिगौरवेण नानादेशप्रभुत्वेन वा नाद्रियतेयं जातिः । केवलं व्यापारं जीविकोपायमवलम्ब्य नाल्पेषु देशेषु भ्रमन्ती कथञ्चिदहानि यापयन्तीयं कुत्रापि पृथ्वीकोणे शर्वासितिस्म ।

अयमेव वृद्धिह्रासक्रमो व्यक्तिविशेषाणामपि जीवने दृश्यते—राज्ञो हरिश्चन्द्रस्य कथां को भारतीयस्वाभिमानी न श्रुतवान् स्यात् । आपूर्वापरसागरं हिमवतश्चासेतुबन्धं धराचक्रं शासदपि समयपरिवर्त्तनमहिम्ना श्वपचस्य सेवयाऽऽत्मानं कदर्थयन् श्मशानवासक्लेशमपि सोढुं बाध्यतेस्म, नैतावदेव-परं प्राणेभ्योपि प्रियतमौ पत्नीतनयौ विक्रेतुमप्यवसरमलभत । इतः परं या घटना तज्जीवने जाता लमिह तामुल्लिख्य । आस्तां वेयं पुराणी कथा, साम्प्रतिकेपि युगे भाग्यचक्रपरिवर्त्तनस्य अनेके दृष्टान्ताः प्रत्यहमीक्ष्यन्ते । न चिरव्यतीताऽष्टम-एड्वर्ड" महोदयस्य कथा—योऽद्यैव प्रातः साम्राज्यं भुञ्जानो मध्याह्ने प्रजाभावमभजत । तदनुजन्मा च प्रभाते प्रजाभावेन त्यक्तशय्यः सायं साम्राज्याधिष्ठातृभावेन शिश्ये ।

इंग्लैण्डस्य भूतपूर्वः प्रधानमन्त्री रैमजे मैकडोनल्डमहोदयो जीवनस्य प्रभाते सामान्यभृत्य आसीत् स शयनीयं स्थानमपि नाध्यगमत् । एभिश्च दृष्टान्तैः साधुसमर्थितमिदं यत्—

"कस्यात्यन्तं सुखमुपनतं दुःखमेकान्ततो वा" इति ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

न केवलं मानवसृष्टेरेवेयं दशा, पशुपक्ष्यादिलतावृक्षादिसृष्टौ सम्यक्तं परिवर्त्तनं दृश्यते, पशवोऽपि कालविशेषेण शोकहर्षयोरवसरं लभन्ते। वृक्षा ये वसन्ते हरितहरितैः पत्रैः प्रकामरमणीया दृश्यन्ते त एव शिशिरे शातितपत्रतया त्रपमाणा इव जायन्ते। सूर्याचन्द्रमसावपि समयमहिम्नोदयमस्तमयं च लभेते। "कालक्रमेण जगतः परिवर्त्तमाना चक्रारपङ्क्तिरिव गच्छति भाग्यपङ्क्तिः" धन्योऽसि भगवन् काल! शतं तुभ्यन्नमः॥

---

(१२) अतिपरिचयादवज्ञा।

१ अवतारणा, २ व्यवधानेन भयमादरः स्नेहश्च वर्द्धते, ३ स्वभावतः सुलभं वस्तु बहूपयुज्यते निन्द्यते च, ४ उपसंहारः॥

१—इयं सूक्तिः स्वव्याख्याकाले कथामेकामपेक्षते, साचेत्थम्—एकस्मिन् वने शृगाल एकः प्रतिवसतिस्म, कदाचिदपि कोऽपि सिंहस्तस्य दृशोर्गोचरतां नायासीत्, स भाग्यवशाद् वने विचरन् क्रूराकृतिं सिंहमेकमपश्यत्। तं पश्यत एव तस्य प्राणाः कण्ठदेशमायाताः पुनः पुनर्बहिर्गन्तुं प्रयासं प्रारभन्त, भीतश्चासौ कथञ्चित् सहायैरन्यत्रानीयत, गते बहुतिथे काले पुनरसौ तमेव सिंहमपश्यत्, अस्मिंश्च द्वितीयदर्शने तस्य साहसं कियतांशेनावर्द्धत स तं दृष्ट्वा मनस्यभैषात्, परं पलायितुं नाचेष्टत। व्यतिगतः सोऽपि समयः। ततः स सिंहः क्वचिदन्यत्रायासीत्। अथ पुनरेकदा तस्यैव शृगालस्य तेनैव सिंहेन सहाजायत साक्षात्कारः, अस्मिंश्च तृतीयदर्शने शृगालोऽनाकम्पत, न वा कण्ठगतप्राणतामयासीत्, परं प्ररूढेन साहसेन-त्वं कथमसीति प्रष्टुमुदयच्छत्। भूयो भूयो दृष्टसिंहस्य तस्य शृगालस्य हृदयाद्भयमपगतं, नैतच्छृगालविषय एव, सर्वेष्वपि स्थलेष्वेतत्साधारण्येव स्थितिर्भवति, तेन सततमालोक्यमानस्य वस्तुनो मूल्यमपचीयत इति निर्णीयते, तदाधारैव चेयं सूक्तिः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

२—व्यवधानेन दूरीभावेन, भय, मादरः, प्रशंसा च मनस्युक्ष्यते। सततसहवासश्चानादरं जनयन् सर्वमपि प्राञ्चं भावं विपर्यासयति। वयं यदा कस्यापि दूरस्थस्य पुंसो गुणानाकर्णयामस्तदा तस्य विषये महतीमुत्कण्ठां मनस्याकलयामः—कीदृशोऽसौ महाशय इति। जाते तु भूयोदर्शने तेन सहवासे च तस्य दोषा अपि दृष्टिवर्त्मन्यवतरन्तो महाशयं तं ततः पदादधो नयन्ति। एका मुद्रिका दूरतो दृश्यमाना मनो मोहयति, तां करे परिधातुमात्मोत्कण्ठते परिहितायां च तस्यां तदुपादाने हिरण्ये तन्निर्माणप्रकारे च समुन्मिषन्तो दोषास्तां पूर्वतनात् पदाद् भ्रंशयन्ति। का वा वराकी मुद्रिका? प्रयागं कदाप्यगतवतश्चेतास्त्रिकालत्रिवेणीस्नानमिच्छति, तत्र गतस्य द्वित्राण्येवाहानि तथा कुर्वतश्च तस्य ततश्चेतो विरज्यति, प्रातःस्नानमात्रमवशिष्यते, कियता च कालेन दृष्टदूरत्वादितद्दोषः कूपस्नायितामप्यवलम्बते। तथाचोक्तमपि—"लोकः प्रयागवासी कूपे स्नानं समाचरति" इति।

३—मनुष्याणामेतादृशः स्वभावो भवति, यत्ते दुर्लभं विषयमादरेण सुलभं च पदार्थजातमनादरेण निरीक्षन्ते, सुलभता दुर्लभते एव वस्तुमात्रस्य मूल्यं ह्रासं वृद्धिं च लम्भयत इति कथा न प्रेक्षावतां कृते दुरूहा।

इतिहासविदो जानन्ति, प्रथमजेम्समहोदयोनिजेन सकलसाधारणजनतया सहाचरितेन सरलेन व्यवहारेणैव समग्रस्य 'इङ्गलैण्ड' देशस्योपहासस्य भाजनं जातः। तेषामिङ्ग्लेण्डवासिनां निन्दायास्स तथा पात्रमभवत्, यथा लोकास्तेन सह वार्त्ताऽऽलापेऽपि त्रपन्तेस्म। अन्यदपि दृश्यताम्—मधु मधुरं स्वादिष्टं, पथ्यञ्च, परं तदेवाधिकया मात्रयोपयुक्तं वमनं प्रयोजति, समधिकारुचिकृतं विरागं जनयति, पित्तसम्भवान् आमयांश्च भावयति।

४—ये साम्प्रतिकलोकाचारं परिचिन्वन्ति ते तु सुखवसातुमीशते यत् सततसहस्थितिरतिपरिचयश्चावज्ञां प्रवर्त्तयत्येव। अत एव

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

चेहयुगे गौरवास्पदे शासनसम्बन्धिनि पदे नियुज्यमानाः स्वं लोकेभ्यो गोपायित्वार्चितुमपि भवन्तो यतेरन्नित्यादेशमपि स्वाधिकारिभ्योऽधिगच्छन्ति, तं पालयन्ति, ततः प्रशस्यन्ते, पदोन्नतिं चाप्नुवन्ति, तदन्यथाचरणे विनिपतन्ति। किञ्चातिसुलभे जने किमित्यादरो वर्द्धताम्? आदरो हि तस्य बहुमूल्यतया प्रसूयते, सा च तत्र नास्ति। अतिपरिचयश्च सुलभतां विश्वासयति। अत एव च स्वकर्मभूमौ साधारणतया गण्यमानोऽपि जनस्तस्यामेव योग्यतायां स्थितौ च देशान्तरं गतः निजगौरवं प्रदर्श्य तत्रत्यजनताकृतादरभरेण युज्यते। ईदृशि स्थितौ सत्यमिदमुक्तम्—

"अतिपरिचयादवज्ञा सन्ततगमनादनादरो भवति।
मलये भिल्लपुरन्ध्री चन्दनतरुकाष्ठमिन्धनं कुरुते"॥

---

(१३) सत्यवादिता।

१ परिभाषा, २ सत्यं समाजस्याधारः, ३ दृष्टान्ताः, ४ असत्ये भयम्, ५ उपसंहारः।

१—सते-कल्याणाय हितं सत्यम्, सत्यं हि नाम-यद्यथा ज्ञायते तथा-तदभिधानमुच्यते, वयमीश्वरेण जिह्वाप्रदानेनानुगृहीताः, जिह्वया च सत्येऽभिधीयमाने परमेशितुः प्रसादः प्राप्यते, असत्ये तूक्ते तत्कोपभाजनत्वं सम्भाव्यते, यथा पित्रा दत्तेन खड्गेन दुर्बलान् रक्षन् पितुः प्रीतेः पात्रं जायते, तेनैव चावध्यान् जिघांसन् तद्भृशघृणाया आस्पदत्वं प्रपद्यते, तद्वत्। ईश्वरो यथाऽसत्यादुद्विजते न तथाऽन्येभ्यो दोषेभ्यः। वाग् हि परमात्मनो दानेषु श्रेष्ठतमा, सा यथा न दोषेण व्यवकीर्यते तथा प्रयतनीयमस्माभिः॥

२—अथान्यथा दृक्पातेनेदमवगम्यते यदस्य समाजस्य मूलभूता भित्तिरपि सत्यमेव। समस्तमपि जगदत्रैव नियन्त्रितव्यवहारम्। सत्यं विना जनाः परस्परं व्यवहर्त्तुं न शक्नुवन्ति, सर्वेऽपि व्यापारा विश्वासमाश्रयन्ति मूलं, स च सत्यादृते न शक्यसमुत्पत्तिः। संशयितसक-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

लवाचो हि समाजस्य किमपि कार्यमसम्भवप्रभवम् । कस्यापि वस्तुनः क्रयविक्रयौ सर्वत्रासत्ये सत्येकपद एव विपद्येयाताम् । अतोऽस्माभिः समाजस्य, यं विना वयमेकान्ततोऽसभ्यागण्येमहि, न चिरं प्राणितुमप्युत्सहेमहि, प्रतिपदं च विपद्येमहि, रक्षायै सत्यस्योपयोगोमाननीयः।

३—अस्माकं पूर्वजाः सत्यं बह्वाद्रियन्त, ते सत्यं पालयितुं प्रियादपि प्रियतरं पदार्थं प्रयासमवलम्ब्य पर्यत्यजन्, परं सत्यान्नाच्यवन्त - श्रूयते हि युधिष्ठिरः सत्यवादी, स विपद्यपि सत्यं नाहासीत् । हरिश्चन्द्रस्य सत्यव्यवहारस्तु सर्वविदित एव, यो निखिलं सुखं, राज्यं प्राणेभ्योऽपि प्रियां वनितां, लोचनेभ्योऽपि प्रचुरप्रमोदप्रदं पुत्रं परित्यज्य चाण्डालसेवामङ्गीकृत्यापि सत्यं नाहासीत् । असत्यमन्याभिसन्धानेनोच्यमानमपि पातयति प्रयोक्तारं–यथा द्रोणवधप्रयोजकाश्वत्थाममृत्युवृत्तान्तो गजपरकतयोच्यमानोऽपि युधिष्ठिरेण नरकमदर्शयत् । एकमपि प्राचीनं सत्यवादिनां निदर्शनं प्रमापयत्यस्य सत्यस्य माहात्म्यम्, दृश्यतां महाराजो दशरथः स्वप्रियायाः कैकेय्या रामवनगमनरूपां प्रार्थनां सत्यस्य सूत्रेण बद्धतयैव न तिरस्कर्तुमपारयत्, वरं प्राणान् प्रियतमपुत्रस्य विरहे पर्यहरत् ।

४—सत्यभाषणमहत्तां मीमांसमानेनासत्यभाषणस्यापि मीमांसा कर्त्तव्या । असत्यं भाषणसमये क्रियते कष्टाय भवति तत्त एव जानन्ति, ये तद्भाषिणो भवन्ति, एकस्यासत्यस्य प्रच्छादनाय दश पञ्चदश वाऽसत्यानि वक्तुं बाध्यते जनः । असत्यभाषी सकृन्नापि तथाऽवगम्येत, परं सर्वदा तद्गोपनं न सुकरं भवति । असत्यभाषिणां समुदायो न परस्परं विश्वसिति, सर्वः परस्परं सन्दिग्धयैव दृशा पश्यति । असत्यभाषणं प्रायः सर्वत्रैव देशे समाजे च निन्द्यत एव । सर्वप्रथमं सभ्यतया गर्वभाजो हिन्दवो, ग्रीसवासिनः, रोमदेश्याश्च महताश्रमेण सत्यं स्तुतवन्तः । असत्यमविश्वासमुपजनयन् महान्तं क्लेशं निमन्त्रयति ।

५—अतो मनुष्याणां जीवने सत्यमावश्यकं, जीवने साफल्यमुप-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

लिप्सुभिरवश्यमस्य पालनाय प्रयासोऽवलम्बनीयः। सत्यभाषणार्थं दीर्घदीर्घस्य प्रयत्नस्य नास्ति प्रयोजनम्, इदमस्माकं मुखस्याग्र एव सदा तिष्ठति, (असत्यमेव भाषणावसरेऽनुसन्धीयत इत्यपरं लाघवं सत्यभाषणे) एवञ्चासत्यभाषणे सम्भवतो दोषानवलोक्य वयं जीवनस्य व्रतं विदध्याम—

सत्यं चिन्तनीयं, सत्यं वक्तव्यं, सत्यमेव च व्यवहरणीयम्, इति। तथाचोक्तम्—"सत्यान्नास्ति परोधर्मः" इति।

---

(१४) आत्मसँय्यमः।

१ परिभाषा, २ आत्मसँय्यमस्य महत्ता, ३ एतदभावेन हानिः, ४ उपसंहारः।

१—जगति जन्मत एव भ्रियमाणानां प्राणिनां मनसि द्विविधा भावाः—असन्तो विचाराः, सन्तो विचाराश्च तिष्ठन्ति, न जातु कोपि जातस्तादृशो जातो योऽस्य द्वैविध्यभाजो भवबन्धनस्य भाजनं न भवेत्। तत्र साफल्यं तस्यैव जीवने जायते यो मनसि प्रादुर्भवतोऽसतो विचारानन्तरेव यमयति। अस्यैव चासद्विचारनियन्त्रणस्य नाम "आत्मसँय्यमः" इति। दुर्विचारैः पराजितैरात्मा पराजीयते तदभिमानेनैवात्मसँय्यमपदस्य तत्रार्थे प्रयोगः। आत्मनोऽयं सँय्यमः, विजयः, निग्रह इति चाख्यायते। क्वचिच्च मनोनिग्रहरूपेणाप्यस्यैवार्थस्योपपादनं विधीयते।

२—आत्मसँय्यमं सेवमानो हि जनः कदाचिदपि कर्त्तव्यान्न हीयते, कर्त्तव्यपालनपरायणता च सर्वासां समृद्धीनां मूलमिति न कोपि जनो नाङ्गीकुर्वीत। एवञ्चात्मसँय्यमः सर्वसम्पत्तीनां मूलमित्यर्थत आपन्नम्। कोपिच्छात्रो नानाविधैः सांसारिकैः प्रलोभनैराकृष्टुमिष्यमाणो यद्यात्मानं नियमयति, गौरवं समेधयन्तीं शिक्षां समापयति, प्रतिष्ठया सह समागच्छन्तीं श्रियमासाद्य प्रसीदति किञ्च-संसारे जातमात्रस्य मनुष्यता पारिभाषिक्येव, वास्तविकी मनुष्यता नान्तरात्मसँय्यमं सम्भ-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विनी 'दुर्जयाश्च विषया विदुषाऽपि'। विषयैश्चैभिः प्रतिपदप्रसृमरैर्वडिशैरिव मत्स्या बलादिवाकृष्यन्ते मनुष्याः, तस्मिन् समयेऽमी पर्यन्तविरसा अपि भोगा बहु स्वदन्ते, नच प्रत्येति मनागपि मनो मीषां परिणामदुरन्तताम्, सम्भवपथातिथयश्च सर्वा अपि सिद्धयः स्वसँय्यमेबीजरूपेण निहिताः, तदिह परमावश्यकोऽयं पदार्थः।

३—मनुष्यो हि सर्वथा निर्दोषो न भवतीत्युद्घोषो नातीवासत्यः। ईदृशि स्थितौ य आत्मसँय्यमं वर्त्तयति तेन बहुषु विषयेषु दोषमार्जनं कृतं भवति, येन तस्य मनसि महानात्मसन्तोष आनन्दश्चोदयते, यं स एवास्वादयति यस्तथाभूतपथपथिकः।

४—एको दोषो दोषान्तराणि समुच्चिनोति, यदि वयं निजंमनो यथारुचि व्यवहर्त्तुं त्यजामः, तस्य वैषयिकीं प्रवृत्तिं न निरुन्ध्मस्तर्हि पदे पदे क्षणे क्षणे निजान् दोषपयसि सशिखं मज्जतोऽनुभविष्यामः। आत्मसँय्यमाय जलाञ्जलिं दत्तवन्तो मनुष्या अपि पशव एव, शृङ्गपुच्छराहित्यमात्रं विशिष्यते। एकदा विषयैर्हतस्य मनसः पुनरुद्धारो न भवतीति, विषयाय सकृत्प्रदीयमान आत्मा तद्दास्यमाश्रयति। नचासौ कदाचिदपि ततस्स्वस्य मोक्षाय चिन्तयत्यपि। यः कस्मिंश्चिदपि विषये साभिलाषः, स यदि न सँय्यमी तदा चौर्यमपि विदध्यात्। यश्च पाने सञ्जातरुचि स्स यदि नात्मानं निरुन्धे सम्पद्यते मद्यपः।

५—अस्यां स्थितौ स्वाभाविक्याः कुप्रवृत्तेः प्रतिरोधः-शब्दान्तरेणाभिधाने—आत्मसँय्यमोऽवश्यं प्रथमादेव वयसः कर्त्तव्यः। तत्र बालेषु यावत्तावती विचारशक्तिर्नायाता स्यात्तावत्तत्पित्रोः करणीयं शिक्षापदाभिलप्यम्। सति च तथा समर्थे ज्ञाने स्वकर्त्तव्य "आत्मसँय्यमः" अत एव च पण्डिता असँय्यतेन पठितमपठितं श्रुतमश्रुतं प्रतिज्ञातमप्रतिज्ञातं सङ्कल्पितं चासङ्कल्पितमाहुः। यतश्च—

"इन्द्रियाणां विचरतां विषयेष्वपहारिषु
सँय्यमे यत्नमातिष्ठेद् विद्वान्यन्तेव वाजिनाम्"॥ गीता।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(१५) जातिव्यवस्था ।

१ अस्या मूलम् , २ जातिभेदाः, तेषां कर्त्तव्यानि च, ३ जातिव्यवस्थायाः पूर्वसमये स्थितिः, ४ तस्या एव साम्प्रतिकी दशा, ५ जातिव्यवस्थया लाभाऽलाभौ, ६ उपसंहारः ।

१—जननेन प्राप्यते या सा जातिः, सा च ब्राह्मणत्वादिका, भुवि भारतवर्षवदन्यः कोऽपि देशो जातिभारेणाक्रान्तो नास्ति । सम्प्रति जातिभेदोपभेदास्तावतीमत्तिभूमिं गता येन तस्या भेदानां गणना गङ्गातटप्रसृत-सिकतागणनापेक्षयाऽपि दुष्करा । इयं च जातिप्रथा न नवा महाभारतकालेऽपि जातीनां सत्ताश्रूयते, ततः पूर्वतनासूपनिषत्स्वपि जातिकथोपलभ्यते । इमां प्रथां प्रथमतः क आविश्चकारेति नामग्राहं न निर्णेतुं शक्यते, परमस्या मूले सामाजिकव्यवस्थाया दृढीकरणस्य भावनया कर्मभेदनिर्धारणमेव कारणमवधारयामः । स्मरणीयेतिहासयुगतः पूर्वतनीं सभ्यतां पालयतोऽस्य देशस्य कतमयाऽऽवश्यकतया प्रासूयतेयं जातिव्यवस्थेति यदा निर्णीतं भविष्यति तदैतिहासिकाः परां मुदमुपैष्यन्ति । केचिच्च—

"चातुर्वर्ण्यं मया सृष्टं गुणकर्म-विभागशः" इति गीतायामीश्वरोक्तं प्रमाणयन्तोऽस्याः प्रथाया अनादितां समर्थयन्ते । यदस्तु, तदस्तु, अस्याः प्राचीनतरतायां वयं दृढप्रत्ययाः ।

२—"ब्राह्मणोऽस्य मुखमासीद् , बाहू राजन्यः कृतः, ऊरू तदस्य यद्वैश्यः, पद्भ्यां शूद्रोऽजायत" इति सहस्रशीर्षाभिधानाध्यायगं मन्त्रं पश्यतां मतेऽस्याश्चत्वारो भागाः, अमी च भागाः कर्मानुसारेणैव कृताः, येऽध्ययनाध्यापनयाजनादिकर्म चक्रुस्ते ब्राह्मणाः, युद्धदेशरक्षाशासनाद्यधिकृताः क्षत्रियाः, कृषिवाणिज्यपशुपालनाद्यवलम्बमाना वैश्याः, दासताश्रिताश्च शूद्रा अकथ्यन्त । अत्र च स्मरन्ति :—

"चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः" समयानुकूलतया वि-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यधीमाना चेयं व्यवस्थाऽद्यापि दृढ़मूलतया नाकम्पत। पश्यत चात्रास्मत्पूर्वजानां बुद्धिवैभवम् ॥

३—इयं प्रथा पुराकाले संघस्यमानाया हिन्दुजातेः सुविधा माधातुमेव व्यधीयत, एकः सङ्घ एकस्य कर्मणः कृते नियुज्यमानो (जातायामन्येषां सङ्घानां ततः कर्मणो निवृत्तौ) यथा सफलतया प्रयस्यति न तथा तदन्यथाभावे। मन्यतामेकत्र विद्यालये पञ्च कक्षाः सन्ति, पञ्चच प्रकोष्ठानि मार्जनीयानि विद्यन्ते, तत्र यदि प्रत्येकवर्गतः कतिपये छात्रास्तत्र व्यापार्यन्ते साधु न तत्साध्यते तैः, एकः पुनः समग्रो वर्गः स्ववर्गस्य प्रतिष्ठामिव वर्द्धयितुं प्राणान् पणीकरोति, साधयति च कार्यम्, एषैव गतिर्जातिव्यवस्थायामपि कर्त्तव्यविभागावधारणार्थायाम्। एवञ्च कर्मणा जातिव्यवस्थां सिध्यन्तीं पश्यन्तो धर्मशास्त्रविरोधं मा शङ्किषत, धर्मशास्त्राण्यपि गुणकर्मविभागशः सिध्यन्तीं जातिव्यवस्थां न विरुन्धन्ति, केवलं यस्य जन्मक्षत्रियवंशे, तस्मिन् भूयसा स्ववंशसम्भवपूर्वजरक्तप्रवाहस्य स्वाभाविकतया तदुचितकर्मणामेव सुखं साधनीयत्वस्य सम्भवात्, सत्यपि क्वचिदन्यविधदृष्टान्ते तस्य क्वाचित्कतया व्यवस्थाप्रवर्त्तकत्वानङ्गीकारात्, भूयसा हि व्यपदेशस्य प्रसिद्धेः, तथाच क्षत्रियवंशप्रसूतस्य व्यापारप्रवृत्तत्वेपि पूर्वजरक्तमहिम्ना तस्मिन् व्यापारकौशलतत्त्वापेक्षया शासनसामर्थ्यबीजस्यैवाधिक्यस्य सम्भावनया (पूर्वजाचरितकर्मकृतजातिनिर्णयस्य व्यवहृतत्वाच्च) तथा व्यवहारस्य युक्तत्वम्। अस्याश्च व्यवस्थायाः पुरा महानादर आसीत्, अस्या रक्षणाय कियतां प्राणानां क्षतिरपि समाजेन सुखमसह्यत। जातिनियमानां पालनाय बहवः क्लेशा अपि निश्शब्दं स्वीक्रियन्तेस्म, का कथा जातेः? उपजातीनां, ज्येष्ठभावाभिमानमात्रफलानां जातितदुपभेदाविर्भावितसत्ताविशेषाणां रक्षणायापि बहुचेष्टितमस्माभिः। अशेषदोषदूषितस्यापि जातिश्रेष्ठस्य कृते महानादरः कृतः "जातिर्गङ्गा गरीयसी" इत्याभाणकोऽपि जन्मलभ्यजातिपरकतया समर्थितः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

४—परं सम्प्रति जातिव्यवस्थाया अनादरस्य वायुः प्रवहमान इव भवति, कतिपये ब्राह्मणा अपि कस्यापि शूद्रस्य वैश्यस्य वा जातौ यौनं भोजनादेर्वा सम्बन्धं कर्त्तुं प्रवृत्ता दृश्यन्ते, जातिनियमानामपालनेऽपि न पुरेव क्लिश्यते । परमिदं परिवर्त्तनं नाकस्मिकम्, न वा कस्यापि निरूढ़प्रभावस्य प्रचारस्य फलम्, किन्तु सम्प्रति सभ्यतासङ्घर्षमये समये नानाप्रान्तदेशीयजनसमाजस्य जाते दैनन्दिने सम्पर्कें स्वाभाविकेनाकर्षणेन जन्यते । इदं च दिनानुदिनमेधमानमेव सम्भाव्यते, नचैतावन्मात्रेण जातिव्यवस्थाभिमानशालिभिरस्माभिर्भेतव्यं, भगवता कृताया अस्या नाशस्यापि तदधीनत्वात्, तेन कृते च नाशे शोच्यताविरहात् ।

५—यत्र जातिव्यवस्थया समाजः परिचालितः, सर्वैऽपि समाजसङ्घा उचितकर्त्तव्यनिर्णयेनासङ्कीर्णव्यापाराः कृताः, कर्त्तव्यासाङ्कर्यसम्पादनद्वाराऽर्थिकस्थितिवैषम्यं नियन्त्रितं, साधुकर्मप्रवृत्तिर्जनिता-जनेषु, तत्रैव लोकानां मिथ्याभिमानस्यापि बीजमुप्तं, यत्समये कटुफलं फलति, जात्यन्तरकर्त्तव्यकरणीयानामापद्यपि कर्त्तव्यतां प्रतिषिध्य जीवनस्य मार्गोऽवसरविशेषे कलुषीकृतः, विरोधभावनायाः प्रकटनेन शान्तेः स्रोतो निरुद्धम्, स्थलविशेषेषु समुन्नतेर्मार्गेऽपि नगायितमिति ।

६—तदियं जातिव्यवस्था दरिद्राणामेवादरणीयतां दधाना ह्रासमिवायान्ती यथा न लुप्यते तथा प्रयतनीयम् । पाश्चात्यसभ्यता प्रवाहो हि बलादिव पातयितुं प्रयतते ताम् । परमियं वराकी "हिन्दुस्थान" मात्रशरणा यथा न विपद्यते, गुणकर्मविभागाधीनजन्मनोऽस्याः स्वरूपं यथाऽऽपतितान् दोषानपास्य चमत्कृतिं प्रपद्यते तथाविदध्यात् परमात्मा । शमिति ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(१६) भूकम्पः ।

१ अस्य कारणम् , २ स्वरूपम् , ३ क्षतिः, ४ उपसंहारः ।

१—इयं धरा सर्गादावेव यथाऽधुना दृश्यते तथा नोदपद्यत, वैज्ञानिकाः कथयन्ति जलमयीं सृष्टिं प्रथमाम् , मनुरप्यर्थमिममनुमोदयतिस्म—"अप एव ससर्जादौ तासु वीर्यमवासृजत्" ताश्चापः क्रमशो घनीभावमापन्ना भूभावं भेजिरे । अस्याश्च घनीभूताया मध्ये भागे कतिपये तैजसा धातूपधातुखनिजपदार्था स्तरला दीप्तिमन्तो दाहकाः शीतशीताश्च सन्ति स्थानभेदेन भिन्नप्रकृतयो भिन्नफलाश्च । तैश्च पदार्थैरस्याः पृथिव्या बहवो लाभाः सम्भवन्ति, पृथिव्यां पातितस्य जलादेस्तरलस्य, निखातस्य वा वस्तुनः शोषणादिना समशीतोष्णतासम्पादनं तैरेव क्रियते, अस्या वसुन्धरापदप्राप्तेः साधनानि च रत्नानि तैरेव पच्यमानानि दीप्तिभाञ्जि जायन्ते, इयं चेदृशी पृथिवी तेषामेव तैजसपदार्थानां संयोगमात्राधिक्यादिना विशेषान्यतमेन जाते ज्वालाधिक्ये तन्महिम्नैव चलति, स एव भूकम्पः इति केचित् ।

कतिचन वैज्ञानिकास्तु पृथिव्या बहुस्तरतां ब्रुवाणा अधोवस्थितस्य स्तरस्यैकस्य स्वाभाविकेनान्तरवस्थितज्वालाजालकृतेन वा पातेनायं भूकम्पो जन्यत इत्याहुः ।

भारतीया सनातनधर्मानुसारिणो जनता तु भुवं पृष्ठदेशे बिभ्रतः शेषनागस्य पार्श्वपरिवर्त्तनमत्र कारणमाह । सचायं भूकम्पो भूयसा तत्रैव भवति, यत्र भूभागे ज्वालामुखी लीना भवति । एवमपि दृश्यते यत्र भूयोभूयो भूः कम्पते तत्र ज्वालामुख्यपि—कदाचित् स्फुटति । यदवधि स्मर्यतेऽस्य भयानकः प्रकोपो 'लीमा' नामके स्थाने १७४७ खीष्टाब्देऽजायत । १७५५ खीष्टाब्दे पोर्त्तुगालानां राजधान्यां लिब्सन् नगरे महाभीमो भूकम्पोऽभवत् । अस्मिंश्च भूकम्पे यूरोपदेशोऽप्यस्य कम्पस्यानुभवमकृत । जापानदेशे जातः १६२५ खीष्टाब्दीयो भूकम्पस्तुतस्य देशस्यार्द्धावशेषलोकतां लुप्यमानसर्वव्यवस्थतां च व्यधित ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भारतेऽपि १८८७ खीष्टाब्दे वेगेनैव भूकम्पो जातः। प्रत्यग्रः सम्प्रत्यपि स्मर्यमाणदुरन्तभावः १९३४ खीष्टाब्दीयो भूकम्पस्तु प्रायो नूतन एव जनानां मनसि। अनेन हि धूलिसात्कृतानां भवनानां दशा बहुषु स्थलेषु प्रागिवाधुनापि नाजायत। तथैवैकेन निश्शेषीकृतस्य परिवारस्य, उर्वराया अपि सिकतामयीभावंगताया भुवः, कलकलनादेन वहन्त्या अपि नद्याः शुष्यमाणतया सद्यः समतलवालुकामयक्षेत्रतासम्पत्तेश्च स्मरणेन कम्पमिवाकलयति स्वान्तम्। कलाद्वयात्मक एव कालोऽनेन भीषणभूकम्पेन नीयमानो लोकानां यातायातम्, दैनन्दिनोपयोगयोग्यसामयिकसाधनसमुदयं, सामग्रीसम्पदं, च तथा ध्वंसावशेषतामनैषीत्, यथा लोकाश्शताब्दीपञ्चकात्मकं कालं प्रागनुगमिताः। मातापुत्रं, पतिः प्रियां, श्वश्रूः स्नुषां, सहोदरो भ्राता भगिनीं च हित्वा प्राणमात्ररक्षणप्रयासे व्यग्रतया पलायन्तेति समस्तामपि महताक्लेशेन सञ्चितां सम्पदं परित्यज्य प्राणमात्रस्य रक्षायै च लोकान्धावतो वीक्षितवतां हृदि "आत्मनस्तु कामाय सर्वं प्रियं भवतीति" श्रुतिरगमच्चरितार्थभावम्।

३—अनेन भूकम्पेन महती क्षतिः सम्पाद्यते, तृणनिर्मितान् गृहान् विहायान्यानि भवनानि पतन्ति, तदधश्च लोकानां संहारो जायते, जगत्या व्यथामिव सोढुमक्नुवत्या धराया हृदयं विदीर्यते, क्वचित् भुवोऽन्तरालान्निर्गतस्य तरलस्य तैजसस्य च पदार्थस्य प्रभावेणाग्निकाण्डमपि लङ्काकाण्डं पुनरावर्त्तयति। लोकानां दारिद्र्यं शताब्द्या एकस्याः कृते पुनरुदयमुपैति। तात्कालिकी दशा तु पुनरनार्यावस्थां स्मारयति।

४—ईदृशश्चायं भूकम्पः सर्वैरपि भयेन, उत्पाततया विचित्रेणेव कल्पनोपनीयमानचेतश्चाञ्चल्यकरेण भावेन स्मर्यते। अस्य प्रभावं कुण्ठयितुं लौहकीलमभ्यन्तरीकृत्येष्टकाभवनानि निर्मान्ति धनिकाः। क्वचित् काष्ठपट्टकैरपि सदनानि निर्मान्ति। दरिद्राणां तु तृणमयमेव कुटीरम् परित्रायते तान्। यस्मिन् देशे भूयोभूयोऽयमुद्भवति तत्र

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

त्वस्योद्वेगः कियतांशेन परिचयं प्राप्त इवाल्पो भवति। भारते तु चिरादयमायाति, तेनात्र महत्यस्य विभीषिका। भगवान् अतोऽस्मान् रक्षतु।

---

(१७) विद्या।

१ अवतारणा, २ विद्यया लाभाः, ३ विद्याप्राप्तेरुपायाः, ४ उपसंहारः।

१—विद्याशब्दो ज्ञानार्थाद्विदेः साध्यते, एवञ्च कतिपयानां वाक्यानां, गणितप्रकाराणां, वैज्ञानिकाविष्काराणां वा ज्ञानं विद्येति वक्तुं पार्यते, परिमोद्दशार्थसमर्थनं सङ्कुचितवाच्यतामस्य शब्दस्य प्रकाशयेदतश्च—यथा मनुष्यस्य सुप्ताः स्वाभाविक्यः शक्तयो बोध्येरन्, लौकिकपारलौकिकविषयाणां वास्तविकंज्ञानं चोत्पाद्येत सा विद्येति परिभाषामाद्रियन्ते विद्वांसः, वस्तुतत्त्वमीमांसयापि न केवलं कस्यचिद्ग्रन्थस्य कण्ठस्थीकरणं तदार्थावगममात्रं वा विद्यां वक्तुमुत्सहामहे, अनग्नौ हुतस्येव तावतो ज्ञानप्राग्भागस्याकार्यकरत्वात्, ईश्वरो हि सहजया स्वया दयया (पुरुषकृतेन श्रमेण) तदन्तः स्थितां तदीयां शक्तिं बोधयति सैव वास्तविकी विद्येति विज्ञः। अध्ययनमात्रस्यापि तदुद्भावकतया कार्यकारणयोरभेदमूरीकृत्य तथा संज्ञाकरणम्।

२—मनुष्याणां हृदयेऽन्धतमसावृते बहुविधा नानाविषयाश्च शक्तयस्तिष्ठन्ति, ता न स्वतः प्रकाशन्ते, विद्यया दूरीकृते तस्मिंस्तमसि तेजोऽवरोधिनि तास्ताः शक्तयः प्रकाशमासाद्य पुमांसं प्रतिष्ठामानयन्ति। तेनैव च प्रकाशेन मनुष्याणां शीलं शुध्यति, स्वभावो विवेकभाग्भवति, चरित्रं चारुतामञ्चति, वार्त्तालापः परिपक्वप्रबोधो भवति। येषां विषयाणां ज्ञानं मूर्खा मनुष्याः शतवत्सरमितकालेनापि नाशासते, तानेव विषयान् विद्वांसः क्षणेन प्रत्यक्षेणेक्षन्ते। आश्चर्यकरं धूमयानं (रेल,) तडित्प्रवाहं (तार), धूमजलयानं (जहाज) च विद्याबलेनैव लोका आविरकार्षुः। अद्यापि यासु जातिषु विद्या नास्ति ता वनेषु वसन्ति, पत्राणि तरूणां वसते। विद्याबलेनैव लोका भूमिनिखातं रत्नमा-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

साद्य धनिनो जायन्ते। विद्यैव परदेशस्थितस्य प्राणेभ्योपि प्रियतमस्य पत्रं द्वारीकृत्याधिमग्नां सततरुदितोच्छूननेत्रां तत्प्रियामाश्वासयति। विद्यैव चात्रापि निदानं यद्वयं रामं कृष्णं च स्मरामः, इतिहासप्रसिद्धेभ्यः पुरुषधौरेयेभ्यः स्वान् आदरोपनतश्रद्धाञ्जलीनुपहरामः, यो ह्यनया भूषितस्तस्यान्येषु भूषणेषु वृथा प्रयासः, "विद्यारूपं कुरूपाणामि"ति चाहुः प्राज्ञाः। येन विद्याबलमर्जितं स स्वां कीर्तिममरीकृत्य जनान्तरवन्न लोकानां ज्ञानाध्वनोऽपयाति, किञ्च स न केवलमात्मानममरत्वमापयति किन्तु यस्य तथात्वाय यतते तमेव तथाभूतं विदधाति, वाल्मीकिर्विद्यैव रामचन्द्रमधुनापि गीयमानचरित्रं करोतीत्यपि किं प्रमाणमर्हति ?।

यो हि विद्यामर्जितवान् न स कदाचिदपि जाठरज्वालया दह्यते, सदा तदाश्रिता विद्या तदुदरपूर्त्यै प्रयच्छति। यथाहुः—

श्रुतेन यत्नेन च वागुपासिता
ध्रुवं करोत्येव कमप्यनुग्रहम्॥

यदि च केचित्—साम्प्रतिके युगे सर्वेषामपि लभ्यवस्तूनामर्थसाध्यतां निभालयन्तो द्रव्यं विद्यापेक्षया प्रभूतस्यादरस्य पात्रं समर्थयन्ते तान्प्रति ब्रूयाः, अङ्ग हि भवन्तो धनं चौरेभ्यो गोपयितुं, राजकर्तृकाद्धरणाद्रक्षयितुं प्रकृतिप्रकोपहतादुपद्रवात्त्रातुं भ्रातृभाज्यतायाः शेषयितुं कञ्चनावन्ध्यं प्रतीकारमाविष्कृत्य दर्शयन्तु, तत एवं साहसमाचरणीयम्। विद्या हि चौरैर्नापह्रियते, राज्ञा नादीयते, प्रकृतिप्रकोपकृतोपद्रवैर्न हीयते, भ्रातृभिश्च न विभज्यत इति हि सर्वसम्मतमेव। अपरञ्च दृश्यताम्–यदि भवान् कोटिवित्तः कञ्चनदेशमन्यं याति, यत्र भवन्तं कोपि न परिचिनोति विद्वांश्चैको रिक्तकरस्तत्रोपतिष्ठते, तत्र द्वयोः कस्यादरोऽधिकः स्यात् ?

३—सा चेयं विद्या न केवलं पुस्तकानामध्ययनेन साध्या तावता तु तस्या भूमिकामात्रं निर्मीयते। प्राकृतस्य संसारस्य पर्यवेक्षणं, स्वाधी-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तद्ग्रन्थजन्यज्ञानकृतविवेकस्योपयोगं च विद्याममभिदध्मः। यद्यधीतवतोऽपि मनसि विवेकः पदं नादधाति, वृथा तदा समारम्भः, किञ्च सर्वो व्ययो वृथा। यूनानदेशवासी महात्मा 'शुकरातः' नाधिकमधिजगे, परं तदीयो विवेकस्तं भूयसो लोकादरस्य पात्रमकृत। वर्त्तमानसमयेऽपि लोकतन्त्राधिपः सर्वाधिकजनमानसिकादरभूमि र्महात्मगान्धीमहोदयो नाधिकाध्ययनप्राप्तगौरवः। पञ्चनदेषु लब्धजन्मा रणजीतसिंहो नाक्षरमपि पर्यचिनोत्, परं सकृत्समग्रमपि भारतमधिकर्त्तुं स्वप्नमद्राक्षीत्।

४—अस्याश्च लाभाय सर्वविधोऽपि प्रयत्नो न दुष्यति। स्थानं मानं विगानं वाऽस्या उपलब्धये न विवेचयन्ति सन्तः। स्मर्यतेऽपि—"विद्यामाददीतावरादपि" ज्ञानमेव वार्द्धक्यकारणं मन्यमाना वाला अपि वृद्धानध्यापयन्तो यथा वृद्धानपि तान् पुत्रपदेन व्यवजह्रुः, तदौचित्यं च निरचैषुस्तथा जानन्त्येव साम्प्रतिकाश्छात्राः, एतेन च नराणां बालेभ्योऽपि विद्यालाभसम्भवे तदनादरभीतिनिवर्त्तकप्रसङ्गेन विद्याया महिमा गीयते, किञ्चाहुः—"स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते" अतश्च-यथारुचि यथाशक्ति विद्या शिक्षणीया सर्वैः।

---

(१८) मितव्ययशीलता।

१ अवतरणम्, २ अतो लाभाः, ३ कथमियं शिक्ष्यते, ४ अपव्ययः, ५ कृपणः कः, ६ उपसंहारः।

१—व्ययं मितं-परिमितं स्वीयेनायेन कृतसीमनिर्देशं व्ययं मितव्ययमाचक्ष्महे, सा चेयं परिभाषा सर्वथैवास्य शीर्षकस्याभिप्रायं कुक्षौ करोति। परिस्थित्यादिनियन्त्रितस्य पुरुषसमूहस्य सर्वस्य कोऽपि निर्धारितो व्ययक्रमस्तु नैवास्ति यं मितव्ययमभिदध्याम, अतश्च यथा स्वकीयायं संयम एव मितव्ययः स्वीकर्त्तव्यः।

२—मितव्यय एव धनाढ्यताया मूलं कारणम्, नह्यायमात्रेण कस्यापि धनिकत्वं प्रमातव्यम्, तस्यायापेक्षयाऽधिकेन व्ययेन कृतेन सततमाक्रान्ततया तथा व्यवहारायोग्यत्वात्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अथ च यः प्रतिमासं दशैव रूप्यकाण्यर्जयति, स हि यदि नवैव प्रतिमासं व्यये नियोजयति तदा वर्षेणैकेन तस्य हस्ते द्वादशरूप्यकाणि सञ्चीयन्ते। एवमष्टौ वर्षाणि कुर्वता शतं सञ्चीयन्ते। सत्यं मितव्ययशीलता स्पर्शमणि, र्यस्य स्पर्शमात्रेण समृद्धयः समेधन्ते। सततश्रमशीलता सर्वथा प्रशस्या, परं सापि मितव्ययशीलताया एवानुगामिनी सती फलति, अन्यथा केवलं श्रममात्रमुपहरति। यः केवलमर्जयति, सञ्चयं न शिक्षते, तस्य जीवनं वृथा याति। इयञ्च मितव्ययशीलता स्वतन्त्रताया जननी, यो मितव्ययो न भवति स क्षणे क्षणे ऋणं याचमानः परवशतापाशं सुदृढं करोति। मितव्ययस्तु स्वमायमनुध्यायन् व्ययं करोति येन कदापि न याचनायां जायमानस्य ऋणग्रहणकाले चानुभूयमानस्य क्लेशस्य भाजनं भवति।

अव्यवस्थितं हि जनानां स्वास्थ्यमाहुः, सति चास्वास्थ्ये प्रतिबध्यत इवायस्तस्यां स्थितौ पूर्वसञ्चितमेव धनं जीवनं रक्षति। किञ्च वार्द्धकेपि विगतार्जनसामर्थ्यस्य प्राग्रक्षितमेव वित्तं शम्बलं भवति। एतदर्थमपि मितव्ययता सप्रयोजना मन्यते। आकस्मिकस्य व्ययावसरस्य विवाहादेरन्यस्य वा श्राद्धादेरुपस्थितौ प्रागनुष्ठिता मितव्ययशीलता कियदुपकुरुत इति त एव जानीयुर्ये भुक्ततन्मधुरफलाः।

३—एवमेतत्फलं प्रति जाते निर्विचिकित्से विश्वासे तदुपायचिन्ते प्रक्रान्ते निम्नलिखिताः प्रकारा अनुष्ठेयाः।

(क) यावानल्पो महान् वाऽऽयः स्यात्ततोऽल्पं (यथा सम्भवमात्रया) व्यये नियोजनीयम्। एष नियमो न भज्येत।

(ख) व्यये नियुक्तस्य प्रत्येकस्य पणस्य सार्थकत्वमनर्थकत्वं च चिन्तनीयम्। एकैकशः सञ्चिताः पणा रूप्यकाणि यथा भवेयुस्तथा स्वयं प्रवध्नन्ति।

(ग) किमपि मूल्यं कथं न भवेत्, किमपि वस्तु, यस्य मूल्यं तत्कालमेव न दातुं शक्यते, न क्रेतव्यम्। दास्यमानमूल्यकपदार्थक्रयणाभ्यासे

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

क्रमशो वर्द्धमानमनोऽभिलाषतामुत्पाद्य मितव्ययशीलमपि पुरुषं ततः सिद्धान्तात्पातयति ।

(घ) येन वस्तुना विना जीवनक्रमो न विपर्ययं व्रजेत्, सामाजिकी स्थितिर्न विषमा भवेत्, भाविकार्यक्रमो न विपद्येत तस्य कृते जायमानां लालसां बलवन्निरुन्धीत, आवश्यकताया लघुभावो जनमात्रेण सत्कारेणोपपाद्यः । अत्यावश्यकवस्तुभिन्नवस्तुक्रयणं पापतया जानते ज्ञानिनः ।

(ङ) व्यर्थाडम्बरमात्रप्रयोजनं धनव्ययं सदाऽवलोकमानस्ततोऽवश्यं स्वं पृथक् स्थापयितुं प्रयतेत । एतादृशा आडम्बरप्रिया हि पुरुषा आडम्बरेण विवाहश्राद्धादौ वीतसर्वस्वा आवश्यकतमे स्वपुत्रादिशिक्षणेऽपि न क्षमन्ते, स्वस्य सन्तानस्य च स्थायिनं क्लेशमुत्पादयन्ति ।

(च) आयव्ययलेखरक्षा मितव्ययताशास्त्रस्याक्षरावली । आयं व्ययं च पृथक्पृथक् स्पष्टभावेन लिखेत्, समये समये परीक्षेत च । कुत्र व्ययेऽनौचित्यं तत्सावधानं विभावयेत्ततः स्वस्य निवृत्तये प्रकारं चिन्तयित्वा तदुपयोगाय प्रयतेत । आयव्ययगणनापुस्तिकापरीक्षा हि वृथाव्ययनिवारणस्य महौषधिरिति निश्चयेन वक्तुं पार्यते । येऽपव्ययशीलास्ते कदापि स्वायव्ययलेखारक्षणे नोत्सहन्ते पापिन इव धर्मानुष्ठाने ।

४—ये उचितां शिक्षां नासादयन्ति तेऽधिकव्ययशीलतया विपद्यन्ते, अतो बालकानां शिक्षायै लघुमेकं कोशं तदाधिपत्ये प्रतिष्ठापयेत्, तदुपयोगं च तथा शिक्षयेद्यथा भाविनि जीवने तस्य दृष्टिः कदाप्यन्धतमसावृते वृथाव्ययवर्त्मनि न मुह्येत्, प्रत्युत प्रकाशमवेक्षेत । स्त्रीणां तु मितव्ययशीलता गृहप्रबन्धशिक्षयैव सुलभोपार्जना । व्यये नियोजनीयं धनं ता एव रक्षेयुर्यथा विवेकंसत्यवसरे पुरुषस्य सम्मत्या वा तस्योपयोगं कुर्युः । एवं शिक्ष्यमाणो हि परिवारोऽल्पेऽप्याये प्रसन्न इव जीवनयात्रायां पुरस्सरति ।

५—बहवो हि मुखागतभाषिणो विविच्य व्ययशीलं कृपणमभिद-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

धत्ते, सत्यं कृपणता निन्दायाः स्थानम्, परं के कृपणा इति तु पुरस्ताद्विवेच्यताम्। वयन्तु-"सति धने तदुपयुक्तव्ययावसरेऽपि तदनुपयोगं कामयमाना एव कृपणाः" इति मन्यामहे, सत्यर्थराशौ क्लेशानुष्ठानं कापुरुषत्वम्, अत एव तदपि गर्हितम्। अत्र च विवेक एव शरणम्।

६—अतो जीवनस्य सफलताया निदानभूता प्रतिपदसावधानतया पालिता सती कामप्रसूरियं मितव्ययशीलता मानुष्यकमुन्नमयितुमवश्यं सेव्या बुद्धिमद्भिः। अत एव चाहुः—

"इदमेव हि पाण्डित्यमियमेव बहुज्ञता।
अयमेव परो धर्म आयादल्पतरो व्ययः"। इति॥

---

(१६) व्यायामः।

१ व्यायामस्य परिभाषादिः, २ व्यायामेन शरीरस्य विकासः, ३ व्यायाममहिम्ना दुरभ्यासेभ्यो रक्षा, ४ अस्य प्रभेदाः, ५ उपसंहारः।

१—येन कर्मणानुष्ठितेन मनुष्यस्य तनोः (तद्द्वारा च) बुद्धेरुचितौ संस्करोच्छ्रायौ भवतः, येन शरीरस्य सन्धिस्थलानि चलन्ति, धमन्यः स्पन्दन्ते, तद्विधया च रक्तं परिष्क्रियते, पाकक्रिया व्यवस्थाप्यते, सम्भवतां रोगाणामाक्रमणं प्रतिबध्यते च, तत्कर्म व्यायामः। मनुष्याणां शरीरेण समं बुद्धेरतिघनिष्ठः सम्बन्धो वर्त्तते, शिक्षा यथा मनुष्याणां ज्ञानं परिमार्जयति तथैव व्यायामस्तनुं समेधयति। एवं च मनुष्याणामिदं कर्त्तव्यं वर्त्तते यत्ते यथारुचि कमपि व्यायाममुपसेवेरन्। एष हि विदुषां समुदाहारः-"स्वस्थे शरीरे स्वस्था मतिरवतिष्ठते"।

२—अस्माकं देशस्य युवानोऽत्र विषये बलवदुदासते, ते करे करमाधाय वृथाऽवस्थानं सौख्यमकर्मण्यतां च धनिकतां मन्यमाना जीवनं व्यर्थतां नेतुमभ्यस्यन्ति। कतिपये विद्यार्थिनः स्वान्तनोरवस्थामपमत्याध्ययने श्राम्यन्ति, गुरूणां गौरवं बर्द्धयन्ति, परीक्षास्वपि च महत्या प्रतिष्ठयोत्तरन्ति, परं पश्चात् प्रागनादृतेनेव स्वास्थ्येन प्रतिशोधबुद्ध्येव

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

हीयमानास्तेऽकाल एव कालकवलिताः सन्तः समाजस्य देशस्य परिवारस्य स्वस्यैव वा कामपि सेवां कर्त्तुं न पारयन्ति। यदि त एव कियन्तमेव कालं प्रत्यहं व्यायामे समर्पितवन्तोऽभविष्यन्नूनं तैः स्वेनैव सह समाजस्य जातेर्देशस्य च महती सेवा कृताऽभविष्यत्। यूरोपदेशवासिनो व्यायामे साधु ध्यानं ददते, ते कदापि व्यायामार्थं निर्धारिते समये कार्यान्तरं नानुतिष्ठन्ति न केवलं यौवनं-किन्तु वार्द्धकम्-यत्र जनाः साधारणतः शरीरविषये ध्यानदानमनावश्यकं प्रतियन्ति-अपि नियतव्यायामविधानेन रमणीयतां प्रापयन्ति। व्यायामस्य प्रभावेण च ते कदापि कष्टमयं जीवनं न यापयन्ति। अस्माकं देशे लब्धजन्मानस्तु जनाः कदापि व्यायामे मनो नार्पयन्ति तेन यौवनं यावत्परमात्मना प्रत्तां वर्द्धिष्णुतां सहायिकामासाद्य कथञ्चिच्चलन्ति पश्चात्स्पृष्टमात्रे जरसा-देहे कथञ्चिद्दिन एकदा निगीर्णामपि तण्डुलमुष्टिं जरयितुं न क्षममाणाय-जाठराय वह्नये कुवाच्यशतं पुनरावर्त्तयन्तो भारभूतं जीवनं यापयन्ति। व्यायामस्यानादरेण जीवनस्य तान्यहानि दुर्गमाणि कष्टमयानि च जायन्ते येषु तथाकर्तॄणां कायिकी स्थितिर्विपद्यते।

३—ये नियमतो व्यायाममाचरन्ति, ते कतिपयेभ्यः कुत्सितेभ्यो रागप्रसूतेभ्यः कुकृत्येभ्यो रक्षिता भवन्ति, व्यायामाज्जायमाना हि तेषां दृढताचपलतायै चलितमात्राणि तदिन्द्रियाणि रश्मिष्विवादाय निरुणद्धि। एवं हि श्रूयते-यस्य शरीरे यावदोजो भवति, तस्य मनस्तावतीं शान्तिं रक्षतीति। किञ्च क्रोधो हि दुर्बलान्यथाभिभवति न तथा व्यायामदृढगात्रं सबलम्, क्रोधेन हि मनुष्या मानुष्यकाच्च्यवन्ते-"क्रुद्धः पापं न कुर्यात् कः क्रुद्धो हन्याद्गुरूनपि" एतादृशादपि क्रोधाद्रक्षति व्यायामो बलवत्तासम्पादनविधया।

४—अस्य च व्यायामस्य बहवः प्रभेदाः सन्ति, अश्वारोहणं गुणवत्तरं व्यायामं ब्रुवते विद्वांसः। एतेन हि स्वनुष्ठितेन श्रमजयात्तनुः प्रगुणा भवति, रक्तसञ्चारेण कान्तिः प्राखर्यमायाति। परमिदं बहुव्य

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यसमर्थैरेव धनिकैरनुष्ठातुं शक्यम् । जले सन्तरणमपि समधिकगुणो व्यायामः । एतेनापि श्रमजयः, सततसञ्चलनवशात्स्फूर्त्तिः, सन्धिस्थलेषु च चालनजन्मा बलवद्भावः, कान्तिप्रकर्षश्च समुद्भवन्ति । परमिममपि व्यायामं सर्वत्र सर्वास्ववस्थासु न सम्भविनं मन्यामहे, नहि सर्वत्रावगाहक्षमजलपूर्णा जलाशया लभ्या न वा तनोरस्वास्थ्ये मात्रयापि वर्त्तमाने प्लवनं हिताय ब्रूमहे, न वा सर्वत्र जले तरणं युज्यते, तरङ्गि हि जलं तदर्थं शस्यते । साम्प्रतिके वायुमण्डले पदा कन्दुकक्रीडनमपि व्यायामं साधुफलं समयोपयुक्तं च मन्यन्ते लोकाः, अतिमात्रो यदि न भवति, युज्यतेऽयं शरीरस्वास्थ्यसौन्दर्यसाधनाय व्यायामः, परमयं व्यायामो मात्रामुत्सृज्य छात्राणां स्वास्थ्यं चुलुकयतीत्यपि प्रत्यक्षमीक्षामहे । तेनास्य व्यायामस्य मात्राया नियन्त्रणे सततं जागरूकताऽपेक्षिता, किञ्चायं व्यायामो नैकेन कर्त्तुं शक्यते, सहायसापेक्षतया प्रयोगस्य प्रचलितत्वात्, नच वृद्धानामत्र मनो रमते, नवा सर्वत्र तदुचितचत्वरोपलब्धिरपि सम्भवतीति त्रिष्वपि प्रागुदीरितेषु व्यायामेषु दृष्टिं निक्षिपन्त श्चतुर्थं सर्वोपकारकं, सर्वस्यां स्थितौ, सर्वेषु स्थानेषु, सर्वत्र च समये विधातुं शक्यं 'भ्रमणं' मनोहरं नानाविधदृश्यदर्शनजनितनयनप्रसादं समस्तायाश्शरीरयष्टेश्चालनं व्यायाममभिनन्दयामः । प्रचलितमपि प्रायः सर्वेषु स्थानेषु वर्गेषु चेदमधिकपरिमाणेन । अत्र चात्यनुष्ठिते न कापि हानिरस्तीति सर्वोत्तमोऽयं प्रकारः, प्रतिदिनमेका होराऽत्र नियुज्यमाना सर्वं व्यवस्थितं विधत्ते ।

५—अतः सर्वथा स्वास्थ्यं कामयमानैः स्वस्थ एव देहे स्वस्थस्य बुद्धिसन्तानस्य वासे विश्वसद्भिः "धर्मार्थकाममोक्षाणामारोग्यं मूलमुत्तमम्, तन्निघ्नता किन्न हृतं रक्षता किन्न रक्षितम्" इति च स्मरद्भिः सदा सेवनीयो व्यायामः । इति ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(२०) औद्योगिकशिक्षा ।

१ साधारणशिक्षाया जीविकोपार्जनाक्षमता, २ औद्योगिकशिक्षायास्तथाविधत्वम्, ३ औद्योगिकशिक्षाया अर्थः, ४ अस्याः प्रचारः, ५ उपसंहारः ।

१—साम्प्रतिको साधारणशिक्षा न तया युक्तस्यापि पुंसो जीवनोपयुक्तद्रव्यार्जने साधनीभावं प्रपद्यते, सत्यमिदं दिनानुदिनं प्रत्यक्षतामृच्छति । जनाः पुरेव सम्प्रत्यपि साधारणशिक्षायां स्वस्य धनं नोपयोजयितुमभिलष्यन्ति, साधारण्या शिक्षयाधिगता योग्यता यस्या दासताया योग्यतां प्रापयति सा महतः सङ्घर्षस्य स्थानं मन्यते । पूर्वस्मिन्समये यया योग्यतया शतं रूप्यकाणि वेतने लभ्यन्तेस्म, सम्प्रति तया योग्यतया विंशतिरपि कष्टेन लभ्यानि । अधुना कार्यक्षेत्रं तथा जनसङ्कीर्णतां गतं यदेकत्र पदे रिक्ते सहस्रं प्रार्थनापत्राणि परापतन्ति । अध्ययनलभ्यानि पदानि तु समधिकभावेन प्रार्थिप्राचुर्येण सङ्कीर्णतमानि सञ्जातानि । जीवनसङ्ग्रामोऽहरहर्भीषणतां प्राप्नुवन् प्रतीयते । प्रथमं तण्डुलमुष्टिमपेक्ष्यैव कार्यान्तरे प्रवृत्तिरुपयुक्ता मन्यते लोकैस्तदुपायेचाप्रभवन्ती साधारणी शिक्षा लोकानामादरपात्रताया हीयते ।

२—औद्योगिको शिक्षा समीपस्थोपकरणगणेन तादृशान्युपयुक्तानि वस्तूनि निर्मातुं योग्यतां जनयति, तेन सङ्घर्षमये वातावरणेऽगत्वापि, किमपि द्रव्यमनपेक्ष्यापि साहायकमनुपलभ्यापि जीविकाक्षमद्रव्यमर्जयन्ति तथाशिक्षिताः । औद्योगिकशिक्षामधिगतवतः पुंसो जीविका न परालम्बना, स हि यत्रेच्छति तत्रैव स्थितः स्वाधीनतया स्वपरिवारं पोषयति । कतिपये भारतीया अधुनापि शिक्षामिमां प्रतिष्ठाह्रासकरीं मन्यन्ते, ते बुभुक्षितान् अध्यापकान् प्राड्विवाकांश्चाद्रियन्ते, परं स्वार्जितद्रव्यभृतकुक्षीन् परकर्मकारानपमन्यन्ते । परं समयः समायाति यदेयं दृष्टिरपि स्वयं परिवृत्ता भविष्यति ।

३—औद्योगिकशिक्षापदेन कस्यापि बालस्य शिक्षणीयस्य कस्यांचित् कलायां कुत्रापि विज्ञाने वा शिक्षणमभिप्रेयते, यत्र व्यावहारिकं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ज्ञानं जायते। यत्र शाब्दिकी शिक्षा-तत्राधिकृतान् उपवासयति-तत्रैव व्यावहारिकी शिक्षा तान् भोजयति। मन्यतामेको बालको दशवर्षदेशीयो विद्यालयं प्रविशति, तत्र १२ वर्षाणि व्यतियाप्य समस्ताया भुवः क्षेत्रफलं कण्ठस्थयति, प्रदेशानां जनसङ्ख्यां, सर्वेषां देशानां शासनपद्धतिं च मुखे करोति, फलमेतस्य सर्वस्य किं भवति, प्रतिमासं-सतिभाग्यबलोद्रेके—त्रिंशद्रूप्यकाण्यर्जयति, स्वोदरमपि पूरयितुमपारयन् प्रियस्य परिवारस्य किमप्युक्तुमशक्तः प्रतिदिनं खेदमनुभवति, तस्यैव च सखाऽपरो बालको यदि वर्षत्रयं वर्षचतुष्टयं वा साधारणशिक्षया सहैव 'प्रदीपयन्त्र'निर्माणे 'वस्त्र'वाने 'काष्ठपादुका'विरचन एव वा निपुणः क्रियते, जातेऽपि वृत्तिकार्कश्ये स न बुभुक्षया पीडयते, स्वाधीनभावेन बाहूव्यापार्य सुखं जीवति, परिवारं प्रीणयति, स्वान्तस्तोषं समधिगच्छन् यमन्तः प्रसादं प्राप्नोति, का तृप्तिस्तस्य तुलनां कुर्यात्?।

४—इदं पुनरतिशोचनीयं यदीदृशगुणाया अपि शिक्षायाः प्रचारे राजसत्तायाः प्रजावर्गस्य वा सबलः करावलम्बो नास्ति। प्रतिमण्डलं प्रतिप्रान्तं वा विद्यालयो महाविद्यालयश्च न स्थाप्यते। स्थापितेषु वा छिन्नेषु विद्यालयेषु महाविद्यालयेषु वा नास्याः प्रचुरः प्रचारः सम्भवी, तस्माज्जीविकायै यतमानेऽत्र देशे प्रतिग्राममेको लघुरपि औद्योगिकविद्यालयोऽपेक्ष्यते। न वा केवलेन प्रतिमण्डलं स्थाप्यमानेन विद्यालयेन कृतकृत्यता मन्तव्या, किन्तु सर्वविधा अपि प्रयासा अस्याशिक्षायाः प्रचाराय विधेयाः। यावदस्याः प्रचारो यथावन्न जायते तावदस्य देशस्य प्रतिवर्षवर्द्धमानजनसङ्ख्यस्य कल्याणं नास्ति।

५—खेदः, एतादृशि समुचितेऽपि विषये लोकाः प्राक्तनमिथ्याभिमानजनितसंस्कारकृतेन दोषेणावश्यकं दृक्पातमकृत्वाऽन्यत्रैव ध्यानमर्पयन्ति, नेदमुचितम् यो बालः प्रारम्भत एवौद्योगिकीं शिक्षामधिगच्छति, स यदि तदेव वर्त्म स्वजीवनाय गृह्णाति, न कदापि कष्टमयं जीवनं यापयितुं बाध्येत भगवानस्य देशस्य जनताया हृदये शिक्षामिमां प्रत्यनुरागं समेधयतु।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(२१) देशाटनम् ।

१ देशाटनं विनाऽध्ययनमपूर्णम् , २ देशाटनरहितः कूपमण्डूकः, सङ्कुचितदृष्टिश्च, ३ देशाटनेन दृष्टिर्विकसति, ४ दृष्टान्तादयस्तथोपसंहारश्च ।

१—देशाटनेनास्माकमध्ययनस्य भाग एकः पूर्यते, विना चादो नाध्ययनं सम्पूर्णं कथयितुं शक्यम् । अन्येषु देशेषु सद्यो विद्यालयीयमध्ययनं समापितवतां कृते देशभ्रमणं परमावश्यकं वस्तु मन्यते, तेन तेषां ज्ञानं तदंशेऽपि पूर्त्तिमुपैति । अस्माकं देशे तु विद्यालयीयमध्ययनं समाप्तमिति सम्भावनायामेव विद्यार्थिनः क्वचिद्वेतनप्रदे पदे स्वं नियुक्तं द्रष्टुं प्रयतन्ते, भाग्यवशाच्च याते साफल्ये देशाटनायावसरमेवालभमाना आवश्यकात् परमरमणीयाच्च देशाटनसम्भवाज्ज्ञानाद्रहिता एवावतिष्ठन्ते । यत्राध्ययनस्य फलं केवलं वेतनप्रदपदप्राप्तिरेव मन्यते, का कथा तत्र ज्ञानसाधनदेशाटनस्य कृते कपर्दिकाया एकस्यापि व्ययस्य । देशाटनं ज्ञानवर्द्धकमिति पुरापि मन्यतेस्म तथाचायमुद्घोषः-"देशाटनं पण्डितमित्रता च पाण्डित्यमूलानि भवन्ति चाष्ट"

२—यो मनुष्यो देशान्नाटति, तस्य कूपमण्डूकसादृश्यमक्षतम् । यथा कूपेऽवस्थितो मण्डूको यावत्कूपपरिमाणमेव जगदायामं मन्यते तावत्स्येव देशेऽवस्थितान् जन्तून् जानाति, ततोऽधिकं भूभागमत्यन्ततुच्छैः कृमिकीटैरध्युषितं, शून्यशून्यमनालोक्यं वृथाभूतं च समर्थयते, तथैव देशाटनरहितः शिक्षितोऽपि पुरुषः स्वदेशमेव विधातुः सृष्टौ मूर्द्धन्यभूतं, स्वमेवाचारं सदाचारं, स्वदेश्यानेवादर्शनरधौरेयान् अवगच्छति । एवं स्थितौ च तस्य यथावद्वस्तुविवेकशक्तिर्नोद्भवति तत्फलति शिक्षावैधुर्यम् । मन्यतां यो वङ्गदेशे गृहीतजन्मा लब्धशिक्षश्च स पञ्चनदप्रदेशीयं वर्द्धमानश्मश्रुकचं धृतकरकङ्कणं लम्बमानकृपाणं च पश्यन्नमानुषं सभ्यतासम्पर्कशून्यं ववर्रञ्चोत्प्रेक्षेत मद्रासप्रान्तीयं च नग्नपादं बृहद्दशधौतपरिधानं समुपबृंहितदीर्घशिखं श्यामतनुं च वीक्षमाणो द्वीपान्तरादागतवन्तं प्रतीयात् । एतादृशश्चासौ कदाचिदपि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वास्तविकं ज्ञानं नोपेयान्न वा भ्रातृभावं सह तैः स्थापयितुं प्रभवेत्। कृतपर्यटनो दृष्टतत्तद्भूभागश्च तत्रतत्र वसतां लोकानां व्यवहारादिकं परिचित्य तैः साकं सदेशतायाः सम्बन्धं दृढीकुर्यात्, तेन च सम्भवन्तमुपकारं समधिगत्य प्रमोदेत।

३—देशाटनेन मनुष्यस्य दृष्टिर्विकसति, ज्ञानं समेधते, सहानुभूतिरुत्पद्यते, मिथ्याभिमानो मिथ्याकल्पनाचास्तं गच्छतः। कथं जीवितव्यं, कश्च जीवनक्रमः साधीयान्, कुत्रदेशे वसद्भ्यः किं ग्रहणीयम् इत्यादि सुखं ज्ञायते देशाटने क्रियमाणे। सामाजिकव्यवहारेऽपि नवः पदक्रमः शिक्ष्यते। पुस्तकेभ्यो यज्जानीमस्तत् काल्पनिकं प्रतीयते, तदेव च प्रत्यक्षमीक्षितं सत् पुरोऽवस्थितमिव भवति। देशाटनेन तज्ज्ञानं जन्यते यदाधारीकृत्य संसारे प्रविष्टो निजं जीवनं व्यवस्थितक्रमं कुरुते।

देशाटनसम्भवेनोपकारेणच्छात्रान् लाभान्वितान् विधातुमेव विश्वविद्यालयीयच्छात्राणां सङ्घं शिक्षणसंस्था स्तानि तानि प्रसिद्धस्थलानि दर्शयितुं प्रेषयन्ति।

४—पुराकाले ये ज्ञानसम्पन्ना ज्ञानं सम्बलमादाय जगदुपकर्त्तुमचिन्तयँस्तथाऽऽचरँश्च, ते सर्वे देशाद्देशान्तरं बभ्रमुरेव। बुद्धो भगवान् प्राग्यात्रचक्कयं देशानभ्राम्यत्तदनन्तरमेव तद्बोध उद्बभूव। 'होमर' मिल्टन' प्रभृतयः पण्डिता अपि प्रसिद्धपर्यटका आसन्। यद्यपि सर्वैरस्माभिः समस्ताया भुवः पर्यटनं न सुकरं, परं स्वीयोऽपि देशः सर्वात्मना पर्यटितः सन् महान्तमुपकारं करोति। पूर्वं यावत्यसुविधा पर्यटनेऽन्वभूयत न तावती सम्प्रति। सुलभा सुखदा च यात्रा सर्वैः समनुष्ठेया। तथा विधातारो हि युवानः स्वं जीवनं सफलया सरण्या व्यतियापयितुं प्रभवेयुः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(१२) स्वतन्त्रता।

१ पूर्वाभासः, २ स्वतन्त्रतायाः सुलाभाः, ३ स्वतन्त्रता नोपहारे लभ्या, ४ उपसंहारः

१—आब्रह्मस्तम्बपर्यन्त, माच मेरोर्यावती धातृनिर्मिता धरा, न तत्र किमपि वस्तु तादृशं प्रियं जन्मिनां यथेयं स्वतन्त्रता। अस्या नाममात्रे गृह्यमाणे किमप्यनिर्वचनीयप्रमोदाप्लुतमिव जायते हृदयम्। इमां प्राणेभ्योऽपि प्रियतमां मन्यन्ते लोकाः। सुखं वियुज्यते प्राणेभ्यः, परं कष्टो वियोगः पुनरस्याः स्वतन्त्रतायाः। स्वतन्त्रतामन्तरा जीवनं परमात्मनोऽभिशापं प्रतियन्ति विवेकिनः। यानि वस्तूनि हीयमानानि परितापं जनयन्ति, तेषु सर्वप्रधानमस्याः स्थानम्। अस्याः स्वतन्त्रतायाः प्रतिकूला परतन्त्रता, सा च द्विविधा—

वैयक्तिकी, सामूहिकी च। प्रथमा दासभावादिना जन्या, द्वितीया तु राष्ट्रस्य पारतन्त्र्यादिना समुत्पादनीया। अनयोः कतराधिक रात्तीति निर्णयो न सुकरः, यथैव हि प्रथमा व्यक्तिविशेषस्य सर्वतोमुखं प्रचारं निरुणद्धि, सम्भवन्तमप्युच्छ्रायं बलादिवाकुञ्चयति, तथैव द्वितीया राष्ट्रस्य तेषु तेष्वङ्गेषु सम्भवन्तीं वृद्धिं नियन्त्रयति, सर्वतोगामि समुन्नतिसूत्रं च सङ्कोचयति। परतन्त्रो जनो देशो वा स्वामीच्छया म्रियते जीवति च।

२—स्वतन्त्रतया स्थिति हिं महतः प्रसादस्य दशा, आत्मनि सर्वाधिकारस्य लाभो जगदधीशतायाः सदृशः। अस्यामवस्थायां किमपि क्लेशकरमुपनममानमपि नावगम्यते, सुधाह्रदावगाहिन इव वपुषि स्फुलिङ्गकः। अत एव चाहुः।

"आत्माधीनशरीराणां स्वपतां निद्रया स्वया।
कदन्नमपि मर्त्यानाममृतत्वाय कल्पते"॥

अमूमेव चात्मतन्त्रतां शुद्धे स्वरूपे आत्मारामतामभिदधते, दर्शनविदः। स्वतन्त्रतैव च केवलं शुद्धमानन्दं शान्तिं च प्रयच्छति, तदाहुः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

टी० ब्राउनमहोदया:—"स्वतन्त्रतया जीवन् मुकुटमण्डितमस्तकानां राज्ञां स्पर्द्धामकुर्वाण एव भुवमनधिकुर्वन्नेव च राजराजः" इति। सर्वोऽपि जनः क्षणमात्रमपि स्वातन्त्र्यमासाद्य प्रसीदति जीवने सार्वत्रिकी पुनः स्वतन्त्रता कतमां मात्रामानन्दस्य प्रादुर्भावयेदिति भुक्तभोगा एव जानीयुः।

३—इयञ्चोक्तगुणगौरवा स्वतन्त्रता न केनापि शासनाधिकृतेन दलेन जनेन वा स्वशासने वर्त्तमानाय देशविशेषाय जनवर्गविशेषाय वा प्रदेया, अधिकारत्यागभावनाया महर्षीणामपि मानसेषूदेतुमत्यन्तकठिनत्वात् अमुमेवार्थमाह भारविर्युधिष्ठिरमुखेन—

धृतराष्ट्रसुतेन सुत्यजाश्चिरमास्वाद्य नरेन्द्रसम्पदः॥

ऐतिहासिकमपि ज्ञानं नात्रार्थे साक्ष्यं करोति-यदियं स्वतन्त्रता कस्मैचिदपि देशाटनकेनापि दलेनोपायनीकृतेति, यत्र यत्र स्वातन्त्र्यसङ्ग्रामः प्रचलितस्तत्र तत्र कति कति नाहुतीरग्रहीत्? कानिकष्टानि नासाहयत? कतमां विषमतमां स्थितिं नोदभावयत्, यदि ज्वलच्चिताप्रवेशोऽस्याः कृते कृतसङ्कल्पस्य जनस्य कृते चन्दनलेपः तप्ततैलस्नानं शीतलजलावगाहः, उद्बन्धनं प्रियतमालिङ्गनं, कशाघातश्च सुखसंवाहनं जायते, का कथा कतिपयवर्षावस्थायिकाराप्रवासस्य स्वर्वस्वसमर्पणस्य वा? यः किमपि चैतन्यमाकलयति तेन ज्ञायेत, यदस्या एकस्यैकस्य परमाणोः कृते कष्टसहनस्य पर्वतोऽपेक्ष्यते येषु देशेषु जातास्वतन्त्रता, तदीय इतिहासोऽत्र प्रमाणम्।

४—एवञ्च स्वतन्त्रतायाः प्राप्तये प्रयतमानेन देशेन सर्वथा सर्वाभिमुखं च कष्टं सोढुं सन्नद्धव्यं येन देवीयं प्रसद्यावतरेत्। अस्माकमपि परतन्त्राणां हृदि यावत्स्वतन्त्रतायाः स्नेहो नोदयते तावद्धतभाग्यस्य भारतस्योद्धारो न सम्भवति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(२३) आशा ।

१ अवतरणम्, २ आशया लाभः, ३ नैराश्यम्, ४ आशोज्जीवनप्रकारः ।

१—अहं विद्यार्थी प्रत्यहं प्रातरेव दैनिकं नित्यकर्म समाप्य पठितुं प्रारभे । कठिनं प्रयस्य ज्ञानाय परिश्राम्यामि । समये पाठशालायामुपतिष्ठामि । रात्रौ प्रकाशार्थं दीपं पुरोऽवस्थाप्य पुस्तकं पठामि । शीतातपक्लेशमगणयित्वा, दशतः कटुकीटाँश्चाचेतयित्वा स्वीये पठनकर्मणि प्रवर्त्ते । इत्थं परिश्रमस्य प्रयोजनं पृष्टश्चाभिदधे—'परीक्षायामुत्तीर्णतामाशासे" इति ।

कृषकः क्षेत्रं बहु मूल्यं दत्वा क्रीणाति, प्रत्यब्दं करं ददाति राज्ञे । ईति-भीतिमतिशयितसाधारणस्थितिं सुखं सहते । ग्रीष्मे ललाटंतपेऽपि सूर्ये मृत्स्नां म्रदयति, वपति बीजं नानाकष्टैश्च क्षेत्रं निषिञ्चति, यदि चानुयुज्यते सर्वस्यास्य प्रयासस्य प्रयोजनं प्रत्युत्तरयति—"क्षेत्रेऽत्र सस्यसमृद्धिमाशासे" इति ।

आशापदार्थः कः ? कुत्राशयेऽस्य पदस्य प्रयोगः ? प्रायेवगतो भवदेतावतावतरणेनास्माभिः ।

२—आशामेवावलम्ब्य जगदिदं चलति, जगति यावन्ति कार्याणि भवन्ति तानि तदाधारेणैव । महान्ति नगराणि, गगनचुम्बिन्योऽट्टालिकाः, स्वर्णखचितशिखानि मन्दिराणि, यन्त्रचालिताः कार्यकरा व्यापाराः, आपणाः, उत्सवाः, सर्वाणीमानीदानीं क्रियमाणतया दृश्यमानान्याशामेवोपजीवन्ति । यद्याशा न स्यात्को नाम जनो दुष्कराणीमानि कार्याणि कर्त्तुं मोहेत आशया हि मृतप्रायेऽपि देहे कियतः कालस्य कृते कापि कार्यक्षमा शक्तिरिवायाति, यया जनो बहु व्याप्रियते । यद्याशा न स्यात् को नाम जनः सन्निपातग्रस्तस्य विगतसर्वचेष्टस्यापि मुमूर्षो जीवनाय पणमपि नियुञ्जीत ?

इयं हि भगवत्याशा जीवनदीपस्य तदावरणं येनावृतोऽसौ मह-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

त्यपि वातकृत उपद्रवे नेङ्गते, (दुःखादिना नोपहन्यते) बाह्येभ्यो दुःख-झञ्झावातेभ्यो निजं रक्षति। यदि दुःखमये समये सुखस्याशा नाभविष्यत् केनापि प्रकारेण दुःखमुत्तर्त्तुं नाशक्ष्यत लोकः।

३—आशाया अभावो नराश्यम्, यदा हि जनो जीवनसङ्कटे युध्यमानो नाग्रतः प्रसरणस्य पन्थानं पश्यति तदा निराश इव भवति, जाते च नैराश्ये मनसि कष्टमिव भवति। परिस्थितौ चास्यां यद्याशान्तरमुत्पद्य तां स्थितिं नान्तर्दधीत, बहुनाम हीयते पुंसो दुःखेन विपर्यासितसकलसद्व्यवस्थस्य। आशया हि समधिष्ठिते चेतसि कुतोऽपि हेतोः कृतपदोऽपि पराभवो बलादिव व्यावर्त्यते। अत एव चाहुः—"आशाहि परमं सुखम्" "नैराश्यं परमं दुःखम्"

४—एवं ज्ञाते चास्या आशायाः सुखमयस्वभावत्वे सदेदृशः प्रबन्धः करणीयो येनाशासूत्रं न च्छिद्येत, तथासिद्धिश्चासम्भाव्यविषयकाशाऽननुष्ठानेन सम्भवति। बहवो हि जना अनिश्चितागममायं मनसिकृत्य स्वं व्ययं वर्द्धयन्ति, परमलब्धे तस्मिन्नाये ते कष्टमनुभवन्ति। नहि मेघमाकाशे प्रसरन्तमीक्षमाणो जलप्लवं मनसि सम्भाव्यं स्वं जलपूर्णं कलशं भिन्दन् बुद्धिमत्तया गण्येत। अतः सर्वदा स्वसाध्यकार्यविषयकाशामेव पुष्णन् जनो जातायां सिद्धौ पुनराशान्तरं पुष्णाति। क्रमश्चायमनुवर्त्तमानोजीवनं पुरश्चालयति।

सिद्ध्यत्सु हि कार्येषु जनानामाशासूत्रमनुवर्त्तमानमवतिष्ठते, तत्र चेश्वरे विश्वासः सहायतां धत्ते। यो हीश्वरे विश्वसिति तस्य बुद्धौ प्रतिफलति कस्यापि महतः सहायकस्य करस्य प्रतिबिम्बः, तेन च तदीयाशाया भङ्गस्य सम्भावना हीनता मायाति। इदं हि जगदीदृशएवाशासूत्रेऽवलम्ब्यमानं पुरःकृष्यते नियत्या। भगवान् भूतभावनो भवतु सर्वाशापूरकः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(२४) स्त्रीशिक्षा ।

१—अवतारणा, २ स्त्रीशिक्षाया आवश्यकता, ३ स्त्रीशिक्षायालाभः, ४ स्त्रीशिक्षा कीदृशी हिता, ५ उपसंहारः ।

१—येन शारीरिक-मानसिक-नैतिकशक्तीनां मनुष्यगतानां विकासः सञ्जायेत तदेव शिक्षापदेनाभिदधति । मनुष्याणां हि तास्ताः शक्तयो शिक्षया विकसन्ति, विकसितशक्तयश्च लोकाः स्वं कर्त्तव्यं परिचिन्वन्ति, आचरणं परिनिष्ठापयन्ति, धर्ममनुरुध्यन्ते । अतश्च यया (शिक्षया) स्त्रियः स्वं कर्त्तव्यं परिज्ञाय स्वे धर्माचरणे पालयेयुः सा स्त्रीशिक्षा शिक्षा कथ्यते ।

२—पुरुषाणां सहायतया परिवारस्य पालनं, स्वबालकेषु गुणगण-साहसोत्पादनं सांसारिककार्य-क्लिष्टानां पतिपुत्रादिप्रियपरिवारपरिजनानां स्वैर्मधुरैरालापैः प्रसादनं च स्त्रीशिक्षाया लाभमाहुर्विचारकाः । यदि साध्वी शिक्षा न स्त्रीभिरधिगता कार्याणीमानि साधु न सिद्धयन्ति, वैरस्येन वैषम्येण च क्रियमाणान्यपि कार्याणि न सन्तोषायालंभवन्ति । बहवः पुनर्जनाः स्त्रीणां शिक्षायां विप्रतिपद्यन्ते, तेषां हि मते ताः पाके, गृहप्रबन्धे, बालानां पोषणेवाधिक्रियेरन्, शिक्षिताः सत्यो हि स्त्रियो नश्यन्ति लब्धाध्ययनप्रकाशाश्च ताः पुरुषैः सह स्पर्द्धेरन्, परमिदं तेषां दुरुक्तं पुरतः प्रदर्श्यमानाभिर्युक्तिभिर्निराकरिष्यते ।

३—(क) प्रबन्धः पाकालयस्य न सर्वसाधारणानुष्ठेयस्तदर्थमपि ज्ञानराशिरपेक्ष्यते, अत एव च द्वित्रा नलभीमादय एव पाकपण्डिताः परिगणिताः, अत्र विषये नलपाकप्रभृतयो ग्रन्था अपि दृश्यन्ते, न चान्तरेण साधीयसीं शिक्षां कस्यापि पाककलायामीदृश्यां सम्भवति प्रवेशः । अतः स्त्रीशिक्षाऽपेक्षिता ।

(ख) स्त्रियो हि गृहाधिष्ठात्र्यो मन्यन्ते, जगति यावन्तोऽभ्युदय-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भाजो दृश्यन्ते जनास्तेषां देव्योऽवश्यं प्रबन्धचतुरा स्युरन्यथा बहूर्जयन्तोपि पुरुषाः स्त्रीभिरनावश्यकवृथाव्ययविनियुक्तधनास्सन्तोऽत्यर्थमुद्विजेयुः क्लेशं च सहेरन् ।

(ग) बालाः शिक्षिताः स्युरित्यपि गृहस्थानां कर्त्तव्येषु प्रधानं कर्त्तव्यमेतच्च कार्यं यथा दयाद्रुतचित्ताभिः स्त्रीभिः साधु सम्पाद्येत न तथा पुरुषैः, अशिक्षिताश्च मातरः कथमिव तदनुष्ठाने प्रभवेयु रतः साधु विना द्रव्यव्ययं सन्ततीनां जीवनं शिक्षया समुत्कर्षयितुमपि स्त्रीणां शिक्षणमावश्यकम् ।

(घ) "सत्यां शिक्षायां स्त्रियो नश्यन्ति" इति यदुक्तं न तन्मनोहरं सत्यं दुश्शिक्षया तथा भवति, हेया च सा, परं शिक्षा तु तासां पातिव्रत्ये निष्ठां, प्रेमपरायणतां, दासीपदगौरवं च समेधयति ।

(ङ) शिक्षिताः स्त्रियः पुरुषैः स्पर्द्धेरन्नित्यप्यलीकमेव वचः, शिक्षया जनितविवेकानां तासां कर्त्तव्यज्ञानोदये जाते स्पर्द्धाबुद्धेरेव बाधपराहतेः, प्राचीनमादर्शं पुरतः कृत्वा प्रदीयमानया शिक्षया मनसः साधुपथे प्रवृत्तिः सम्पाद्यते तथा च स्पर्द्धायाः कथैव नोदयते ।

४-साधुनि तत्त्वावधाने भारतीयमादर्शं पुरस्कृत्य दीयमानया स्त्रीशिक्षया देशस्य समाजस्य जातेश्चोपकारो भविष्यति । शिक्षायां नियुज्यमाना विषयाश्च—परिवारपरिचालनप्रकारः, चिकित्साशास्त्रम्, इतिहासभूगोलौ, नीतिशास्त्रम्, इत्येते स्युः स्त्रीणां कृते विश्वविद्यालयीयोपाधिप्राप्तिर्नापेक्षिता, न वा केवलमक्षरमालिकापरिचयमात्रमुपयुज्यते, उभयथापि दोषदर्शनात्, अतिशयिशिक्षाया गृहप्रबन्धेऽनुपयुक्तत्वादक्षरज्ञानमात्रेण च शिक्षोद्देश्यासिद्धेः, अतः साधुविविच्य निर्धार्यमाणा शिक्षापद्धतिः स्त्रीणां सुखोदर्कतायै युज्यते ।

५-यत्र परिवारे स्त्रियो न शिक्षिताः सत्यं स परिवारो दुःखभाक्, कलहालस्यवैराणां सततप्रतिष्ठानास्पदस्य तादृशस्य परिवारस्य दुःखभागितायाः अविवादसिद्धत्वात्, दारिद्र्यं, बालमूर्खत्वं,

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

परस्परमप्रीतिश्च तत्र सदा वसतीति ध्यात्वा सवः स्वाः बालिकाः शिक्षणीयाः, स्त्रीणां शिक्षया हि कुलमुज्ज्वलं श्रीसमृद्धिश्च समुदयत इति।

(२८) लोभः पापस्य कारणम्।

१ अवतरणम्, २ लोभप्रभावः, ३ लोभफलम्, ४ लोभत्यागे लाभः, ५ उपसंहारः।

१—अन्यदीयस्य धनस्य पदार्थान्तरस्य वा लाभाय यो मनसि मनुष्याणां दुरभिलाष उदयते स एव लोभः, अभिलाषमात्रं न लोभः, स्वेनोपार्जितस्य, श्रद्धयाराधिताद्देवद्विजादेर्वा प्रार्थ्यमानस्य वस्तुविशेषस्याभिलाषे लोभव्यवहाराभावात्। वस्तुतस्तु-अनुचितक्रमेण लब्धुमिच्छैव लोभः, अत एव तरुशिखरवर्त्तिपरिणतफललिप्सया तरुमारोहतो दैववशाज्जाते विनिपाते 'लोभेनात्माव्यापादितः' इति व्यवह्रियते।

२—लोभे एतावती मोहनी शक्तिस्तिष्ठति यदनेनावृते चेतसि सत्प्रवृत्तयो न स्थितिमुपयन्ति। योद्य स्वचारित्रगौरवेण सम्मानमासाद्य कुलस्य, समाजस्य, अभिजनस्य च मुखमुज्ज्वलता मनैषीत्, स एव श्वो लोभवशंवदः सन् किमपि चौर्यादि कुकर्म कृत्वा व्रीडावनतशिराः सन् कुत्रापि कोणे स्वं मुखं गोपयति।

अयं हि लोभः साधुमसाधुं ज्ञानिनमज्ञानिनं दातारं च कठिनस्वान्तं करोति, न्यायान्यायविवेकं भ्रंशयति, मनुष्यस्य मनुष्यतां च नाशयति। लोभोपहतचेतनो हि जनोऽकार्यमपि कार्यं मन्यते, क्षुद्रेभ्योपि वस्तुभ्यः सत्यभाषणाय जलाञ्जलिं वितरति, निन्दां सहते, नरहत्यासदृशेऽपि कुत्सिते घोरे च कर्मणि प्रवर्त्तते,। लोभेन कदर्थितस्य कर्तव्यज्ञानं तथा विपद्यते यथासौ दरिद्राणां मुखात् कवलं बलादादत्ते, सतीनां सतीत्वं नाशयति, प्रियां पत्नीं च पत्या वियोजयति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

३—लोभिनो लोभस्य यावत्यधिकमात्रा प्रवृत्तिरपि तदनुसारेणैव घृणिता, शतमर्थयमानो निभृतमनाश्रितप्राणघातचेष्टश्च चौर्यमाचरति, सहस्रमीप्सुश्च साहसेन चौर्यं प्रवर्त्तते, लक्षं लिप्सुर्दलबद्धां दस्युतामाश्रयति, (औरङ्गजेबवत्) साम्राज्यमधिजिगमिषुश्च भ्रातॄन् मारयति, पितरं च क्लेशयति। लोभिनो हि जनाः स्वनिन्दां सहमानां परकीयसम्पदपहरणप्रवृत्ताधूतास्सन्तो नानाविधां यातनां भुञ्जते, लोभेनाधिकं भुञ्जाना नानाविधै रोगैश्चुलुकितस्वास्थ्या अकाल एव कालकवलिता भवन्ति।

४—योहि जनो वस्तुतो मनुष्यजीवनं यापयितुमिच्छेत्तेन मनुष्योचित इन्द्रियसंयमः सेवनीयो लोभश्च दमनीयः। लोभे त्यज्यमाने मनुष्यस्यात्मा बलवद्भावं भजति। केनापि विश्वस्य भवति न्यस्यमानं निधिं यदि समये भवान् परावर्त्तयति तदा भवदीयं गौरवं न हीयतेऽथ लोभमहिम्ना तदन्यथा पन्था आश्रीयते सदाकृते पातित आत्मा लज्जापयोनिधौ। एवं करणे सति लोकानां घृणापूर्णस्य दृक्पातस्य पात्रत्वमुपैष्यति भवान्। मानुष्यकं भवन्तं हित्वा पलायेत, पशुत्वं च भवति स्वं पदं विदधीत। अयमपि नियमो नास्ति यद् यो लोभी नास्ति स सदा दरिद्र एव तिष्ठति इति। दानिनो निर्लोभाश्चापि पुरुषा धनिनः कीर्त्तिभाजश्च दृश्यन्तेऽतो लोभमाश्रित्य वृथा कीर्त्तिलाभस्वरूपयोग्यतां विपादयन्ति लोभोपासकाः।

५—अतः स्वामार्थिकीं मानसिकीं चोन्नतिं कामयमानैरारम्भत एव लोभत्यागाय यतनीयम्, आदित एवात्र विषये विधीयमानोऽभ्यास एव परिणामे महतावेगेन सम्भवन्तं लोभकृतमभिभवं निरोद्धुमीष्टे। आवश्यकश्च लोभस्य त्यागः तस्य परिणामे विपदावहत्वदर्शनात्, क्षीरे पतन्तीनां मक्षिकाणां, कर्कटधृतगलस्य बकस्य च दृष्टान्त मत्रोपस्थापयन्ति पण्डिताः। अमुमेवार्थसारमत्र निधायाहुः "लोभः पापस्य कारणम्"—इति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(२६) कर्त्तव्यपालनम् ।

१—परिचयः, २ कर्त्तव्यपालने लाभः, ३ उदाहरणम्, ४ एतदभावे क्षतयः ५ उपसंहारः ।

१—स्वेच्छया, परकीयनियोगेन वा मयाऽविरोधमङ्गीकृतेन निधीयमानः कार्यभारो मे कर्त्तव्यम्, अस्यैव कर्त्तव्यस्य पालनम् अस्माकं सामाजिकानि दैशिकानि जातीयानि च बन्धनानि निर्माति। मनुष्याणां जीवनं कर्त्तव्यपरंपरयोपनिबद्धम् । आजन्मनो मरणपर्यन्तं मनुष्याः कर्त्तव्यपालन एव नियुज्यन्ते। तेषु कर्त्तव्येषु बहूनि परमात्मना समर्प्यन्ते बहूनि चास्माभिः स्वयमाधीयन्ते । एतच्च कर्त्तव्यं प्रतिव्यक्ति भिद्यते।

२—कर्त्तव्यपालनमेव वस्तुतो मनुष्याणां मनुष्यत्वं महत्त्वं च सृजति, संसारे नानाविधा मनुष्याः सन्ति, परं सर्वे कर्तव्यपरायणा न भवन्ति। यः कर्त्तव्यं पालयति स एव समाजस्य रक्षक आदर्शभूतश्च मन्यते, सर्वेषामादरं चाधिकरोति । अत्र संसारे या जातिर्यावत्यां मात्रायां कर्त्तव्यनिष्ठा तया तावती समुन्नतिः कृता । कस्यापि समाजस्योन्नतिस्तावन्न भवति यावत्तदवयवभूता जनाः प्रत्येकं स्वंकर्त्तव्यं न चेतयन्ते, न पालयन्ति च ।

३—कर्त्तव्यपालनाय मनसो दृढ़ता परमापेक्षिता । जीवनसंग्रामे नानाविधा विघ्नबाधाः समुपस्थाय कर्त्तव्यपालनं प्रतिबध्नन्ति । तत्र कतिपये मनुष्यामुह्यन्ति, परं कर्मवीरास्तत्रापि स्वं कर्त्तव्यमनुस्मरन्ति, पालयन्ति च । यस्य हृदयं दृढ़ं नास्ति, स लज्जया घृणया भीत्या च कर्त्तव्यपालनात् पृथक् संजायते, परं हृदये दृढ़तां दधानाँस्तु कापि लौकिकीशक्तिः कर्त्तव्यपालनान्न च्यावयति। जाते हि कर्त्तव्यज्ञाने तद्विरोधिभावाः स्वयमन्तर्धातुमारभन्ते। अस्यैव कर्त्तव्यपालनपरायणत्वस्य प्रभावेण प्रातः-स्मरणीयनामा महामना राजाहरिश्चन्द्रो निजे नयनकनीनिकापेक्षया प्रियेऽपि पुत्रे रोहिताश्वे दाहनीये स्वां महिषी-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मपि श्मशानकरमकल्पितस्वरमयाचत, परशुरामश्च पितुर्वचनं रक्ष्यं मन्यमानो जननीं रेणुकां परशुधारया गलेऽच्छिनत्, आधुनिकेपि युगे विद्यासागरेश्वरचन्द्रगान्धिमहात्मप्रभृतयस्तानि तानि कार्याणि कर्त्तव्यपालनपरायणतयैव व्यधिषत, यानि कर्त्तुं सर्वसाधारणः कम्पेतेव। न केवलमस्माकं भारते किन्तु देशान्तरेऽपि महानस्यादरः इग्लैण्डदेशे आधुनिक एव युगे गैस्काइनजजमहोदयो निजस्य राज्ञस्तनयायैव कारावासदण्डमदात्।

४—यः स्वं कर्त्तव्यं न पालयति, स स्वस्य परिवारस्य, समाजस्य, देशस्य च महतीं क्षतिं विधत्ते। मन्यतां यदि पिता स्वं कर्त्तव्यं स्वस्य सन्तानस्य शिक्षणं न करोति, तदा दुष्टासु वृत्तिषु व्यासक्तस्तदीयः पुत्रः किं ग्रामं नोपद्रवति, परिवारं न पीडयति, समाजं न क्लेशयति, देशं वा न सङ्कोचयति निजया नीचवृत्त्या। राजा यदि प्रजानां रक्षाया उपायेषु न दत्तावधानो भवेदवश्यमसौ देशो विपद्येत, राज्ञोऽकर्त्तव्यनिष्ठत्वात्। एवमेव प्रजास्वपि राजनि विरज्यन्तीषु तासां क्षतिरेव भवति कर्त्तव्यराजभक्तिविमुखत्वात्तासाम्। एवमेवान्यत्रापि कल्पनीयम्।

५—कर्त्तव्यपालनं जीवनस्य वास्तविकं महत्त्वस्थानम्। अस्माभिश्चास्य महत्त्वस्योपलब्धयेऽवश्यमायसनीयं, यस्य देशस्य समाजस्य वा जनाः पृथक् पृथक् सङ्घातभावे च कर्त्तव्यपालनं प्रति सतर्कास्तेषु तेषु देशेषु समाजेषु चलदमीः स्वं स्वाभाविकं चाञ्चल्यदोषमपास्य निवसति। अतोऽस्माभिरपि कर्त्तव्यपालनप्रवणै र्भाव्यम्, एवं हि सर्वविधोन्नति भाजनं स्याम नान्यथेति।

---

(२७) देशभक्तिः।

१ परिचयः, २ वास्तवदेशभक्त्या मनुष्यो देशस्य गौरवं ध्यायति ३ अस्याः सम्पत्तिमन्तरापि साध्यत्वम् ४ उपसंहारः।

१—स्वस्य देशस्य कृते मनुष्याणां हृदये च आदरस्स एव 'देश-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भक्ति' रित्याख्यायते, अर्थात् यस्मिन् देशे यस्य जन्म तं देशं प्रति तदीया भक्तिर्देशभक्तिपदेनाभिलष्यत इति, इयमतिपूता मनोदशा मानवानां मनसि तिष्ठन्ती तदुद्द्योतयति, ते च मानवाः सभ्या असभ्या वा स्युरत्र न कोपि निर्बन्धः। जगतोऽन्येभ्यो देशान्तरेभ्यो निजेदेशे स्नेहाधिक्यमेवास्याः स्वरूपम्, तथाचाह कूपरः "अहम् इङ्गलैण्डदेशं सत्स्वपि तत्र बहुषु दोषेषु सर्वतोऽधिकं स्नेहस्य भाजनं मन्ये" इति एतदनुध्यायैव श्लोकोप्ययमारच्यत—"जननी जन्मभूमिश्च स्वर्गादपि गरीयसी"

२—मनुष्याणां मनसि जाते देशभक्तिप्रवेशे तदीयं जीवनमेव देशस्य कृते भवति, ते तत आरभ्य तदीयां स्थितिमुन्नमयितुमेव प्रयतन्ते, ते तथैव तदीयस्य सम्मानस्याभिलाषुका जायन्ते, यथा गुरुभक्तो निजगुरोः, तादृशा हि मानवाः प्रतिक्षणं सर्वविधमपि त्यागं स्वीकर्त्तुं सन्नद्धाः न केवलमेतावतैव ते निवृत्ततर्षाः, परं सत्याभावश्यकतायां ते स्वान्प्राणानपि पणीकर्त्तुं कृतसङ्कल्पास्तिष्ठन्ति, एतादृशाश्च देशभक्ता न कस्याञ्चिदपि दशायां स्वसिद्धान्ताच्च्यवन्ते, अत एव च परमेश्वरस्य लोकस्य च स्नेहमर्जयन्ति।

३—अस्यां च देशभक्तौ सम्पत्ते रावश्यकता नापतति येन धनिजनमात्रविधेयता स्यात्, न वा प्रतिपदं दीर्घदीर्घस्य त्यागस्यैवावश्यकत्वमस्ति,। सर्वास्वप्यवस्थासु सर्वैरपि मनुष्यैरात्मरुच्या स्वनिर्णीतक्रममनुसृत्य विधातुं शक्येयं देशभक्तिः, तदीया मात्रा लघ्वी बृहती वा भवतु, न विशेषे विदुषामिहाग्रहः। सम्पदागमं प्रसिद्धिं चाननुरुध्य, स्वशक्त्यनुसारेण लघुतमेनापि सदुपायेन क्रियमाणा देशभक्तिर्वस्तुतो देशभक्तिपदमधिकरोति, यद्येतावता देशस्य कोपिमहांल्लाभो नास्ति, मास्तु, हानिरपि नास्तीदमेव बहु। इयं च देशभक्तिर्मनुष्यमात्रस्य कर्त्तव्या बाध्यते चानया मनुष्यमात्रस्य मनुष्यता, कस्यापि पुरुषस्य जीवनं, चिन्तनं, कार्यानुष्ठानं च यदि स्वदेशस्य कृते भवति तदा तस्य धन्यता। कस्य जनस्य देशभक्तिः कियतीति परीक्षायां तदीयस्य

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

त्यागस्य मात्रायाः परीक्षणं नोपयुक्तः पन्थाः, मन्यतामेको धनिको दशलक्षमिता मुद्रा देशस्य सेवायां नियोजयति, एकश्च भिक्षुर्दिवसं भ्रांत्वा पञ्चपणानासाद्य तानेव देशार्थं समर्पयति, कोऽनयोर्भक्ततर इति जिज्ञासायां यदि धनगौरवं परीक्षासाधनं मन्येत प्रथमोऽधिगच्छेत्प्रामुख्यं स्नेहे पुनः परीक्षासाधनत्वेन स्वीक्रियमाणे चरमस्योत्कर्षः सिद्ध्यति। युज्यते चेदम्, न कोऽपि देवो द्रव्यगौरवे दत्तावधानो मनोऽनादरभाजनं विधातुं क्षमः। एष हि समाजस्य दासभावं चिरान्निषेवमाणस्य पतितायाः मनोदशायाः परिणामो यदखिलेष्वपि क्षेत्रेषु धनिकाः कृतपदार्पणमात्राः पुरस्सरास्सन्तोऽधिकस्यादरस्य भाजनानि विधीयन्त इति।

देशभक्तौ भूमिकाभूतायाः स्वदेश्यवस्तुषु प्रीतेः पालनमात्रेऽपि विधीयमाने कियत्यामात्रया देशभक्तिः कृता भवतीति ततोऽधिकां सेवां कुर्वन्तो भृशं देशभक्ताः कथयितुं शक्याः।

अस्य देशभक्तिवह्नेर्ज्वाला यस्य हृदये कृतास्पदा तस्य कार्यान्तरेभ्यो विरक्तिर्जायते, जीवनसाधनमात्रमर्थयमानस्य तस्य जातायामपि कार्यान्तरप्रवृत्तौ तदर्थतामात्रमवगन्तव्यम्। उदाहरणानि चात्र बहूनि सम्भवन्ति, महात्मगान्धिप्रभृतयो देशभक्ताः प्रसिद्धा एव विदेश्यदेशभक्तेष्वपि बहवो नामग्राहं—डिवेलरा, मैजिनो, प्रभृतयो निर्दिश्यन्ते। तेषां हि कष्टमयमविश्रामं च जीवनं कन्न सचेतसं स्वाभिमुखमाकर्षेत्?

४—देशोऽसौ धन्यो यदीयासु सन्ततिषु देशभक्ताः प्रसूयन्ते, यानाश्रित्य तदीय उत्कर्षः प्रसिद्ध्यति, धन्याश्च ते देशभक्ताः कल्पद्रुमा येषां घनासुच्छायासु देशः सुखशान्तिमृच्छति। यत्र च देशे नेदृशा देशभक्ता जायन्ते तस्य देशस्य भाग्यं चिराय सुप्तमिव प्रतीमः। भगवानस्माकं देशे देशभक्तानेव भूयसो भावयतु।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(२८) पितृभक्तिः ।

१ अवतरणम्, २ पितृभक्तेः करणीयतायां हेतवः, ३ पित्राज्ञाया अमीमांस्यता, ४ उपसंहारः ।

१—माता च पिता च पितरौ, तयोर्भक्तिः पितृभक्तिरित्याख्यायते, सर्वैरपि प्राणभृद्भिः पित्रोर्भक्तिराचरणीया। एष हि जातमात्रस्य मनुष्यस्य धर्मो यदसौ पित्रोर्भक्तिं विदधीत, पितरौ हि सन्तते र्जननपालनप्रभृतौ यं प्रभूतं क्लेशं सहन्ते तं ध्यायता तथा विधातुमुचितं यथा तौ सन्तुष्येताम् । अत्रार्थे भगवान्मनुः—

"यं मातापितरौ क्लेशं सहेते सम्भवे नृणाम् ।
न तस्य निष्कृतिः शक्या कर्त्तुं वर्षशतैरपि ॥"

तयोर्भक्तिश्च तदाज्ञानुवर्त्तनेन यथा विधातुं शक्यते न तथा प्रकारान्तरेण, अस्माकं शास्त्राणि हि पितरं परमात्मानं मातरं च विश्वेश्वरीं आह्वयन्ति तयोर्भक्तेरावश्यकतां समुद्घोषयन्ति । न केवलं शास्त्रमात्र दृशामत्रार्थे निर्बन्धः, परं लोकवृत्तमनुवर्त्तमानानां युक्तिविदामप्यत्रास्ति भावः—पित्रोर्भक्तेरनुष्ठाने मनोवैज्ञानिकप्रकारेण जायमानस्य लाभस्यानुपेक्षणीयत्वात् । तथाहि पित्रोरन्तरङ्गाणि स्वरेतोनिर्मिते पुत्रे कियतांशेन वर्त्तमानानि मन्यन्ते विचारकाः, पुत्रेण हि पित्रोराज्ञायां पालितायां जायमाने तदन्तस्तोषे तदंशभूते।पुत्रान्तरङ्गेपि प्रीतेः प्रसादस्य चोदयसम्भवात् ।

२—नास्ति नामात्र संसारे कोपि तादृशो यः पित्रोरपेक्षयाऽस्मास्वधिकं स्निह्येत् (यदि स्निह्यति, मन्यतां वञ्चयिष्यति) तौ हि स्वभावतः शुभचिन्तकौ, क्लेशमविगणय्य पालकौ, तयोर्हि मनोगताः पुत्रविषयकशुभभावनाऽसमुद्रतटप्रसृतवालुकाराशिवदसङ्ख्याः । तौ यावदुपकुरुतस्तावतः प्रत्युपकारस्य शक्तिः प्रायः पुत्रे न सम्भवति। पितरौ हि नो जनयन्ति, भोजयन्ति वस्त्रादिना वृण्वन्ति, शिक्षयन्ति, केन लोभेन व्यापार्यमाणयोस्तयोरमूषु क्रियासु प्रवृत्तिः ? केवलं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पुत्रस्य शुभोदर्कतामभिलष्यैव तौ तथाऽऽचरतः। तौ ह्यनुक्षणं सन्ततीनां सुखसम्पदमेव चिन्तयतः, न तयोः कृते कोऽपि जगति परः प्रमोदोऽधिकः स्वपुत्रप्रसन्नतायाः प्रमितेः। पितरौ हि स्वस्य तनयस्य सम्माने स्वंसम्मानमेव कृतं समर्थयन्त इति प्रत्यक्षं चक्षुष्मताम्। अत एव च पित्रोर्भक्तौ क्रियमाणायां क्रियतांशेन प्रत्युपकृतमिव भवति, ऋणनिष्क्रयणमिव विहितं भवति, स्वशिरसि धृतो भारविशेष इव लघूकृतो भवतीति मनसिकृत्य जनुष्मतामनुष्ठेया पितृभक्तिः।

३—कोऽपि पितृभक्तिशाली पुत्रः पित्रोराज्ञायाः-कर्त्तव्याकर्त्तव्यतां न चिन्तयेत् तथा कुर्वन् हि पुत्रः स्वस्य पितुश्च बुद्धिमत्तरत्वमिव परीक्षितुं प्रवर्त्तते न चेदमुचितम्। अतः पित्रोराज्ञा यथा वेदाज्ञा तथा मीमांसनीयतां नार्हति। अस्यामेव परिस्थितौ परशुरामः पित्रादिष्टो जनन्या रेणुकायाः शिरोऽच्छिनत्, न चेदृश्या आज्ञायाः क्रूरतरा कापि सम्भवत्याज्ञा। भगवान् रामचन्द्रोऽपि पितुराज्ञाया अनुवर्त्तनं विना हेतुप्रश्नमेव चक्रेऽत एव चाद्यावधि तच्चरितमादर्शतया मन्वते मनुजाः। आसतां पौराणिकेतिवृत्तानि, ईश्वरचन्द्रविद्यासागरमहोदयो निजमात्रा गृहमागन्तु माज्ञप्तो जीविकासाधनं कैङ्कर्यं विमुच्य मध्येमार्गं कूलमतिक्रम्य वहमानां समुपजातजलप्राचुर्यामकरादिसङ्कुलामपि दामोदरनदीं बाहुभ्यामतरत्। नेयमतिप्रत्नाकथा। नैतावदेव, अन्येऽपि महापुरुषाः, येषामितिहासेनेयं मानवजाति गौरवशालिनी (यथा—वाशिङ्टन, नेपोलियन्, अलेक्जाण्डरमहान् प्रभृतयो महापुरुषाः) सर्वेऽपि पित्रोराज्ञामनुवर्त्तन्तेस्म। एषां विषये विशिष्य जिज्ञासमानैरितिहासस्य तानि पृष्ठानि पठनीयानि येष्वमीषां जीवनस्य ता भक्तिघटना श्चित्रिताः।

४—अतो महत्त्वं कामयमानैः, स्वसन्ततीनां जीवनस्यादर्शं व्यवस्थापयितुमभिलष्यद्भिः, क्रमेणानेन समाजमुन्निनीषद्भिश्च पितृभक्तिराचरणीया। जन्मग्रहणं न केवलं हि कीटपशुवदुच्छ्वस्य मरणाय मनुष्याणाम्। "जायतां जनकयोर्भक्तिर्जगति समेषु जनेषु" इति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(२६) अतिथि-सेवा ।

१-परिचयः, २ अतिथिसेवाया धार्मिककर्त्तव्यरूपता, ३ आधुनिक-'पार्टी' महेष्वतिथिसेवाभावनाया अभावः, ४ वास्तविकी अतिथिसेवा तदुदाहरणञ्च ५ उपसंहारः ।

१—स्वपरिवारपृथग्भूतस्य कस्यापि व्यक्तिविशेषस्याकस्मिके पूर्वतोऽवगतेऽपि वा समागमने तदुचितस्वागत-भोजन-वासादिप्रबन्धविधानमतिथिसेवा नाम। इयं च मानवानां हि दैनिककृत्येषु गण्यते गृहमेधिनां कर्त्तव्येषु सन्ध्यावन्धनपूजावलिविश्वेदेवादिभिरेव सहातिथियज्ञो हि समुपदिश्यते तदधिकृतेन शास्त्रेण। नचात्र यथेच्छा प्रवृत्तिरादिश्यते शास्त्रकृद्भिः, गृहमेधपदेन प्राधान्येनास्यैव कर्मणः सङ्केतितत्वात्, अस्या वैमुख्यं हि—महतः सामाजिकसेतुरक्षकस्य-धार्मिकस्य च कर्त्तव्यस्य त्यागरूपतयाऽमर्षणीयमागः ।

२—इयमतिथिसेवा च धार्मिककर्त्तव्यतया मनुष्याणां करणीयेष्वन्यतमा, इमामुपासीनस्य पुंसो यदा कदाचिदुपस्थिताय स्वातिथये यथाशक्तितदुपयोगिसुखसामग्रीसमुपस्थापनं कर्त्तव्यम्, अस्मिन् हि कर्मणि शुद्धा धार्मिकी भावना यदि प्रयोजिका तिष्ठति तदेदं साध्वनुष्ठितं भवति। लोको हि स्वधनिकत्वप्रख्यापनाय समाजे स्वं गौरवं व्यवस्थितं विधाय कस्मैचिल्लाभाय स्वकृतपूजाजपादिप्रसिद्धये वा महदपि कष्टं बहुमपि च व्ययं सोढ्वापि महतो महतो निजजातीयान् जनसमूहान् ब्राह्मणवर्गान् अधिकारिनिवहान् वा मिष्टमिष्टं च भोजयति, न च पश्चात्तपति परं कस्मिंश्चिदपरिचिते रात्रिमात्रस्य कृते वासमात्रं मुष्टिमेयं भोज्यमन्नं वाऽर्थयमानेऽतिथौ समुपस्थिते वागेव क्वचन लीयते, बुद्धिरेव पलायते, श्रोत्रेन्द्रियमेवाथवा विपद्यते । नचेदमुचितम्, अतिथिसेवा हि दयया, नैतिकतया, नम्रतया च प्रवर्त्स्यते, न सम्पद्गौरवेण लोके विक्रमप्रदर्शनसमीहया वा ।

३—आधुनिकेषु हि 'पार्टी' प्रभृतिभोज्यसमारोहेषु नास्याः सेवा-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भावनायाः समादरो दृश्यते, तत्र हि कस्यापि राजनीतिकोद्देश्यस्य प्रच्छन्नस्य लोभविशेषस्य भावान्तरस्य वा मनोनिष्ठमालिन्यव्यञ्जकस्य निभृतं निलीय वर्त्तमानत्वात्। अत एव चेदृशेषु समारोहेषु सम्मिलितवतामपि क्वापि सहानुभूतिः सह तदनुष्ठातृमहोदयेन जायत इत्यर्थं विप्रतिपद्यन्ते विबुधाः।

४—पुरा हि भारते, ग्रीकदेशे, देशान्तरेषु वा यत्र तत्र महानस्या अतिथिसेवायाः प्रसार आसीत्, अतिथयो हि स्नेहेन सदक्रियन्त, अभोज्यन्त, अध्यवास्यन्त, अन्वध्यायन्त च। सति स्थितिविशेषे स्व जीवनं संशये निपात्यापि समायातस्यातिथेः सेवा क्रियमाणा दृश्यत इतिहासेषु। कतिचिद्दिनान्युपोष्य पारणां कर्त्तुं प्रवर्त्तमान एव युधिष्ठिरे कोप्यतिथिरायातस्तत्पारणापदार्थस्य भागमेकमयाचत, युधिष्ठिरश्च सर्वमपि तं तस्मै समर्प्य तदपि दिनमुपवसतिस्मेति पुराणानि प्रतिपादयन्ति, नैतावदेव, स्वतनोरपि मांसमुत्कृत्य दत्तवन्तोपि महामनसोऽस्माकं श्रवणयोर्गोचरतां गताः। को नाम भारतीयो महावीरस्य कर्णस्य नाम न कर्णकुहरे कृतवान् स्याद्येन प्रच्छन्नरूपायातिथितया समुपागतायेन्द्रायजीवनव्यापत्तिकरप्रदाने अपि कवचकुण्डले प्रादायिषाताम्। अन्यान्यपि सम्भवन्त्युदाहरणानि निर्देशसहानि।

५—एतावताऽतिथिसेवा गृहस्थानामवश्यकर्त्तव्यतया समर्थिता, शास्त्राण्यपि धर्ममिममनुमोदयन्ति तथा च—"अतिथिः किल पूजार्हः प्राकृतोऽपि विजानता" इति।

अन्यच्च—"उत्तमस्यापि वर्णस्य नीचोऽपि गृहमागतः
पूजनीयो यथायोग्यं सर्वदेवमयोऽतिथिः"।

न केवलं शास्त्रानुवर्त्तिभिरेव, लोकसङ्ग्रहकामनाशालिभिः सामाजिकस्थितिसमुन्नतिप्रार्थिभिरपि समादरणीयोऽयमतिथिसेवाभिधानो धर्मः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(३०) उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः ।

१ अवतरणम्, २ परिभाषादिः, ३ दृष्टान्तः, ४ उपसंहारः ।

इह संसारे यावन्तः प्राणिनः सन्ति, सर्वेष्वपि तेषु शुभाभिलाषः प्रकृत्याप्रयोजितो वर्त्तत एवेति निश्चितम्। नचैतावतैव ते सर्वे शुभमभिमतमधिगच्छन्ति, केवलस्याभिलाषस्य फलं प्रति जनकताया अस्वीकारात्। एवञ्चाभिलाषे सत्यपि यं विना शुभं न सिद्ध्यति स कः पदार्थ इति जाते प्रश्ने 'उद्योगः' इत्युत्तरं बोध्यम्, तदभावश्चालस्यरूपः सकलाभीष्टप्रतिबन्धकर इति फलति, उच्यते चार्थद्वयमपीदमधोनिर्दिश्यमानेन श्लोकेन—

"आलस्यं हि मनुष्याणां शरीरस्थो महान्रिपुः
नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति"।

२—उद्योगो हि नाम स्वाभिलषितार्थप्राप्तये दृढेन सङ्कल्पेन बाधामगणितां कृत्वा प्रवृत्तिः, अयमेवचोद्योगः, उद्यमः, पुरुषकारः, कर्म, इत्यादिपदैरभिलप्यते,। अमुमेव चोद्योगं सेवमानः कष्टपरम्परां न गणयति, 'क्लेशः फलेन हि पुनर्नवतां विधत्ते' इति ध्यायन् प्रवर्त्तते सोत्सवं तत्र, तथाहि कोपि वाणिज्यव्यवसायी देशाद्देशान्तरं पर्यटन् यात्रायां नानाविधानि कष्टानि भुङ्क्ते, कृषीवलश्च मृत्स्नां मृद्नाति, वपति, स्वहृदयरुधिरकणैरिव पृषतैः पयसां सिञ्चति, विद्यार्थी च कश्चित् ज्ञानसम्पादनाय निशां दिवा करोति दिनं च नयने अक्षरेषु व्यासज्य नयति, सर्वोपि चैतादृशो चेष्टोद्योग इति श्रेणीमाश्रयति।

ऐहलौकिके, पारलौकिके, आधिभौतिके, आधिदैविके, आध्यात्मिके वा कुत्रापि कर्मणि विनोद्योगं साफल्यं न सम्भवति, अत एव चाहुरभियुक्ताः—

"इह जगति हि न निरीहदेहिनं श्रियः संश्रयन्ते"
"नहि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः" इति च

एवं सत्यपि ये मूढधियः प्रमादालस्यनिहता दैवे भारमारोप्य सि-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

द्भिदातुरुद्योगात् पराङ्मुखा इव भवन्ति ते कदापि सिद्धिं नानुभवन्ति। किञ्च दैवं पुरुषकारेण विना न सिद्ध्यति, साधितमिदमेभिः श्लोकैः—

"न दैवमिति सञ्चिन्त्य त्यजेदुद्योगमात्मनः
अनुद्योगेन कस्तैलं तिलेभ्यः प्राप्तुमर्हति"
"पूर्वजन्मकृतं कर्म तद्दैवमिति कथ्यते
तस्मात् पुरुषकारेण विना दैवं न सिद्ध्यति"

न केवलं प्रमाणप्राचुर्यं पश्यद्भिरेव, किन्तु निपुणं विभावयद्भिरपि महत्त्वमुद्योगस्य माननीयं, प्रत्यक्षफलप्रदत्वात्, तथाहि दृश्यते यः सदुद्योगवर्त्म समाश्रयति स सुखमश्नुते यश्चेतरथा वर्त्तते स न समृद्धिमधिगच्छति। स्वकर्त्तव्यानुसरणं हि जगति प्रकृतेर्नियम इव दृश्यते, तथाहि सूर्याचन्द्रमसौ समये समुदयेते दुरवगाहं व्योम समयानुसारेण सञ्चरतः पूर्वतो निश्चिते समयेऽस्तमयेते च। सरितः सततं स्यन्दन्ते, शारीराश्च वायवो यथानियोगं स्वकृत्यानुष्ठाने व्यापृतास्तिष्ठन्ति।

३—अस्यैवोद्योगस्य समाश्रयणेन निःस्वो लक्ष्मीभाजनतां, मूर्खो विद्यावैभवं, जन्मना दस्यु र्ब्रह्मवित्तरताम् अशेषदोषदुष्टश्च गुणगणशालितां प्रपद्यते, तथाहि 'टाटा' 'फोर्ड' 'सिङ्गर' प्रभृतीनामुत्पादकसंस्थानां प्रतिष्ठापकाः प्रागप्यधुनेव धनिका नासन्, वोपदेवः प्रचण्डमूर्खो भूत्वापि सततोद्योगेन वैदुषीमवाप्य व्याकरणस्य प्रस्थानभेदमेकमरचयत्, महात्मा वाल्मीकिश्च पूर्वं दस्युभावं भजन्नपि सप्तर्षिकृतोपदेशानुसारेणोद्योगमास्थाय प्रथमां गणनामवापत्। एवमेवान्यत्रापि क्षेत्रेषूदाहर्त्तुं शक्यते।

४—अतः सर्वास्वप्यवस्थासु यथाबल मुद्योगः करणीयः, तेन हि मनसि बल मायाति, चिन्ताया अवसरो नोपतिष्ठते, सिद्धौ जातायां नैतिकीं तां मन्यमानस्य लोकस्य द्वेषो नोदयते, स्वस्य च तुष्टिरुद्भवति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(३१) सञ्चयी नावसीदति ।

१ परिभाषा, २ प्रकारो लाभश्च, ३ उपसंहारः ।

१—उपार्जितानामर्थानामंशविशेषस्य स्थिरतया रक्षणं सञ्चयः कथ्यतेऽर्थाज्जनो यावदुपार्जयेत्ततः किमपि धनं शेषयित्वा सत्यामावश्यकतायां व्ययार्थं यद्—रक्षति स सञ्चय इत्युच्यते । धर्मशास्त्रकारैरपि विपदर्थमुपार्जितवित्तस्य चतुर्थं भागमवशेषयेदित्युक्तम्—'विपदर्थं धनं रक्षेत्' इति । गृहस्थानामावश्यकतमकर्त्तव्येषु सञ्चयोऽयमतिप्राधान्येनोल्लेखमर्हति, अन्तरा च सञ्चयं संसारयात्रा विपत्सहस्रसङ्कुला सम्पद्यते । यस्य यावानायः स तावन्तमर्थराशिं यदि व्यये नियोजयति, तदा पुत्रकलत्रादिपरिवृतस्य तस्य कदाचिद्विधिवशाज्जाते दुर्भिक्षे प्रियाः प्राणाः कथमिव रक्ष्येरन् ? विपदन्धतमसे सर्वतः प्रसृमरे विना विभवप्रदीपं कः पुनः पुरः पन्थानं प्रदर्शयेत् ?

२—यस्य यावानायः स तत एव किमपि शेषयितुं प्रयस्येत् । यदि पञ्चविंशतो रूप्यकाणि प्रतिमासमायो भवतस्तदा भवान् रूप्यकद्वयं रूप्यकमेकमेव वा यथा परिस्थिति शेषयितुं प्रयतेत, तावन्तं शेषणीयं भागं च सामान्यस्थितौ हरनिर्माल्यमिवानुपादेयं मन्येत । अत्र हि कर्मणि यादृशी सत्यसन्धताऽऽवश्यकी, न तथा परत्र कुत्रापि । स्वेनार्जिते वित्ते सर्वथा स्वमधिकारं दृष्ट्वा तदुपभोगाय लोलुपतया प्रवर्त्तमानस्य मनसो निरोधो नात्यन्तसुकरः, तत्र हि महतस्त्यागस्यापेक्षा भवति ।

किञ्च सञ्चयस्य विशिष्योपकारकत्वं प्रत्यपि क्रियतां दृक्पातः यदि सञ्चयः क्रियते चिरकालिके रोगे धृतखट्वस्य तदुपार्जकस्यबान्धवास्तदीयेनैव द्रव्येण तस्य सर्वविधां सहायतामाचरन्ति, चिकित्सका अपि समुचितं मूल्यमादायोपयुक्तमौषधं ददति इतरथा तु न बान्धवाः कुशलमपि पृच्छन्ति, नवा चिकित्सकास्सदौषधं प्रयुञ्जते । अपि च समाजे न केवलेन सन्ध्ययोरुभयोरपि तण्डुलसेटकस्य पाकेन जीव्यते जनेन, किन्तु यथायोग्यसामाजिकसम्मानमपि प्रार्थयन्ते प्राणाः,

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अन्तरेण च द्रव्यसञ्चय मिह भौतिके युगे सम्मानावाप्तिरसंभवेति मन्यन्ते मननानुरागिणः। एतत्तु प्रतिद्वारं प्रतिगृहं प्रतियन्ति लोका यद्द्रव्यमिह नितान्तप्रयोजनीयं वस्तु, दृश्यतां प्रायो हि लोकाः पितरः सन्तो निजेभ्यः प्राणेभ्योऽपि तनयादिषु ममता मधिकां पुष्यन्ति, तेषां च रक्षणावेक्षणशिक्षणादिषु प्रतिपदं द्रव्यमपेक्ष्यते न च शक्नुवन्ति निःस्वा भौतिकवादाभ्युदयचाकचिक्यशालिनि वर्तमानकालिके प्रतिपदानुभूयमानद्रव्यमहत्त्वे प्रपञ्चे स्वां सन्ततिं योग्यशिक्षासम्पन्नां विधातुम्। किमितोऽपि किमपि कष्टकरम? एतावतैव न समाप्नोति सञ्चयस्योपयोगिता, ऐहिकामुष्मिकपुण्यसङ्ग्रहार्थमपि सञ्चयोऽपेक्षितः पूजाघण्टाया अपि द्रव्याधीनलाभत्वात्।

न केवलमर्थेनैव सञ्चितेन साफल्यं जीवनस्य, किन्तु यदपि वस्तुजातं-तृणादारभ्य मणिपर्यन्तं-सर्वस्यापि सञ्चयः करणीयः, समयेऽल्पस्यापि वस्तुनो दुर्लभताया दर्शनात्।

३—सञ्चयपरेण हि पुंसा रक्ष्यमाणेषु सर्वेषु वस्तुषु यथोपयोगं व्यवह्रियते, तदवसरे च य आह्लादोऽनुभूयते न स शक्यतेऽतथाशीलेन जातु समनुभवितुम्। अतः सर्वैरपि जीवनोत्तरार्द्धे, विपदुपनिपाते, सन्ततिरक्षणावेक्षणशिक्षणादौ चावश्यापेक्षिष्यमाणस्य द्रव्यस्य पदार्थान्तरस्य च व्यवहारापेक्षितस्य सञ्चयोऽवश्यमेव कर्त्तव्यःतथा कुर्वाणा हि सततं नन्दन्ति, अतएव चाहुः—"सञ्चयो नावसीदतीति"

सम्प्रति यावदेकत्रिंशत् प्रबन्धा लिखितास्तेषां श्रेणीनिर्धारणं प्रथमपल्लवोक्तलक्षणसङ्क्रमेन विधेयम्, ते केवलं विद्यार्थिनां बुद्धिवैशद्यमाधातुमेव लिखिता अत एव च तेषां कायोऽपि लघुतम एव स्थापितः, इतः परं द्वित्राः केवलवर्णनात्मकाः प्रबन्धास्सन्निवेश्यन्ते, एतेषां प्रबन्धानां परिशीलनेन विद्यार्थिनां वर्णनात्मकसाहित्यमर्यादाद्योतकप्रबन्धलेखे शक्तिरुद्भवेत्। ईदृशप्रबन्धलेखे उपशीर्षकसन्निवेशनं नाव-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

श्यकं, नवा केवलवृत्तकीर्त्तनेन कृतकृत्यता, कवित्वप्रचुरभाषाभावस- न्दर्भणसम्भवकीर्त्तिलिप्साया एवैतादृशप्रबन्धलेखे प्रवर्त्तकत्वात्। अतोऽत्र विषये कृतभाषाप्रयोगाभ्यासा स्समासादितसाहित्यसेवावसराः सरसचक्षुष एव सफलतामासादयेयुरिति विद्यार्थिनामत्र सिद्धयेऽध्या- पकमहाशयैर्यथासम्भवं प्रागुक्तनियमोपनियमादिषु सावधानता, सुदृ- ढोऽभ्यासश्च विद्यार्थिभिराश्रीयेत इत्यत्र यतनीयम्।

(१) गङ्गा।

इयं भगवती गङ्गामाता यदि किमप्यन्यदकृत्वा केवलं भीष्मपिता- महाय जन्म दत्त्वैव विरताऽभविष्यत्तथापि आर्यजाते र्मातृतया प्रभूत माद- रमध्यगमिष्यत्। भीष्मस्य भीषणा प्रतिज्ञापालकता, निःस्पृहता, ब्रह्म- चारिता, तथा तत्त्वज्ञता चाप्रलयमस्य धरामण्डलस्य महतो बहुमानस्य स्थानम्।

अपि साधारणो नदो यदि दुर्भिक्षाद् भयमपासयति, शुद्धवायुसञ्च- रणावसरप्रदानेन च तनोरस्वास्थ्यमपनुदति, का कथा तदा गङ्गायाः, अस्याः कूले वसति हि स्वर्गाधिष्ठानको वासः, अशरीरत्यागेनासादितो देवभावः, अन्तरैव भुजि तृप्तिः, विनैव च जलस्पर्शमन्तर्बहिश्च शुद्धिः।

अद्याप्यस्याः परिसरे मन्दपदन्यासमुपसर्पतो मम ध्याने न केवलं हरितहरिता क्षेत्रपरम्परा समायाति, नवा नावा स्थानात्स्थानान्तरं व्रजन्तः सांयात्रिका एव समुपनिपतन्ति, किन्तु सद्यः स्नातः स्रवता सलिलसीकरेण मौक्तिकस्रंसिनीमिव जटा मालम्बमानः—"मातः शैल- सुतासपत्नि वसुधाशृङ्गारहारावलि" इति स्फुटस्वरं पठन् वाल्मीकिः, वालुकामय आस्तरणे पद्मासनमाबध्योपविष्टः 'तत्तीर्थगतैः कदर्थन- शतैः किन्तैरनर्थाश्रितैः" इति आवर्त्तयन् कालिदासः 'पतन्ती स्वर्लो- कादवनितलशोकापहृतये' इत्यादिना श्लोकेन भगवत्या भागीरथ्या गुणानेव दोषतया गणयन् पण्डितराजः, बुद्धस्य भगवतः पोतवसनैः श्रावकैः समधिष्ठितो विहारराशिः, हर्षसम्राजो वीरविरुदराजिः, महा-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

त्मनां तुलसीदास-कबीरप्रभृतीनां भक्तिदर्शनमिश्रा भिन्ना च कविता-वली बलादिव हृदयमावर्जयन्ति ।

न चेयं जाह्नवी सर्वत्र समानरूपा, गङ्गावतरणस्थले पितुर्हिमभूधरस्य क्रोडे क्रीडन्त्या अस्याः कन्यारूपम् ततोऽवतरन्त्या अस्या 'उत्तरकाशी-'सविधे देवदारुद्रुमा नन्तरयन्त्याः काव्यमयमिव यमक-मुपदर्शयन्त्या मुग्धता मनोहरं रूपम्, ततोऽपि परतो देवप्रयागेऽलकनन्दया सख्येव सह क्रीडन्त्या अस्याः कैशोरसुभगं सौन्दर्यम्, परतश्च कनखले शिलाशकलेषु विशीर्य शतधारत्वमिवासाद्यास्या विहरणस्वाच्छन्द्यम्, उपकर्णपुरं प्रवहन्त्याश्चास्या ऐतिहासिकं मन्द-गमनविजृम्भितं प्रौढत्वम्, प्रयागे च चिरवियुक्ताया इव सख्याः कालि-न्द्या अङ्के सस्नेहः प्रवेश इवानुष्ठीयमानो नाना-विधयाऽऽकारभङ्ग्या परमां चमत्कृतिं तनुते, एकत्र दृष्टेयमपरत्रदृश्यमानापि तत्त्वेन प्रायः प्रत्यभिज्ञायेत, यदि हि नाम लोकातिशायिनो कीर्त्तिगाथा नेमा-मनुसरेत् ।

प्रयागात्पूर्वतः स्यन्दमानाचेयं कल्मषनाशिनी महर्षेर्जह्नोः कन्या शैशवमतीत्येव प्रौढिमादधती दृश्यते, प्रयागं यावदियं तपस्विकन्येव विमलाशया सरला च प्रतीयते परं यमुनया—प्रौढयेव प्राणप्रियसख्या कृतमन्त्रणा सेयं जहातीव प्राक्तनं रूपम्, नातः परतः पूर्ववत् क्रीडति, यमुनाया मानिन्या द्रौपद्या इव श्यामपरिधानं वपुः स्मारयन्तीयं कुल-वधूरिव सौभाग्यशालिनी प्रतीयते ।

प्रयागादारभ्य चास्या महानदीभिः सह परिचयो वर्द्धते, तीर्थराज-एव हि मथुरावृन्दावनयोः सरसाभिः कथाभिः स्वं वपू रोमाञ्चितवती-यमुना श्रीकृष्णस्य स्मरणं समर्पयत्यस्यै, वरुणा विपुलं ज्ञानमुपहरति वाराणसीक्षेत्रे, पुरः प्रसृतायाश्चास्याः सखी सरयू रधिकण्ठमिव कृता-लिङ्गना मर्यादापुरुषोत्तमस्य रामचन्द्रस्य विरहस्नेहकथां कथयति, दक्षिणस्या आयान्ती चर्मण्वती रन्तिदेवस्य यज्ञमिव स्मारयति, उप-पाटलिपुत्रं च कलकलनादेन प्रवहमाणः शोणभद्रो मगधशासकानां य-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शांसि गायन्निवामूमाह्लादयति, एकतश्च भक्तत्राणोद्यतस्य गजोद्धाराय धावतो भगवतः क्षणिकेन दर्शनेनेव शान्तमला नारायणी स्वमस्या अङ्के निलाययति। ततश्च सर्वथा समृद्धाया अस्या विहारभूमिमतीत्य कामरूपप्रदेशे ब्रह्मपुत्रेण सह जायते विवादः ब्रह्मकमण्डलुवासेन दृप्ताया अस्याः—ब्रह्मपुत्रेऽपि विशेषादरवैधुर्यात्। परं समुद्रदर्शनव्यग्राया अस्या जाते सात्त्विकभावकृत इव वैचित्र्ये कदा ब्रह्मपुत्रेण मिलनं, कदा च पद्मा, मेघनाप्रभृतिनामधारणमित्यादि स्मर्त्तुमियं न लभतेऽवकाशम् अत आरभ्यैव चास्या समुद्रविषयः प्रकटीभवति सोऽनुरागो यदुद्रेकमहिम्ना पितुरङ्कप्रदेशं स्वीयबाललीलासाक्षितया प्रियतममपि परित्यज्य, शिलासङ्घातान् बालान् भ्रातृनिवहानिव पदयोर्निपत्य वारयतः प्रतार्य, मध्ये मार्गं मिलितान् बलादिवावरुन्धतो नगान् विनिपात्य, करुणं रुदतीः पथि सङ्गताः सखीरिव स्रोतास्विनोरान्तरिकभावावेदनेनेव कर्णयोः कस्यापि स्नेहाप्लुतस्य मनोभावस्य कथनेन प्रबोध्य, मातरमिवोपत्यकां पितरमिव च हिमभूधरं मनागप्यनापृच्छ्यच, दूरदेशचलनश्रममपि न गणयन्ती, प्रेमपूरमिव पयोराशिं प्रियतमपादनिवेशनस्पृहयेव समेधयन्ती, तदङ्के निलीयापुनरुत्थानमिव कामयमानोन्मादिनीवेयं धावति सागराभिमुखम्। बङ्गभूमिषु प्रवहन्त्या अप्यस्या दृष्टिर्नजात्वपि तदीये चारुत्वे आकृष्यते, मनः सलिलाहरणाय तटभुवमुपागतानां विलासिनीनां गणेन सह न क्षणमालापसुखं समीहते, किन्तु द्रुतपदन्यासमग्रेसरत्येवैषा। सत्यं, स्नेहोन्मादो हि कर्त्तव्यानि, विनोदान्, साधुभावं चापवारयति। ईदृशो ह्यस्याः स्नेहकथा।

अन्योऽपि प्रकारोस्त्यस्याः स्वरूपविषये चिन्तनस्य। तथाहि दृश्यताम्—प्रयागे धर्मेण सहैवार्थस्यापि प्रयोजनं प्रतियतीयं व्यापारविशेषस्थलानि स्वप्रवाहेण समृद्धिशालीनि कुरुते, राजकीयशासनमिव दृढं विधातुं राजधानीनगराणां गौरवमिवोदञ्चयितुं च तदीयपरिसरं स्वप्रवाहेण पावयति।

धार्मिकजनतायाः सत्योऽयं विश्वासो यद् गङ्गा नो जननी

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

जनानां योगक्षेमं यथा चिन्तयति, तथैवेयमपि सर्वथा कुशलमनुसन्धत्ते ऽमृतस्वादुपयः पाययति, सति च क्लेशे समुपाहरति तदपासनसाधनानि जाते तु शरीरोपनिपातेऽमरभावं प्रयच्छति । किमितोऽप्यधिकं दयते कस्यापि कापि जननी ?

ईदृशीचेदं महापुण्या, यदङ्के निपतिततनवः पापा अपि स्पृहयन्तीन्द्रपदाय, लभन्ते च तत्, अत एव चैतस्या भक्तस्य महतीयं चिन्ता—

"कत्यक्षोणि, करोटयः कति, कति द्वीपिद्विपानां त्वचः,
सारङ्गाः कति, पन्नगाः कति, सुधाधाम्नश्च खण्डाः कति,
किञ्च त्वंच कति, त्रिलोकजननि, त्वद्वारिपूरोदरे
मज्जज्जन्तुकदम्बकं समुदयत्येकैकमादाय यत्"

न च केवलं भक्तिभाजनानामेवैतादृशो विश्वासः, परं वज्रनास्तिका भक्तिशून्या अपि अस्याः पयसि महान्तं गुणराशिमुत्प्रेक्षमाणा आर्याणामेतदादरणं सकारणमङ्गीकुर्वते, तथाहि यत्रान्यत् पयः पञ्चषैरेवाहोभिः (प्रवाहात् पृथक्कृत्य स्थापने) कीटदूषितमकार्यकं सम्पद्यते, तत्रास्या भागीरथ्या जले मासषट्केनापि नागच्छति विकारः, किञ्च पाचने पावने च समानमधिकारमादधातीदमिति प्रतीत्यैव हिन्दव उद्घोषयन्ति—'औषधं जाह्नवीतोयम्' इति तदागच्छत, वयमपि समवेताः प्रार्थयेमहि—

"त्वत्तीरे वसत स्त्वदम्बु पिबतस्त्वद्वीचिषु प्रेङ्खत-
स्त्वन्नामस्मरतस्त्वदर्पितदृशः स्यान्मे शरीरव्ययः" इति ।

---

(२५) मिथिला ।

बहूनि हायनानि जातानि क्वचिद् व्याकरणग्रन्थे मुद्रितमैक्षिषि मथ्यन्तेऽस्यां रिपव इति 'मिथिला' । दृष्ट्वा चेदं विचारयितुं प्रारप्सि प्रायः कस्यापि कटूक्तिप्रयोगव्यसनिनः स्वदेशमेवमेव प्रशंसतो वाग्विलसितमिदमिति । परं क्रमशश्चिन्तासन्तानमायम्य प्राचीनमितिवृत्तसारमालोचयतो मम चक्षुषी कर्पूरशलाकया, स्निग्धहिमवर्त्तिकयेव-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वोन्मोचिते । पश्यत भवन्तोऽपि महिमानमस्याः-पुराहीयमकेतो जनकस्य ज्ञानवैभवनिधेरङ्के बालोचिताभिः क्रीड़ाभिरानन्दन्तीं जगन्मातरं सीतामुपस्थाप्य सङ्कशो भुवं पालयतां राज्ञां शिरांसि बलादिव नमयन्ती स्वशासितुरुत्कर्षं प्रकटीचकार, ततश्च परतो भगवतो रामचन्द्रस्य तस्य प्रणयतरोरुद्गमस्य भूमिभावमभजद्येनान्तर्ज्वलता प्रकाशितसकलधूमभूमहद्भागोऽसौ मर्यादापुरुषोत्तमो दाशरथिर्जायमानेऽपि धार्मिकप्रतिबन्धे स्वस्याः प्रेयस्याः प्रतिकृतिमपि द्वितोयस्याः सुन्दर्या अपेक्षया साधीयसीं मन्यमानः कवये निम्नलिखितश्लोकस्य भावमुपाहरत्—

सीतां हित्वा रघुकुलपतिर्नोपयेमे यदन्यां
तस्या एव प्रतिकृतिसखो यत्क्रतूनाजहार ।
वृत्तान्तेन श्रवणकुहरव्यापिना तेन सीता ।
सा दुर्वारं कथमपि परित्यागदुःखं विषेहे"

राज्ञा भर्त्राऽपराधमविचार्यैव पृथक्कृताया अपि तं प्रति—

'भूयो यथा मे जननान्तरेऽपि त्वमेव भर्त्ता न च विप्रयोगः इति साश्रुसन्दिशन्त्याः स्वसुतायाः सीताया मातृभावेनोन्नतमिदमीयं शिरः । आस्तामयं पुरातनः प्रसङ्गः, अस्मिन्नपि युगहतकेऽस्याः क्रोडे तादृशमेकमनर्घं रत्नमपत्यं प्रकटितस्म श्रीमतो भारती देवी, या मीमांसामांसलमतौ विश्वविदितवैदुष्ये स्वपतौ मण्डनमिश्रे समग्रामपि महीं शास्त्रार्थे विजित्य मिथिलामुपसेदुषा श्रीयुतशङ्करभगवत्पादेन शास्त्रार्थसङ्गरायाहूयमाने परस्परोपमेयपाण्डित्ययोरुभयोः प्रवृत्तिनिवृत्तिमार्गव्यवस्थापनप्रवृत्तयोः केन माध्यस्थ्यमाश्रीयतामिति चिन्त्यमाने सर्वसम्मत्या समर्प्यमाणां मध्यस्थतां तथा निरवीवहद्यथाद्यापि सादरं स्मर्यते तदीयस्तद्विषयो निर्णयः। लखिमायाः सरसं पाण्डित्यम्, चन्द्रकलायाश्चमत्कारिकवित्व ञ्चास्या गौरवं समेधयति । अन्यता दृश्यताम्—

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

इयं हि जगतो जातायामपि सर्वविधायां सुविधायां, लब्धायामपि भौतिक्यां सिद्धौ विना येनान्धेव प्रतीयेत, यदन्तरा तमसीव लीना मन्येत, यद्भावे कस्यापि पदार्थस्य क्षोदक्षमं तत्त्वं निर्णेतुं न शक्नुयात्, यावद्विना पुरुषार्थसार्थस्वरूपमपि न परिचिनुयात्तस्य प्रमाणशास्त्रस्य प्राथमिकः प्रभवोऽस्यामेव भुव्याविरभूत्, तदाद्यप्रकाशको गौतमोऽस्या एव भूमीतलललामभूतायास्तपस्विन्याः स्नेहलालितस्तनय आसीत्, परतोऽपि यथोपयुक्तपरिष्कारेण तदुद्भावितं तन्त्ररत्नं परिमार्जयितुमासादितावतारो गङ्गेशोऽस्यैव धराखण्डस्य धूलिषु चिक्रीड़। विधिवोधनोद्धुरमनीषाणां मीमांसकानामेकमात्रमुद्भवभूमिरियमिति यावद्ब्रुवे तावदागच्छति स्मृतिवर्त्म पुराणोऽसौ हरिसिंहदेवस्य यज्ञसमारोहो यत्र केवलं मैथिलमीमांसकानां चतुर्दशशती सहैव निमन्त्रिता सत्युपस्थिताऽऽसीत्।

मन्त्रतन्त्रविद्यायाः समुद्गममहीयमिति च प्रतिपन्नमेव प्रायः सर्वैः—तथाहि स्मर्यते—

"मन्त्रं तन्त्रमुपासते कतिपये सिद्धिः परन्त्वेतयो-
राश्चर्यं खलु मैथिलेषु वसति प्रत्यक्षवद्भूतले"

अयमेवासौ भूमिभागो यद्रजस्सु न्यायेन समं मन्त्रविद्या, मीमांसया सहागमतन्त्रं, व्याकरणेन समं धर्मशास्त्ररहस्यम्, गणितज्ञतया सार्द्धमदभ्रं दैवज्ञत्वं, काव्यकलया सहितोऽलङ्कारमहाराशिः, तपसा सह राजभावः, राजत्वेन समं योगविद्या, योगविद्यया सार्द्धमबाधप्रसरा त्रयी, मल्लशालया सह पाठशाला, त्यागेन सहोपभोगः, उपभोगेन सहातिथिव्रतभावः, कर्मणा सह सन्न्यासः, वीर्येण सहिता शान्तिः, दानेन युक्ता अनात्मश्लाघिता च चिरात् क्रीडति।

मिथिलाया अस्या एव प्राङ्गणे समयक्रतेन पौर्वापर्येण प्राच्यतां प्राप्नुवन्तोऽपि जगदुपकृतौ नित्यनूतनास्ते ते विद्वांसो निजां जीवनलीलां प्राचकरन्, ये षड्दर्शनानि व्याख्यायापि न जातुचिदकत्थन्त,

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

गृहपरिसरप्ररूढं शाकमभ्यवहरन्तोऽपि अयाचितोपनताय सुखजीविकोपयुक्तायानतिनिन्द्यपात्रोपहृतायापि धनाय नास्पृहयन्,

इयमेव तद्देशरत्नं यत्र जनानां कुलाभिमानस्तावतीमतिभूमिमुपगतो यया जात्वपि नीतिपथात् न च्यवन्ते लोकाः, धार्मिकमर्यादारक्षणमात्मनः कर्त्तव्यं प्रतियन्तो निजामार्थिकीं क्षतिमपि सहन्ते, दैवे पित्र्ये च कर्मणि ससमुत्साहं प्रवर्त्तन्ते, दृष्टमात्रा एव निजेन वेशविशेषेण स्वजातिपरिचयं ददते ।

भौगोलिकं सौन्दर्यन्तु मिथिलायाः प्रकृतिदेव्या रङ्गभूमेरिव प्रकामरमणीयमिति को नाम सचेतनो नाङ्गीकुर्यात्, अस्या एकतो वर्त्तमाना हिममयशैलपरम्परा प्राकृतिकोपद्रवप्रतिबन्धार्गलेव, सौन्दर्यलक्ष्म्याः सुखशयनीयोपधानमिव, तद्दिगवच्छेदेन प्रचुरप्ररूढानां नानाविधलतातरुगुल्मादिभावेन स्थितानां महौषधीनां रक्षणार्थमुपकल्पिता वेष्टनभित्तिरिव विद्योतमाना दृश्यते, अन्यतश्च नारायणी 'शालग्रामी' प्रभृतीनि धन्याक्षराण्यभिधानानि धारयन्ती पुण्यप्रवाहा ह्लादिनी बलादिव प्रह्लादयति चेतः, दक्षिणदिशि दिशः स्वकीर्त्या धवलयन्ती निजपावनगुणगणगौरवेणेव देवैरप्यादृयमाणतया स्वर्धुनीति समाख्यां दधाना भगवती भागीरथी भूषयति भागशोऽस्या वपुः, प्राच्यां पुनः प्रसह्य तपः—प्रभावेण तनावेकस्यामेव क्षत्रियतां लालयित्वा ब्राह्मणत्वमपि निवासितवतः कुशिकनन्दनस्य तपःसम्पदिव शतधारतया प्रसृता कौशिकी प्रवहति, मध्येचामृतजला अमृता, कमला, वाग्मतीप्रभृतयो नद्यः स्यन्दन्ते यत्प्रभावेण क्रुद्धेऽपि देवेऽशुष्कसस्यत्वमुपेत्य प्रसीदन्ति मिथिलाभिजनाः ।

तानि तानि जनकपुर, कुशेश्वर, भैरव, प्रभृतितीर्थस्थानानि तु न गणयामि, स्वत एव मिथिलायास्तीर्थतया प्रसिद्धेः ।

वङ्गसङ्गतसीमतया सकलामपि कामकलां कटाक्षेष्वेव निधाय जगद्वशीकारप्रवृत्ता विश्वमोहनसौन्दर्यसारसम्भृता रमण्योऽत्रवसन्ति तदु-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पश्लोकितमेव—..."जनकजनपदस्थायिनीनां कटाक्षे,
......स्फुरति रतिपतिः"........... ।

अधुनापि—यत्रयुगे आस्तिक्यं वञ्चनेति निन्द्यते, धर्मश्रद्धा बुद्धिवैधुर्यमित्युपहस्यते, इह हि मिथिलायां स्नातानुलिप्ता ब्राह्मणाः पूर्वाह्णे भगवन्तं विष्णुं शिवञ्च समर्पयन्तो यथोपयोग मृचश्चोच्चारयन्तो यं भावभाविर्भावयन्ति, न स परत्र भूभागे लभ्यः, सुरभारत्या अस्मिन् ह्रासमये ऽपि येन बहुमानेनेह लोकास्तामभ्यस्यन्ति न तदुपमा परत्र प्राप्या, अल्पमात्रेऽपि च वित्ते याहश्यतिसेवाभावनाऽत्र दृश्यते न तत्सादृश्यमपरत्र समधिगम्यम् ।

अमितगुणतयैव चेमां प्रकृतिनटीक्रीड़ास्थलीं, विश्वगुणादर्शप्रतिच्छविं मन्यन्ते विज्ञा स्तथाचाहुः—

"देशाः सन्तु सहस्रशोपि मम तु स्वाभाविकप्रीतये
श्रेयान् देशविशेष एष मिथिला नामा क्षमामण्डले" इति
"भूदेवा यत्र देवो यजनवसुमती सास्ति मे तीरभुक्तिः"

तीरेषु हुतिः-हवनं यत्रेति विगृह्य 'तीरहुति' शब्दं 'मिथिला' पर्यायं साधयन्तोऽपि वैयाकरणा अस्य भूभागस्य याज्ञिकदेशत्वे साक्षिणः।

तदयं देशो भाविष्वपि जननेषु जायतां जन्मभूमिर्ममेति विश्वेशमर्थये।

* शमिति *

आदर्शप्रबन्धानां प्रकरणमत्र समाप्यत इति किञ्चित् कथनमवसरशालि, यद्यन्येपि विषयाः प्रबन्धस्य भवितुमर्हन्ति—राजनीतिः, समाजनीतिः, जीवनी, ऐतिहासिकघटनाविशेषाः, इत्यादयस्तथापि तेनात्रोपनिबद्धाः, सम्प्रतियावत्तेषामनतिप्रचलितत्वात् प्रोदीरितप्रकारेण कृतप्रबन्धलेखाभ्यासैश्छात्रैः कुत्रापि विषये प्रबन्धस्य लिखितुं शक्यत्वाच्च ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ऐतिहासिकीं 'जीवनो' मधिकृत्य प्रबन्धमारचयद्भिर्यथोपयोगं घटनाया स्तिथ्यादिकमपि समुपनिबन्धनीयम्।

आदर्शो न समग्रो भवति, न वा भाव्यमपि तेन।
तथा, तथास्पति लोका अलसमतित्वेन युज्येरन्॥
यावद्विना विबोधो न भवति शक्तेः प्रसुप्तायाः।
छात्राणां, तावदिह न्यबन्धि यत्नेन नूत्नेन॥
इत्थं प्रकारभेदे दृष्टे जाते च हृदयस्थे।
अत्र प्रबन्धवर्त्मनि सुखं पदानि प्रसर्पन्ति॥

तृतीयः पल्लवः।

पत्र-लेखन-प्रकारः।

आधुनिकशिक्षाप्रकारे पत्रलेखप्रकारस्य प्रबन्धलेखस्येवोपयोगशालिता दृश्यते, प्रायोहि परीक्षणसंस्थाः प्रबन्धप्रातिनिध्येन स्वतन्त्ररूपेण वा पत्रलेखनविषयेऽपि प्रश्नान् दापयन्ति, न केवलमेतावदेव, किन्तु लौकिकजीवने प्रबन्धापेक्षयाऽपि पत्रलेखनकलाया ज्ञानस्य महत्त्वमधिकमनुभूयते, तथाहि—प्रबन्धलेखन मधिकतः परीक्षासु सफलतायां प्रयोजकं जायते, क्वचिदध्यापनकाले वैदुष्यं प्रकटयति, ग्रन्थलेखे, स्फुटलेखे वा चमत्कारमाधायोपकरोति, पत्रलेखकौशलं तु विदेशगायापि जनाय तमानन्दं वितरति यः केनाप्यन्येन साधनेन न जनयितुं शक्यः, स्वलेखकाय समये समये स्वगुणेन वाचकं प्रसाद्य सत्यपि परिचयाभावे प्रभूतवेतनं पदं दापयति, प्रणयिनोः पारस्परिके पत्रव्यवहारे प्रदर्श्यमाना पत्रलेखकला यं नूतनं संसारं सृजति न स वाचा प्रकाशयितुं शक्यः, एवमन्येष्वपि क्षेत्रेषु व्यवसायादिषु पत्रव्यवहारमात्रमुपजीव्य प्रवर्त्तमानेष्वस्य गुणस्यास्ति महानादरः, न चायं गुणः सुलभः, सत्यपि शास्त्रीये ज्ञाने, ग्रन्थग्रन्थिभेदेन पाटवे वाऽत्रविषये दुर्बलतायाः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स्फुटमुपलम्भात्, अतः सम्प्रति प्रबन्धपारिजातेऽत्र प्रकरणमिदं 'पत्रलेखनप्रकरण'मिति नाम्नोपबृंहयन् न विषयादन्यत्र गतत्वेन गणनीयोऽस्मि, विद्यार्थिबन्धुभिरध्यापकमहोदयैश्चेह विषयेऽपि समये समये ध्यानमाधेयँय्येन सर्वाङ्गीणताऽध्ययनस्य जायेत। तत्र प्रथमं निम्नलिखितेषु साधारणनियमेषु दृष्टिपातः कर्त्तव्यः। यथा—

१—पत्रलेखनकाले लेखकेन मनसि करणीयं यदस्मै पत्रं लिख्यते, तेन सह वार्तालाप इव क्रियतेऽर्थाद्यथा वार्त्तालापे स्फुटा शब्दावली प्रयुज्यते तथैव तत्रापि प्रयुज्येत, (नतु स्वपाण्डित्यप्रकटनाय गर्भितानि दीर्घसमासानि च वाक्यानि प्रयुज्येरन् येषु प्रयुज्यमानेषु पञ्चकृत्वः पठितस्यापि पत्रस्य तात्पर्यं हृदयङ्गमं न जायेत।)

२—यं विषयमुद्दिश्य पत्रं प्रहीयते यथासम्भवं स्पष्टतया तस्य निर्देशः करणीयो येन वाचयिता तद्विषयेऽसन्दिग्धाऽविपर्यस्तानुभवभाजनं भवेत्।

३—शिष्टाचारपरिप्राप्तं नत्याशीर्वादात्मकं मुखबन्धनं संक्षिप्य स्पष्टश्च लेख्यम्, तत्र विशेषणादियोजनेन वाक्यविस्तरे विधीयमाने पत्रस्योद्देश्यं पश्चात्पदमिव कृतं भवति। (इदं च व्यक्तिगतपत्रविषयम्, कार्यालयीयपत्रेषु तु नत्यादिनिर्देशो नैव क्रियते।)

४—पत्रं यथासम्भवं लघुकायं यथास्यादर्थश्च बुबोधयिषितो न हीयते तथा चेष्टनीयं सति चात्र साफल्ये पत्रकला फलशालिनी मन्यते।

५—यदि किमपि प्रार्थनीयं स्यात्तदा तद्विषये समुपयुज्यमानैः प्रभावशालिभिश्च शब्दस्तोमैः सकृदेव तस्य निर्देशः कर्त्तव्यो नतु स्वव्यग्रतासूचनाय भूयोभूयस्तदावर्त्तनीयं जातेऽपि शब्दभेदेऽर्थाभेदनिबन्धनदोषस्य दुरुद्धरत्वात्।

६—कार्यालयीयपत्रेषु सति प्राक्तनपत्रगतविषयस्य स्मारणीयत्वे तत्पत्रतिथिसङ्ख्यादिकमवश्यमुल्लेख्यँय्यत्साहाय्येन तदीयविषयावबोधो विधीयते।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

७—यस्य समीपे पत्रं प्रेष्यते तदीयस्थितिसङ्केतादिकमपि अन्यूनानधिकमेव निर्देश्यं वृथा प्रान्तमण्डलोपमण्डलगुल्मपल्लिप्रभृतीनां निर्देशो नापेक्ष्यते (यावदवश्यमपेक्षितं तावत्तु निर्देश्यमेव, तत्र किमावश्यं किञ्च नावश्यकमस्यार्थस्य निर्णये व्यवहार एव प्रमाणम् ।)

सामान्यतः पत्रं त्रिप्रकारकं भवति, तद्यथा—अतिव्यक्तिगतम्, व्यक्तिगतम्, कार्यापेक्षि च ।

(१) अतिव्यक्तिगतं तत्पत्रमुच्यते, यत्पिता पुत्राय, पुत्रो वा पित्रे, प्रिया प्रियतमाय स वा तस्यै, एवमेवातिनिकटसम्बन्धी कस्मैचित्तादृशायैव जनाय प्रेषयति । अस्मिन् पत्रे प्रेषयिता स्वसङ्केतादिकं जाते नूतने परिवर्त्तन एव निबध्नीयान्न साधारणस्थितौ (विस्तरं, व्यग्रत्वादिकमीषदंशे पुनरुक्तिं केषांचिन्नियमानां व्यतिक्रममपि च कुर्वन् प्रेषकोऽत्र क्षम्यते, परं सति सम्भवेऽत्रापि प्रोक्तनियमानामनुवर्त्तनमेव हितम् ।)

(२) व्यक्तिगतपत्रेषु सम्बोध्यमानव्यक्तिविशेषस्य तथा निर्देशो विधेयो यथा तत्पत्रं तदीयमेवेति भासेत [यथा मण्डलाधीशं देवदत्तमिश्रं प्रति प्रहीयमाणे पत्रे प्रियश्रीयुत पं० देवदत्तमिश्र, एवं सम्बोधनं विधेयं नतु मण्डलाधीशत्वादि योजनीयम् ।]

(३) एतज्जातीयकपत्रेषु स्वनाम निर्दिश्य स्वपरिचयोऽपि प्रदेयो भवति, सम्बोध्यमानस्य महाशयस्य परिचयादिकं तु सम्प्रति स्थितिसङ्केतलेखनस्थल एव निर्दिश्यत इति व्यवहारः ।

(४) कार्यापेक्षिपत्रेषु सम्बोध्यमानस्य पदादिकं तत्पदबोधकविशेषणादिपुरस्कारेण प्रयोज्यं स्वं पदादिकं तु नीचैः प्रयुज्यते, क्वचित्तु स्वीय एव परिचयः शीर्षस्थले विन्यस्यमानो दृश्यते, व्यवहार एवात्र प्रमाणमित्युभयमपि साध्वेव ।

इतोऽतिरिक्ता लेखमात्रगता नियमा अवश्यमनुरोध्याः, अतिसाधारणनियमानुवर्त्तन एव पत्रं चमत्कृतिशालि जायते, तदपि न कृतं चेद्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

हन्त ! श्रीशब्दादिप्रयोगविषये ये नियमाः पुरा व्यवह्रियन्ते स्म, ते गतकालाः, सम्प्रति एवमेव श्रीपदं सर्वत्र प्रयुज्यते। बुद्धिमन्तो दैनन्दिने व्यवहार एव दत्तावधाना विषयेऽस्मिन् वास्तविकं ज्ञानं लब्धुमीशत इति नेह प्रतन्यते।

---

(१) पितुः समीपे पुत्रस्य पत्रम्।

कल्याणपुरतः
५-१०-४५

स्वस्ति,

श्रद्धेयपादकमलेषु शतं प्रणतयो निवेदनञ्च।

भवदीयं पत्रं यथासमयमापम्, यथा श्रीमदादेश महमस्मिन् पूजावकाशे श्रीमदन्तिक एव स्थातुमिच्छामि, मदीयो विद्यालयः १०-१०-४५ तिथेः पिधास्यमान आसीत् परं मण्डलाधीशमहोदयानां शुभागममुपलक्ष्य दिनस्यैकस्यावकाशो जात इति सम्प्रति ६-१० तिथेरेवावकाशः प्रारब्धा, नचात्र किमपि प्रतिबन्धकमुत्प्रेक्ष इति ८-१० तिथौ सायं षड्वादन इतः प्रस्थाय नववादने निशि धूमयानस्थितिस्थाने समुपस्थास्यन् तत्र समये स्थाने च श्रीमता प्रेष्यमाणं यानमाशासे। अन्यत्सर्वं कुशलम्। श्रीमत्या मातुश्चरणयोः प्रणतिर्मम कथनीया।

भवदीयस्नेहदुर्ललितः—
श्रीराधामोहनः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(२) पुत्रस्य समीपे पितुः पत्रम् ।

पकड़ीतः
१६-६-४४

स्वस्ति,

प्रियवत्स श्रीकान्त ! शतं शुभानि भूयासुः ।

तव गृहात् प्रस्थितस्य पञ्चदश दिवसा अजायन्त, विद्यालयमुपेतमात्रेण च त्वया पत्रदानं प्रतिज्ञातं, नाधुनावधि तदधिगतं तेन वयं चिन्ताग्रस्ताः, त्वदीया माता तु भृशमुदास्ते । विद्यालये प्रवेशः, छात्रावासे स्थानलाभश्च जातो न वेत्यपि न ज्ञायते, प्रथम एव च तवायं परदेशनिर्गम इति चिन्ताया निदानं नः । विद्यालये पाठारम्भो जातः ? अपि प्रसीदसि तत्रत्ये वातावरणे ? श्रीराधारमणोपि कदापि दृश्यते ? सर्वमिदं त्वरया सूचनीयम् , तव सखा देवदासः कृष्णा च त्वां सदाऽनुस्मरतः । शुभमिति

त्वदीयशुभानुध्यायी
ताराकान्तः

(३) मित्रस्य पत्रं मित्रं प्रति ।

मोतीपुरतः
१५-१२-४४.

प्रिय श्रीदेवनन्दन !

अकस्मा न्मन्थज्वरेणाभिभूतेन भ्रातृवरेण तड़ित्पत्रद्वाराऽऽहूतोऽहं विस्मृतान्यकरणीयस्तामेव दिशं प्रचलित इति न त्वमापृष्टोऽपि । अत्रागत्यापि तदीयया व्यग्रतया मयाऽपि शून्यशून्या इव दिशोऽदृश्यन्तेति न पत्रमपि प्रहितं तदिदं सर्वमपि परिस्थितिपारतन्त्र्यकृतं ममागः सोढुमर्हसि । परमात्मप्रेरणया सम्प्रति रोगस्य तस्य भयङ्करता दूरापसृता, केवलं समयोऽतिवाहनीयो विद्यते । जाते च तस्य पथ्ये तं तदीयं च परिवारमहमितो निजं ग्रामं नेतुमीहे, न शक्नोमि चैकाकी कार्यमिदमस्मिन् दुःसमये समनुष्ठातुमिति त्वामपि तत्र सहायमाशंसामि ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

निजास्वीकृति रत्र प्रहेया।

विद्यालये रसायनशिक्षकाय समर्प्यमाणं मदीय मभ्यासपुस्तकं तत आदाय त्वया स्वसमीपेऽवस्थापनीयं छात्रावासद्वारपालाय च रूप्यकमेकं प्रदेयम्, अभिधेयं मम नामगृहीत्वासौ ददातीति। शमिति।

त्वदीय एव

रामनन्दनः

(४) पूर्वपत्रस्योत्तरम्।

कनखल

११, रामदीनच्छात्रावासतः

१४-११-४४

बन्धुवर,

तवाकस्मादनुपस्थितिर्यावन्मां गभीरे चिन्ताकूपे पातयति ताव-देव त्वदावासमुपेतस्य ममदृष्टि स्तत्रास्तव्यस्ताखिलपदार्थं स्थाने वायु-वशादितस्ततो लुठति तस्मिन्नेव तडित् पत्रे न्यपतद्यदनुसृत्य त्वया तावत्या त्वरया विश्वविद्यालयाच्चलितम्। अवगतस्तदैवाखिलोऽपि समाचारः, सम्प्रति पत्रेणानेन तु सर्वथैव गतचिन्तोऽजनिष। भगवा-नाशु तव भ्रातृवरं सर्वथा नीरुजं क्रियात्। यदि परिस्थितिर्न प्रतीव-ध्नीयादवश्यमहं त्वां त्वदादिष्टेन प्रकारेण साहायकेन सम्भावयि-ष्यामि। तव पूज्याया मातुः स्नेहप्रतिकृते भ्रातृजायायाश्चैवं दर्शनमपि कृतं भविष्यतीत्यपरमपि प्रलोभनमत्र पश्यामि।

कल्याणिनी रमाऽपि सम्प्रति कनखलमायातास्ति, साऽपि त्वद्गृहं गत्वा तव मातरं द्रष्टुं तस्याः प्रसादं लब्धुश्चेच्छति, यदि सापि सह तिष्ठेत्तदा त्वतीव सुखावहा यात्रा जायेत, पथि प्रबन्धो हि तया विधीय-मानः प्रायः सर्वैः प्रशस्यते। अविशिष्टं कुशलमवगच्छ। इति।

त्वदीयः—

देवनन्दनः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(५) व्यक्तिगतं पत्रम् ।

कामना-निवासः
२० कुशेपुरतः
१२-८-४४

प्रिय श्रीयुत राधाकृष्ण शर्मन् !

भवदीये विद्यालयेऽहं स्वं तनयं प्रविवेशयिषामीति पत्रमिदं प्रहित्य भवन्तमुपप्लुतशान्ति करोमि, क्षन्तव्यम् ।

मदीयः पुत्रः १५ दशवर्षदेशीयोऽधीतसमग्रप्रवेशपरीक्षाग्रन्थोऽस्ति, तस्य नामलेखनादिकर्मणि किङ्किमावश्यकं भविष्यति, ?

भवदीये विद्यालये छात्रावासोऽस्ति न वा ? अस्तिचेत् कस्तत्र प्रवेशस्य नियमसमुदयः ? तत्र प्रविष्टवतश्च छात्रस्य सत्यामिच्छायां मध्येऽध्ययनं नाम किमादाय च्छिद्यते ? भवदीये विद्यालये कोऽधुना प्रधानाध्यापकः ? प्रधानच्छात्रावासाध्यक्षश्च कः ?

तत्र विद्यालये भवानेव मया परिचीयत इति भवत्येव मया भारोऽयमारोपितः । आशासे नानुध्यायेत भवतेदम् ।

भवदीयः
प्रियव्रतचौधरी

(६) व्यक्तिगतं प्रार्थनापत्रम्

श्रीमन्तो माननीयाः 'पटना' मण्डलाधीशमहोदयाः,

तत्र भवतां सेवायां सविनयं निवेदनं यदहं भवदीयामुदारतां विद्यार्थिजनसहायता विधानव्रतधारितां च विश्वस्तसूत्रेणावगत्य स्वविषये किमपि निवेदयितुं प्रवर्त्ते, भवान् यस्य मण्डलस्य प्ररोहस्तमेव भूभागमहमपि जन्मभूमिमभिमन्ये इति द्वितीयो हेतुरत्र मम साहसे ।

अहमत्र पटनानगरे प्रतिष्ठिते त्रिस्कन्धज्यौतिषमहाविद्यालये द्वितीयवर्गे पठामि, यदीयां सहायतामाधारीकृत्याहमिहायातस्तस्य

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

महापुरुषस्याकस्मिकेन निधनेन प्रतिहन्यत इव मम पुरस्सरणस्याव-सरः, नचोचितमिदं यदहमिहमार्गमध्य एव विरमेयम्। नवान्यं भवा-दृशमुदारहृदयं सहायमितस्ततश्चक्षुषी व्यापार्याप्युपलभे, तदर्हति भवान् मदीया मार्थिकीं सहायतां समुपपाद्य मामुपकर्तुम्, अत्रान्यत्र वा मद्विषये विशेषे जिज्ञासिते श्रीमान् प्रधानाध्यक्षो मद्विद्यालयस्य शक्यतेऽनुयोक्तुम्।

द्वितीयवर्गः, त्रिस्कन्धज्यौतिषमहाविद्यालयः, पटना	अहमस्मि भवदीयां सहायता प्रसृतां भुजच्छायालिप्सुः सीतारामवर्मा १२-१-४५

(७) व्यक्तिगतं पत्रम्।

कटरा कैम्प
पो० बेनियाँ, सारन
१५-१-४५

मान्यश्रीमन् उपमण्डलेश्वरमहोदय, सिवान.

महाशय,

अहमत्र भूभागे वर्णाश्रमधर्मस्य प्रचारार्थं भ्राम्यामि, तत्र प्रसङ्गे च मयाऽस्य मासस्य प्रारम्भतः प्रायश आसन्नविंशा ग्रामा दृष्टाः, नचैकस्मिन्नपि ग्रामे 'मलेरिया' कृत उपद्रवो नालोकितः, यत्र यत्राहं गतस्तत्र तत्र सर्वत्र लोका ज्वरेण नूतनेन पुराणेन च पीडिता एवादृश्यन्त, प्लीहाभिवृद्ध्या च सन्दिह्यमानजीवना जनाः समुपयुक्तस्य सहायकस्य, वैद्यस्यौषधस्य चाभावेन विपद्यमाना दृश्यन्ते चाहरहः, न च युज्यतेऽयं क्रमः, विधातुर्हि सर्वोत्तमा सृष्टिर्मनुष्यजातिरेवं क्लेशं सहेत सर्वं च तत्क्लेशापतिता मानवा निभृतभवतिष्ठेरन्नसम्भवमिदम्। यापि सहायता राजप्रदत्तद्रव्येण समुपस्थाप्यते सा द्विदले लव-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

णस्यापि मात्रां न धारयति, तत्रापि द्रव्यं यावदुपयुज्यते तथा मनो नाधीयते, लोकाः प्रतिक्षणं भाविने उपद्रवाय दत्तावसरा यैरद्य मिलन्ति तानेव श्वो वियोक्ष्यमाणान् प्रतियन्ति, पत्नी प्रियपतिं, पतिः प्रियतमां, माता सुतं च सदा विपत्तौ पतितानिवोत्प्रेक्षन्ते, कस्यापि कुत्रापि कर्मणि न साभिनिवेशा प्रवृत्तिरालोक्यते। चिराय वर्त्तमानायामीदृश्यां स्थितावस्य प्रान्तस्य कृष्यादिकं गतक्रमं सद्युगस्यैकस्य कृतेऽत्र दुर्भिक्षमधिवासयेत्, सति च तथाभावे योऽधुना मानवजातेरपमानविशेषो दृश्यते, तस्य मात्रा कतमां वृद्धेर्मात्रामुपाच्छेत् ? अलमिदं सूचयित्वा।

अतः प्रार्थये श्रीमतोऽत्रविषये ध्यानं दातुम्, मदीये विचारे प्रतिग्रामपञ्चकं कचिदुत्तमे स्थाने एकम् उपद्रवनिरोधकेन्द्रं समुद्घाटयेत, यत्र चत्वारोजना नियुज्येरन्। तेषु च—

१—एको वैद्यो यो भ्रान्त्वा रोगिणः पश्येत्, तत्पत्रं तेभ्यो दद्यात् यदादाय तैस्ततः केन्द्रादौषधमवाप्येत।

२—सहायकवैद्यो यः केन्द्रे स्थित्वाऽऽगतानां पत्रवाहानां रोगिणां भेषजप्रदानेन सूचीव्यधादिना च सेवां कुर्यात्।

३—प्रचारकवैद्यो यो भ्राम्यन् रोगादस्मादात्मानं गोपयितुं प्रकारं शिक्षयेल्लोकान्।

४—अत्रैव कष्टे सर्वथा विपन्नतां गतेभ्यो जनेभ्य आर्थिकीं सहायतां दातुं लोकानां समीपतो धनसङ्ग्रहं तद्वितरणं च कर्त्तुं नियोक्तव्यजनः। चत्वारोऽप्यमी वेतनभोगिनः स्युः।

एवं व्यवस्थितानां केन्द्राणां निरीक्षणायापि द्वौ योग्यौ विश्वस्तौ च पुरुषौ च नियुज्येयाताम्। एवं यथामति मया सूचितं, सूचितमत्र विधातुं प्रभवो भवन्तः। आशासे मदीया प्रार्थना क्लेशप्रदा न मन्येत। शमिति।

प्रचारकः
वर्णाश्रमस्वराज्यसङ्घः
काशी।

भवदीयः
कृपाशङ्कर सामव्रती

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(८) कार्यापेक्षिपत्रम् ।

श्रीमन्तः प्रधानाध्यापकमहोदयाः,

शेखावतसंस्कृतमहाविद्यालयः, झांसी !

महाशयाः,

भवदीये महाविद्यालये नव्यन्यायकक्षायामहमध्येतुमीहे, प्रवेशिकापरीक्षा च मयोत्तीर्णा, अतः प्रार्थये श्रीमतो यथोचितमादेष्टुम् । प्रवेशिकापरीक्षायाः प्रमाणिता लब्धाङ्काः, परिवर्त्तनप्रमाणपत्रो च सहोपह्रियन्ते, इति

कोठिया
पो० रीगा
जिला-मुजफ्फरपुर

भवदीयः
रामप्रसन्न शर्मा
१२-६-४५

(९) कार्यापेक्षिपत्रम् ।

श्रीमन्तो विहारसंस्कृतसमितिशिक्षानिरीक्षकमहाशयाः,

पटना,

मान्यमहोदयाः,

भवदीया परीक्षणसंस्था प्रत्यब्दवदस्मिन्नपि वर्षे संस्कृतपरीक्षार्थमावेदनपत्रस्यान्तिमं दिनम् ३०।११।४५। निश्चितवती, ततः परमावेदयिता यथानियमं दण्डं दत्त्वैवावेदनं समर्पयितुं प्रभवेत् । अत्र किमपि वक्तव्यमस्ति—भवदीयसंस्कृतसमितेः परीक्षा प्रायोऽस्मिन्नपि वर्षे अप्रैलमास एव भविता । मध्ये, सार्द्धमासचतुष्टयात्मकः कालो विद्यते, दीर्घेऽस्मिन्नन्तराले नानाविधा नवीना आपदो भवितुं शक्नुवन्ति, यासां कृपया सम्प्रति कृतावेदना अपि छात्राः प्रत्यूहभाजो भवेयुः, सति चाग्रे प्रार्थनापत्रप्रदानसमये यैरधुनावधि सन्नाहो न कृतस्तेऽपि प्रयस्य सन्नह्य च सम्मिलिताः स्युः। किञ्च कस्यां चिदप्यन्यस्यां परीक्षायामियन्ति दि-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नानि पूर्वं प्रार्थनापत्राणि नाकार्यन्ते, किमिति भवानेवैकः स्वां समितिं न समयगामिनीं कर्त्तुं यतेत। अतः प्रर्थये श्रीमतो यदिमां भवन्ती मनुचितां हास्यकरां च कार्यवाहीं प्रतिबन्धुमन्ततो भाविनः 'फरवरी' मासस्यान्तिमं दिनं यावत् प्रार्थनापत्राणि ग्रहीतुं च कौन्सिलसभया प्रस्तावमङ्गीकारयितुं तथा व्यवहर्त्तुं च दयन्तां भवन्त इति।

मन्त्री
जिला छात्रसङ्घः, गया

भवदीयः
सत्यदेव मिश्रः
१।६।४४

(१०) कार्यापेक्षिपत्रम्।

श्री मन्त्रीजी महोदयः
जिलाछात्रसङ्घः, गया!

महाशय,

भवदीयस्य १-६-४४ तिथेः पत्रस्य प्रसङ्गे सूचयामि यदहं विषयमिमं कौन्सिलसभायामुपस्थापयितुं प्रयतिताहे, सति चानुकूले निर्णये भाविवत्सरतस्तदनुसारेणाचरितुं च चेष्टिताहे। इति

विहारसंस्कृतसमिति कार्यालयः
पटना
११-५-४५

भवदीयः
× ×
मन्त्री

एतावता निदर्शननिवहेन भवद्भिः पत्रलेखनप्रकारविषये सामान्यतः स्वरूपादिकमवगतं स्यात्, सति चैवं विधे सामान्यज्ञाने यथावसरं दृश्यमानस्य तस्य तस्य पत्रस्य स्वरूपेषु सतर्कां दृशमाधाय तदीयां तनुमेव मनसि व्यवस्थापयेदेवं कुर्वन् विद्यार्थी मासषट्केनात्र निपुणः स्यात्। विषयमममध्यापयन्तः शिक्षकमहोदया अपि यथासम्भवं तेष्वेव विषयेषु प्रथमं छात्रैरभ्यासं कारयेयुः येषां विषयाणां पत्रं ते लिखन्ति, यथा पितुर्भ्रातुर्वा समीपे पत्रम्, एवंविधे स्थले च जातेऽभ्यासे शिक्ष-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यिष्यमाणप्रकारकम् एकम् आदर्शभूतं पत्रं स्वयं लिखित्वा छात्राणां सविधे निदध्यु स्तदनुसारेण च्छात्रैरन्यत्र विषये पत्रं लेखयेयुश्च तैर्लिखितेषु पत्रेषु जाता अशुद्धीः परिमार्ज्य बोधयेयुश्च। एवं जातेऽसकृदभ्यासे ज्ञानमिदं पक्वं स्यात्।

यद्यपि विषयेऽस्मिन् प्रभूतः परिचयोऽपेक्ष्यते, यथा—

१–ऋणादानपत्रप्रकारः, २–विक्रयपत्रलेखनम्, ३–न्यासस्थापनम्, ४–अन्यदीयवस्तूनां भृतकतया ग्रहणस्य व्यवस्थायाः पत्रम्, ५-न्यायालयाभियोगपत्रम्, ६–यात्रावृत्तान्तलेखनम्, ७–स्नेहपत्रम् इत्येतानपि विषयानधिकृत्य लिखितान्यादर्शपत्राण्यावश्यकानि सन्ति, परं यस्यां स्थितौ ग्रन्थोऽयं लिखितस्तस्यां यावदप्यपेक्षितं तावदत्र सन्न्यवीविशम्, विद्यार्थिभिरेतैर्लाभं विधायाहमुत्साहितश्चेत्तेऽपि ध्यानं दाताहे।

चतुर्थः पल्लवः

सूक्तिरत्नमाला

इतः परं तानि तानि सूक्तिरत्नानि सङ्गृह्य समुद्ग्रथ्यन्ते येषां भावान्मनसिकृतवतां जीवनमुन्नतं भवति, यानि केवलमभ्यस्तवतां वाणी-चमत्कृतिमुपैति सकृच्छ्रुतवतामपि यानि कर्णरसायनतया मतानि भवन्ति। एतेषां समुद्धरणेन प्रबन्धतनुरलङ्कृताभवतीत्येवात्रैषां निबन्धे हेतुः। अकारादिक्रमेण चामीषामिह निर्देशः—

१–अतिदाक्षिण्य*युक्तानां शङ्कितानां पदे पदे।
परापवादभीरूणां दूरतो यान्ति सम्पदः॥
२–अष्टादशपुराणेषु व्यासस्य वचनद्वयम्।
परोपकारः पुण्याय पापाय परपीडनम्॥

* दाक्षिण्यं = शीलम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

३-अवज्ञा*स्फुटितं प्रेम समीकर्तुं क ईश्वरः ।
सन्धिं न याति स्फुटितं लाक्षालेपेन मौक्तिकम् ॥
४-अकृत्वा परसन्ताप मगत्वा खलमन्दिरम् ।
अनुत्सृज्य† सतां वर्त्म यत्स्वल्पमपि तद्बहु ॥
५-अहेतुः पक्षपातो यस्तस्य नास्ति प्रतिक्रिया ।
सहि स्नेहात्मकस्तन्तु रन्तर्मर्माणि सीव्यति ॥
६-अद्यापि दुर्निवारं स्तुतिकन्या वहति कौमारम् ।
सद्भ्यो न रोचते साऽसन्तस्तस्यै न रोचन्ते ।
७-अतिपरिचयादवज्ञासन्ततगमनादनादरो भवति ।
लोकः प्रयागवासी कूपे स्नानं समाचरति ॥
८-अमुना मरुकूपेन के के नाम न वञ्चिताः ? ।
रुदत्पथिकनेत्राम्बुपिच्छिलप्रान्तभूमिना ॥
९-अध्वन्यध्वनि तरवः पथि पथि पथिकैरुपास्यते च्छाया ।
विरलः सकोऽपि विटपी‡ यमध्वगो गृहगतः स्मरति ॥
१०-अमितगुणोऽपि पदार्थो दोषेणैकेन निन्दितो भवति ।
सकलरसायनराजो गन्धेनैकेन लशुन इव ॥
११-अङ्गणवेदो वसुधा, कुल्या¶जलधिः, स्थली च पातालम् ।
§वल्मीकश्च सुमेरुः कृतप्रतिज्ञस्य धीरस्य ।
१२-आत्मायत्ते गुणग्रामे नैर्गुण्यं वचनीयता‖ ।
दैवायत्तेषु वित्तेषु पुंसां का नाम वाच्यता$ ॥
१३-आत्माधीनशरीराणां स्वपतां निद्रया स्वया ।
कदन्नमपि मर्त्यानां ममृतत्वाय कल्पते ॥
१४-आपद्गतः खलु महाशयचक्रवर्त्ती विस्तारयत्कृतपूर्वमुदारभावम् ।
कालागुरुर्दहनमध्यगतः समन्ताल्लोकोत्तरं परिमलं प्रकटीकरोति ॥

---

*अवज्ञा = तिरस्कारः । † अनुत्सृज्य=अत्यक्त्वा । ‡ विटपी=वृक्षः ।
¶ कुल्या=कृत्रिमाल्पा सरित् (नहर) § वल्मीकः=उन्नतभूमिविशेषः ।
‖ वचनीयता = निन्दा । $ वाच्यता=निन्दा ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

१५-आयुषः क्षणएकोऽपि न लभ्यः स्वर्णकोटिभिः ।
सचेद्विफलतां नीतः का नु हानिरितोऽधिका ॥
१६-आश्रयवशेन सततं गुरुता लघुता च जायते जन्तोः ।
विन्ध्ये विन्ध्यसमानाः करिणो बत दर्पणे लघवः ॥
१७-इयमुन्नतसत्त्वशालिनां महतां कापि कठोरचित्तता ।
अपकृत्य भवन्ति दूरतः परतः प्रत्युपकार शङ्कया ॥
१८-इहरूपमात्रसारे चित्रगते *कनककह्लारे ।
न रसो नापि च गन्धो मधुकरवन्धो मुधाभ्रमसि ।
१९-उद्घाटितनवद्वारे पञ्जरे विहगोऽनिलः† ।
यत्तिष्ठति तदाश्चर्यं प्रयाणे विस्मयः कुतः ॥
२०-‡उपचारः कर्त्तव्यो यावदनुत्पन्नसौहृदाः पुरुषाः ।
उत्पन्नसौहृदानामुपचारः कैतवं भवति ॥

२१-एकोऽहमसहायोऽहं कृशोऽहमपरिच्छदः ।
स्वप्नेऽप्येवंविधा चिन्ता मृगेन्द्रस्य न जायते ॥
२२-का हि पुङ्गणना तेषां येऽन्यशिक्षा-विचक्षणाः ।
ये स्वं शिक्षयितुं शक्ता स्तेषां पुङ्गणना नृणाम् ॥
२३-कल्याणी बत गाथेयं लौकिकी प्रतिभाति मे ।
"एति जीवन्तमानन्दो नरं वर्षशतादपि" ॥

२४-कल्पद्रुमोऽपि कालेन भवेद्यदि फलप्रदः ।
को विशेष स्तदा तत्र वन्यैरन्यैर्महीरुहैः ॥
२५-§कल्लोलवेल्लितदृषत्परुषप्रहारै
रत्नान्यमूनि मकरालय, मावमंस्थाः ।
किङ्कौस्तुभेन भवतो विदधे न नाम
याच्ञाप्रसारितकरः पुरुषोत्तमोऽपि ? ॥

---

* कनककह्लारे=स्वर्णकमले । † अनिलः=प्राणवायुः । ‡ उपचारः=सत्कारादिः, शिष्टाचारः । § तरङ्गचलितकठोरशिलाघातै रित्यर्थः प्रथमपादस्य ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

२६-कर्पूरधूलीरचितालवालः* कस्तूरिकापङ्कनिमग्ननालः ।
सुवर्णकुम्भैः सुधयाऽवसिक्तः प्राञ्चं गुणं मुञ्चति किं पलाण्डुः? ॥
२७-किंशुके शुक मातिष्ठ चिरं भाविफलेच्छया ।
बाह्यरङ्गप्रसङ्गेन के के नानेन वञ्चिताः ? ॥
२८-कुसुमस्तवकस्येव द्वे गती स्तो मनस्विनाम् ।
सर्वेषां मूर्ध्नि वा तिष्ठेद्विशीर्येत वनेऽथवा ॥
२९-खलः करोति दुर्वृत्तं नूनं पतति साधुषु ।
रावणेन हृता सीता बन्धनं स्यान्महोदधेः ॥
३०-खलः सर्षपमात्राणि परच्छिद्राणि पश्यति ।
आत्मनो बिल्वमात्राणि पश्यन्नपि न पश्यति ॥
३१-गुणा गुणज्ञेषु गुणा भवन्ति
ते निर्गुणं प्राप्य भवन्ति दोषाः ।
आस्वाद्य तोयाः† प्रवहन्ति नद्यः
समुद्रमासाद्य भवन्त्यपेयाः ॥
३२-चलन्तु गिरयः कामं युगान्तपवनाहताः ।
‡कृच्छ्रेऽपि न चलत्येव धीराणां निश्चितं मनः ॥
३३-जन्मेदं वन्ध्यतां नीतं भवभोगोपलिप्सया ।
काचमूल्येन विक्रीतो हन्त चिन्तामणि र्मया ॥
३४-तावदाश्रीयते लक्ष्म्या तावदस्य स्थिरं यशः ।
पुरुष स्तावदेवासौ यावन् मानान्न हीयते ॥
३५-धनेषु जीवितव्येषु स्त्रीषु भोजनवृत्तिषु
अतृप्ता मानवाः सर्वे याता यास्यन्ति यान्ति च ॥
३६-नास्त्यचौरः कविजनो नास्त्यचौरो वणिग्जनः ।
स नन्दति विनावाच्यं यो जानाति निगूहितुम् ॥

---

* आलबालम्=पयोदानाय निर्मितो वृक्षाधो-भागावधस्थितो गर्त्तविशेषः ।
† आस्वाद्यतोयाः=मधुरजलाः । ‡ कृच्छ्रे=कष्टे ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

३७-नात्यन्तं सरलैर्भाव्यं गत्वा पश्य वनस्थलीम् ।
छिद्यन्ते सरला स्तत्र कुब्जास्तिष्ठन्ति पादपाः ॥
३८-नाधर्म श्चरितो लोके सद्यः फलति गौरिव ।
शनै रावर्त्तमानस्तु कर्तुं मूलानि कृन्तति ॥
३९-न द्विषन्ति न याचन्ते परनिन्दां न कुर्वते ।
अनाहूता न चायान्ति तेनाश्मानोऽपि देवताः ॥
४०-न ज्ञातुं नाप्यवज्ञातुं नेक्षितुं नाप्युपेक्षितुम् ।
स्वजनः स्वजने जातं विपत्यातं समीहते ॥
४१-निजदोषावृतमनसा मतिसुन्दरमेव भाति विपरीतम् ।
पश्यति *पित्तोपहतः शशिशुभ्रं शङ्खमपि पीतम् ॥
४२-प्रत्यक्षकविकाव्यञ्च रूपञ्च कुलयोषितः ।
गृहवैद्यस्य विद्या च कस्मै चिद्यदि रोचते ॥
४३-प्रत्यहं समवेक्षेत नर श्चरितमात्मनः ।
किन्नु मे पशुभिस्तुल्यं किन्नु सत्पुरुषैरिति ॥
४४-प्रतिकूलता मुपगते हि विधौ विफलत्वमेति बहुसाधनता ।
अवलम्बनाय दिनभर्तुरभून्न पतिष्यतः करसहस्रमपि ॥
४५-पुराण मित्येव न साधु सर्वं, न चापि काव्यं नव मित्यवद्यम् ।
सन्तः परीक्ष्यान्यतरद्भ भजन्ते, मूढः परप्रत्ययनेय बुद्धिः ॥
४६-पिबन्ति मधु पद्मेषु भृङ्गाः केसरधूसराः ।
हंसाः शैवाल मश्नन्ति धिग्दैव मसमञ्जसम् ।
४७-परार्थे यः पीडा मनुभवति भङ्गेऽपि मधुरो
यदीयः सर्वेषा मिह खलु विकारोऽप्यभिमतः ।
न सम्प्राप्तो वृद्धिं यदि स भृशमक्षेत्रपतितः
किमिक्षो र्दोषोऽयं न पुनर†गुणाया मरुभुवः ? ॥

---

* पित्तम् = एको नेत्ररोगो यस्मिन् हि सति सर्वमेव दृश्यमानं पीतपीतमिव ।
ऽतीयते ।   † अगुणायाः = ऊषरायाः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

४८-व्रजत्यधः प्रयात्युच्चै र्नरः स्वैरेव चेष्टितैः।
अधः कूपस्य खनक ऊर्ध्वं प्रासादकारकः॥
४९-भो दारिद्र्य ! नमस्तुभ्यं सिद्धोऽहं त्वत्प्रसादतः।
पश्याम्यहं जगत्सर्वं न मां पश्यति कश्चन॥
५०-मरणं प्रकृतिः शरीरिणां विकृति र्जीवितमुच्यते बुधैः।
क्षणमप्यवतिष्ठते श्वसन् यदि जन्तु र्ननु लाभवानसौ॥
५१-मनो मधुकरो मेघो मानिनी मदनो मरुत्।
मा मदो मर्कटो मत्स्यो मकारा दश चञ्चलाः॥
५२-मुक्ताः कतिपयाः प्राप्य मातङ्गा मदविह्वलाः।
रत्नै रापूरितस्यापि मदलेशोऽपि नाम्बुधेः॥
५३-यान्ति न्यायप्रवृत्तस्य तिर्यञ्चोऽपि सहायताम्।
अपन्थानं तु गच्छन्तं सोदरोऽपि विमुञ्चति॥
५४-यदि सन्ति गुणाः पुंसां विकसन्त्येव ते ध्रुवम्।
नहि कस्तूरिकामोदः शपथेन विभाव्यते॥
५५-यदीच्छसि वशीकर्त्तुं जगदेकेन कर्मणा।
परापवादसस्येभ्य श्चरन्तीं गां निवारय॥
५६-यदचेतनोऽपि पादैः स्पृष्टः प्रज्वलति सवितु रिनकान्तः।
तत्तेजस्वी पुरुषः परकृतनिकृतिं कथं सहते ?
५७-युक्तोसि भुवनभारे मा वक्रां वितनु कन्धरां शेष।
त्वय्येकस्मिन् दुःखिनि सुखितानि भवन्ति भुवनानि॥
५८-रविरपि न दहति तादृग् यादृक् संदहति बालुकानिकरः।
अन्यस्माल्लब्धपदो नीचः प्रायेण दुःसहो भवति॥
५९-लक्ष्मीवन्तो न जानन्ति प्रायेण परवेदनाम्।
शेषे धराभराक्रान्ते शेते नारायणः स्वयम्॥
६०-वदनं प्रसादसदनं, हृदयं सदयं सुधामुचो वाचः।
करणं परोपकरणं, येषां, केषां नते वन्द्याः ?॥
६१-वंशभवो गुणवानपि सङ्गविशेषेण पूज्यते पुरुषः।
नहि तुम्बीफलविकलो वीणादण्डः प्रयाति महिमानम्॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

६२-शरीरनिरपेक्षस्य दक्षस्य व्यवसायिनः ।
बुद्धिप्रारब्धकार्यस्य नास्ति किञ्चन दुष्करम् ॥
६३-सर्वे कुशलिनः सन्तु सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु माकश्चिद्दुःखभाग्भवेत् ॥
६४-सुलभाः पुरुषा राजन् सततं प्रियवादिनः ।
अप्रियस्य च सत्यस्य वक्ता श्रोता च दुर्लभः ॥
६५-साक्षरा विपरीताश्चेद्राक्षसा एव केवलम् ।
सरसो विपरीतश्चेत्सरसत्वं न मुञ्चति ॥

इति सूक्तिरत्नमाला

सुभाषितगद्यावली ।

१-अप्रतिभस्य पदार्थसार्थः परोक्ष इव, प्रतिभावतः पुनरपश्यतोऽपि प्रत्यक्ष इव ।
२-अनियत-कालाः प्रवृत्तयो विप्लवन्ते ।
३-अन्यदृष्टिचरेह्यर्थे महाकवयो जात्यन्धास्तद्विपरीते तु दिव्यदृशः ।
४-अतिदीप्तोऽपि खद्योतो न पावकः ।
५-अग्निदाहादपि विशिष्टं वाक्पारुष्यम् ।
६-अप्रियेण कृतं प्रियमपि द्वेष्यं भवति ।
७-अतिस्नेहः पापशङ्की ।
८-अनुत्सेकः खलु विक्रमालङ्कारः ।
९-अतिरोषणश्चक्षुष्मानप्यन्ध एव जनः ।
१०-अतिद्रुतवाहिनो ह्यनित्यतानदी ।
११-अहो दुर्निवारता व्यसनोपनिपातानाम् ? ।
१२-अनतिक्रमणीया हि नियतिः ।
१३-अवहितं हि चित्तमर्थान्तरं पश्यति ।
१४-अभ्यासो हि कर्मणि कौशलमादधाति, नहि सकृन्निपातमात्रेणोदबिन्दुरपि ग्रावणि निम्नता मादधाति ।
१५-अनिषिद्धं ह्यनुमतं भवति ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

१६-आत्मानमेव प्रतिहन्त्यनात्मवतां कोपः।
१७-आयसैरायसश्छेद्यः।
१८-आत्मानमात्मनाऽनावसाद्यैवोद्धरन्ति सन्तः।
१९-आवेदयन्ति हि प्रत्यासन्न मानन्द मग्रपातीनि शुभानि निमित्तानि।
२०-आजन्मक्रमाहितो बलवान् जननीस्नेहः।
२१-आप्तादपि हि विकत्थमानादत्यर्थमुद्विजन्ति लोकाः।
२२-इह जगति हि न निरीहदेहिनं श्रियः संश्रयन्ते।
२३-उपयोगं तु न प्रीति विचारयति।
२४-उद्यमेन हि सिद्ध्यन्ति क्रिया नेच्छया केवलया।
२५-एरण्ड मवलम्ब्य कुञ्जरं न कोपयेत्।
२६-एकार्थं हि क्रिया-द्वयं द्वैगुण्याय सम्पद्यते।
२७-क्षीरार्थिनः किं करिण्या।
२८-छिन्नबन्धे मत्स्ये पलायिते निर्विण्णो धीवरो भणति धर्मो मे भविष्यतीति।
२९-जलबुद्बुदसमाना विराजमाना सम्पत्तडिल्लतेव सहसैवोदेति नश्यति च।
३०-दर्पलवोऽपि सर्वसंस्कारानुच्छिनत्ति।
३१-दुर्बद्धं सुबद्धं भवति।
३२-नह्यप्रवर्तितप्रदीपा स्तत्त्वार्थसार्थ मध्यक्षयन्ति।
३३-न त्वरितस्य नक्षत्रपरीक्षा।
३४-नाग्नि मिच्छता धूमस्त्यज्यते।
३५-न कदापि सत्पुरुषाः शोकपात्रात्मानो भवन्ति।
३६-नास्त्यगतिर्मनोरथानाम्।
३७-न कामुकः कालाद् बिभेति।
३८-नह्यलमति-निपुणोऽपि पुरुषो नियति-लिखितां लेखामतिक्रमितुम्
३९-नहि खल्वसाध्यं नाम भगवतो मनोभुवः।
४०-नहि शक्यं दैवमन्यथा कर्तु मभियुक्तेनापि।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

४१-न च स्वप्नदृष्टनष्टेष्विव क्षणिकेषु शरीरेषु निबध्नन्ति बन्धु-बुद्धिमभियुक्ताः ।

४२-नहि कठोरकण्ठीरवस्य कुरङ्गशावः प्रतिभटो भवति ।

४३-नहि भवति तरक्षुः प्रतिपक्षो हरिणशावस्य ।

४४-नहि भिक्षुकाः सन्तीति स्थाल्यो नाधिश्रीयन्ते, नवा मृगाः सन्तीति यवा नोप्यन्ते ।

४५-नहि वरविघाताय कन्योद्वाह्यते ।

४६-नह्यागमाः सहस्रमपि घटं पटयितुमीशते ।

४७-नह्यतः पापात् पापीयोऽस्ति यदनुपकरणस्य दीर्घमायुः ।

४८-न चन्द्रादातपो भवति ।

४९-नैष स्थाणोरपराधो यदेन मन्धो न पश्यति ।

५०-नित्यं ह्यविज्ञातु विज्ञानेऽभ्यसूया ।

५१-नहि कतकं पयस इव पङ्कस्य प्रसादनाय प्रभवति ।

५२-पुत्रात्पराजयो द्वितीयं पुत्रजन्म ।

५३-प्रायः प्राणभृतां प्रेमाणमन्तरेण नान्यद्बन्धनमस्ति ।

५४-परगुणवाचयँमस्य मत्सरिणस्तु प्रतिभातमपि न प्रतिभातम् ।

५५-पक्षपातो हि गुणदोषो विपर्यासयति ।

५६-प्रायः समानविद्याः परस्परयशःपुरोभागाः ।

५७-भक्षितेपि लशुने न शान्तो व्याधिः ।

५८-भुजे वीर्यं निवसति न वाचि ।

५९-मिथ्यापि तत्तथा यथा गृहीतं लोकेन ।

६०-मारणाय गृहीतोऽङ्गच्छेदं स्वीकरोति ।

६१-यादृशाकारश्चित्रकरस्तादृशमस्य चित्रम् ।

६२-यः संसदि परदोषं वक्ति स स्वदोषबहुत्वं ख्यापयति ।

६३-यवागूरपि प्राणधारणं करोति काले ।

६४-यदेव किंचनानूचानोऽभ्यूहत्यार्षं तद्भवति ।

६५-लुब्धसेवी पावकेच्छया खद्योतं धमति ।

६६-बहुभाषिणो न श्रद्दधाति लोकः ।

६७-विस्रम्भभ्रंशश्च निःश्रेयसं सन्निधत्ते ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

६८-विषयान्तरविनिवृत्तं हि चित्तं यत्र प्रणिधीयते, तत्र गुड्डचोलागं लगति ।

६९-वृश्चिकभिया पलायमानस्याशीविषमुखे विनिपातः ।

७०-सर्वनाशे समुत्पन्ने त्यजत्यर्धं विचक्षणः ।

७१-स पुन रमत्सरी ज्ञाता च विरलः ।

७२-स्वस्वविषये सर्वो गरीयान्, नहि राजहंसश्चन्द्रिकापानाय प्रभवति नापि चकोरोऽम्बुधः क्षीरोद्धरणाय ।

७३-संस्कारो हि सर्वस्य गुणमुत्कर्षति, द्वादशवर्णमपि सुवर्णं पावकपाकेन हेमीभवति ।

७४-संस्कारो ह्यात्मनि समवैति न स्त्रैणं पौरुषं वा विभागमपेक्षते ।

७५-सारस्वतं हि चक्षुरवाङ्मनसगोचरेण दृष्टमदृष्टं चार्थजातं स्वयं विभजति ।

७६-सुसंस्कृतोऽपि पिचुमर्दो न सहकारः ।

७७-स्वहस्तोऽपि विषदिग्धश्छेद्यः ।

७८-स्वजनावमानो हि मनस्विनां दुःखमावहति ।

७९-सर्वः कान्तमात्मीयं पश्यति ।

८०-स्निग्धजनसंविभक्तं हि दुःखं सह्यवेदनं भवति ।

८१-सतां हि प्रियंवदता कुलविद्या ।

८२-सोऽयं कुरङ्गकैः कचग्रहः केसरिणः ।

८३-स्थायिनि यशसि शरीरधी र्धीराणाम् ।

८४-सर्वथा न कञ्चन न स्पृशन्ति शरीरधर्माणमुपतापाः ।

८५-सर्वथा दुर्लभं यौवन मस्खलितम् ।

८६-सत्योऽयं लोकसंवादो-यत्सम्पत्सम्पदं विपद् विपदमनुबध्नातीति ।

८७-सुखमुपदिश्यते परस्य ।

८८-स्नेहश्च निमित्तसव्यपेक्षश्चेति विप्रतिषिद्धमेतत् ।

८९-सेयमाकृति र्न व्यभिचरति शीलम् ।

९०-हरिणार्थमतिक्षेपणः सिंहसम्भारः ।

इति सुभाषितगद्यावली ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सुभाषितपद्यांशावली ।

१-अपथे पदमर्पयन्ति हि श्रुतवन्तोऽपि रजो निमीलिताः ।

२-अपिस्वदेहात्किमुतेन्द्रियार्थाद्यशोधनानां हि यशो गरीयः ।

३-अभितप्तमयोऽपि मार्दवं भजते कैव कथाशरीरिषु ?

४-अलोकसामान्यमचिन्त्यहेतुकं, द्विषन्ति मन्दाश्चरितं महात्मनाम्

५-अयथाबलमारम्भो निदानं क्षयसम्पदः ।

६- अस्तसमयेऽपि सतामुचितं खलूच्चतरमेव पदम् ।

७-अपां हि तृप्ताय न वारिधारा स्वादुःसुगन्धिः स्वदते तुषारा ।

८-अदोषतामेव सतां विवृण्वते, सतां मृषादोषकणाधिरोपणाः।

९-अवश्यभव्येष्वनवग्रहग्रहा, यया दिशा धावति वेधसःस्पृहा ।

तृणेन वात्येव तयानुगम्यते, जनस्य चित्तेनभृशावशात्मना ॥

१०-११-अनुहुङ्कुरुते घनध्वनिं नहि गोमायुरुतानि केसरी ।

१२-अन्धस्य किं हस्ततलस्थितोऽपि, प्रकाशयत्यर्थमिह प्रदीपः ।

१३-अल्पानामपि वस्तूनां संहतिः कार्यसाधिका ।

१४-अशेषदोषदुष्टोऽपि कायः कस्य न वल्लभः ।

१५-अकाण्डपातोपनता न कं लक्ष्मीर्विमोहयेत् ।

१६-अचिन्त्यो वत दैवेनाभ्यापातः सुखदुःखयोः ।

१७-अप्राप्यं नाम नेहास्ति धीरस्य व्यवसायिनः ।

१८-अश्नुते सहि कल्याणं व्यसने यो न मुह्यति ।

१९-अहो दैवाभिशप्तानां प्राप्तोऽप्यर्थः पलायते ।

२०-अरक्षितं तिष्ठति दैवरक्षितं, सुरक्षितं दैवहतं विनश्यति ।

२१-अप्रकटीकृतशक्तिः शक्तोऽपि जनस्तिरस्क्रियां लभते ।

२२-अकृतोपद्रवः कश्चिन्महानपि न पूज्यते ।

२३-'अर्के' चेन्मधुविन्देत किमर्थं पर्वतं व्रजेत् ।

२४-अशक्तोऽहं गृहारम्भे शक्तोऽहं गृहभञ्जने ।

२५-अगच्छन् वैनतेयोऽपि पदमेकं न गच्छति ।

२६-अङ्कमारुह्य सुप्तानां हन्तुः किन्नाम पौरुषम् ।

२७-अपि धन्वन्तरिर्वैद्यः किं करोति गतायुषि ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

२८–अप्यप्रसिद्धं यशसे हि पुंसामनन्यसाधारणमेव कर्म ।
२९–अन्धस्येवान्धलग्नस्य विनिपातः पदे पदे ।
३०–आपन्नार्तिप्रशमनफलाः सम्पदो ह्युत्तमानाम् ।
३१–आर्जवं हि कुटिलेषु न नीतिः ।
३२–आरब्धा ह्यसमाप्तैव किं धीरैस्त्यज्यते क्रिया ।
३३–आत्मनः प्रतिकूलानि परेषां न समाचरेत् ।
३४–आपदि स्फुरति प्रज्ञा यस्य धीरः स एव हि ।
३५–आदानं हि विसर्गाय सतां वारिमुचामिव ।
३५–इन्धनौघधगप्यग्निस्त्विषा नात्येति पूषणम् ।
३७–उदारचरितानां तु वसुधैव कुटुम्बकम् ।
३८–उत्तरादुत्तरं वाक्यं वदतां सम्प्रजायते ।
३९–उष्णत्वमग्न्यातपसम्प्रयोगाच्छैत्यं हि यत्सा प्रकृति र्जलस्य ।
४०–उपनतमवधीरयन्त्यभव्याः ।
४१–उपायमास्थितस्यापि नश्यन्त्यर्थाः प्रमाद्यतः ।
४२–ऋते रवेः क्षालयितुं क्षमेत कः क्षपातमस्काण्डमलीमसं नभः ।
४३–क्रिया हि वस्तूपहिता प्रसीदति ।
४४–क ईप्सितार्थस्थिरनिश्चयं मनः, पयश्च निम्नाभिमुखं प्रतीपयेत् ।
४५–कस्यात्यन्तं सुखमुपनतं दुःखमेकान्ततो वा ।
नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण ।
४६–क्षुद्रेऽपि नूनं शरणं प्रपन्ने ममत्वमुच्चैः शिरसां सतीव ।
४७–कथाऽपि खलु पापानामलमश्रेयसे यतः ।
४८–क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः ।
४९–कर्म कः स्वकृतमत्र न भुङ्क्ते ?,
५०–कार्यं निदानाद्धि गुणानधीते ।
५१–को नाम पाकाभिमुखस्य जन्तोर्द्वाराणि दैवस्य पिधातुमीष्टे ।
५२–काचः काचो मणिर्मणिः ।
५३–कोहि वित्तं रहस्यं वा स्त्रीषु शक्नोति गूहितुम् ।
५४–कष्टा हि कुटिलश्वश्रूपरतन्त्रवधूस्थितिः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

५५-कदर्याणां परे प्राणाः प्रायेण ह्यर्थसञ्चयाः ।
५६-कामं व्यसनवृक्षस्य मूलं दुर्जनसङ्गतिः ।
५७-केवलोऽपि सुभगो नवाम्बुदः किंपुन स्त्रिदशचापलाञ्छितः।
५८-किं तया क्रियते धेन्वा या न सूते न दुग्धदा ।
५९-खला विनैव दहनं दहन्ति जगतीतलम् ।
६०-घनाम्बुना राजपथे हि पिच्छिले, क्वचिद्बुधैरप्यपथेन गम्यते।
६१-चकास्ति योग्येन हि योग्यसङ्गमः ।
६२-जीवन्तमेव कुष्णाति काकीव कुकुटुम्बिनी ।
६३-जनानने कः कर मर्पयिष्यति ।
६४-ज्ञानमार्गे ह्यहङ्कारः परिघो दुरतिक्रमः ।
६५-जलविन्दुनिपातेन क्रमशः पूर्यते घटः ।
६६-ज्ञातसारोऽपि खल्वेकः सन्दिग्धे कार्यवस्तुनि ।
६७-जितरोषरया महाधियः सपदि क्रोधजितो लघुर्जनः ।
६८-तेजसां हि न वयः समीक्ष्यते ।
६९-तत्तस्य किमपि द्रव्यं, यो हि यस्य प्रियो जनः ।
७०-तातस्य कूपोऽयमिति ब्रुवाणाः, क्षारं जलं कापुरुषाः पिबन्ति ।
७१-द्विषन्मुखेऽपि स्वदतेस्तुतिर्या, सैव प्रमाणं खलु योग्यतायाः।
७२-दुर्जया हि विषया विदुषाऽपि ।
७३-दर्दुरा यत्र वक्तार स्तत्र मौनं हि शोभनम् ।
७४-दैवे विरुन्धति निबन्धनतां वहन्ति, हन्त प्रयासपरुषाणि न पौरुषाणि ।
७५-धिगिमां देहभृता मसारताम् ।
७६-निर्दोहधेनुमहिमा नहि किङ्किणीभिः ।
७७-निरस्तपादपे देशे एरण्डोऽपि द्रुमायते ।
७८-न पादपोन्मूलनशक्ति रंहः शिलोच्चये मूर्च्छति मारुतस्य ।
७९-न हीङ्गितोऽवसरेऽवसीदति ।
८०-ननु वक्तृविशेषनिःस्पृहा गुणगृह्या वचने विपश्चितः ।
८१-निवसन्ति पराक्रमाश्रया, न विषादेन समं समृद्धयः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

८२-न हि प्रवक्तुमिच्छन्ति मृषा हितैषिणः ।

८३-न तितिक्षासममस्ति साधनम् ।

८४-न काचस्य कृते जातु युक्ता चिन्तामणेः क्षतिः ।

८४ A-नष्टं मृतमतिक्रान्तं नानुशोचन्ति पण्डिताः ।

८५-नक्रः स्वस्थानमासाद्य गजेन्द्रमपि कर्षति ।

८६-निर्वाते ज्वलितो दीपः स्वयमेव प्रशाम्यति ।

८७-न नश्यति तमो नाम कृतया दीपवार्तया ।

८८-नहि कृतमुपकारं साधवो विस्मरन्ति ।

८९-नास्ति व्यसनिनां किञ्चिद् भुवि पर्याप्तये धनम् ।

९०-निःसारस्य पदार्थस्य प्रायेणाडम्बरो महान् ।

९१-नवे हि भाजने लग्नः संस्कारो नान्यथा भवेत् ।

९२-नव्यापार-शतेनापि शुकवत् पाठ्यते वकः ।

९३-ना धर्मश्चिर मेधते ।

९४-पवनः परागवाही रथ्यासु वहन् रजस्वलो भवति ।

९५-पाणौ पयसा दग्धे तक्रं फूत्कृत्य पामरः पिबति ।

९६-प्राणेभ्योपि हि धीराणां प्रिया शत्रुप्रतिक्रिया ।

९७-प्रायः शुभञ्च विदधात्यशुभञ्च जन्तोः ।
सर्वङ्कषा भगवती भवितव्यतैव ।

९८-प्रयोजनमनुदिश्य न मन्दोऽपि प्रवर्त्तते ।

९९-प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम् ।

१००-पङ्को हि नभसि क्षिप्तः क्षेप्तुः पतति मूर्द्धनि ।

१०१-प्रेत्यास्मि कीदृग्भवितेति चिन्तासन्तापमन्त स्तनुते हि जन्तोः

१०२-परैरपर्यासितवीर्यसम्पदां पराभवोऽप्युत्सव एव मानिनाम् ।

१०३-प्रेम पश्यति भयान्यपदेऽपि ।

१०४-प्रायेण सामग्र्यविधौ गुणानां पराङ्मुखी विश्वसृजः प्रवृत्तिः ।

१०५-प्रायः प्रत्ययमाधत्ते स्वगुणेषूत्तमादरः ।

१०६-प्रतिकारविधान मायुषः सति शेषे हि फलाय कल्पते ।

१०७-पर्याय पीतस्य सुरै र्हिमांशोः कलाक्षयःश्लाघ्यतरो हि वृद्धेः ।

१०८-पदं हि सर्वत्र गुणै र्निधीयते ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

१०९-ब्रुवते हि फलेन साधवो, नतु कण्ठेन निजोपयोगिताम् ।
११०-व्रजन्ति ते मूढ़धियः पराभवं भवन्ति मायाविषु ये न मायिनः ।
१११-बद्धमूलस्य मूलं हि मह द्वैरतरोः स्त्रियः ।
११२-बृहत्सहायः कार्यान्तं क्षोदीयानपि गच्छति ।
११३-भावो वेशो भाषा भूषा यैर्न रक्षितास्ते कुलदूषाः ।
११४-भक्ष्यमाणो निरुदयः सुमेरुरपि हीयते ।
११५-भिन्नश्लिष्टा तु या प्रीतिर्न सा स्नेहेन वर्द्धते ।
११६-भवन्ति भव्येषु हि पक्षपाताः ।
११७-भिन्नरुचिर्हि लोकः ।
११८-मा जीवन्यः परावज्ञादुःखदग्धोऽपि जीवति ।
११९-महीयांसः प्रकृत्या मितभाषिणः ।
१२०-मितं च सारं च वचो हि वाग्मिता ।
१२१-महान् महत्येव करोति विक्रमम् ।
१२२-याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा ।
१२३-यो यद् वपति बीजं हि लभते सोऽपि तत्फलम् ।
१२४-यद्भविष्यो विनश्यति ।
१२५-यस्मिन् कुले त्वमुत्पन्नो गजस्तत्र न हन्यते ।
१२६-रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय ।
१२७-न्नताश्रितानुरोधेन किन्न कुर्वन्ति साधवः ।
१२८-वक्ति जन्मान्तरप्रीतिं, मनः स्निग्धदकारणम् ।
१२९-विचित्ररूपाः खलु चित्तवृत्तयः ।
१३०-विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीराः ।
१३१-विमलं कलुषीभवच्च चेतः, कथयत्येव हितैषिणं रिपुं वा ।
१३२-विनायकं प्रकुर्वाणो रचयामास वानरम् ।
१३३-श्रेयसि केन तृप्यते ?
१३४-श्रेयांसि बहु विघ्नानि ।
१३५-सेवा धर्मः परमगहनो योगिनामप्यगम्यः ।
१३६-स धीरो यो न सम्मोह मापत्कालेपि गच्छति ।
१३७-सम्भावितस्य चाकीर्त्तिर्मरणादतिरिच्यते ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

१३८–समानशीलव्यसनेषु सख्यम् ।

१३९–सहैव दशभिः पुत्रैर्भारं वहति गर्दभी ।

१४०–सदाभिमानैकधना हि मानिनः ।

१४१–सर्वः स्वार्थं समीहते ।

१४२–समय एव करोति बलाबलम् ।

१४३–सामानाधिकरण्यं हि तेजस्तिमिरयोः कुतः ।

१४४–सा लक्ष्मीरुपकुरुते यया परेषाम् ।

१४५–सहसा विदधीत न क्रियामविवेकः परमापदां पदम् ।

१४६–हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा ।

१४७–हितं मनोहारि च दुर्लभं वचः ।

१४८–हिमवति दिव्यौषधयः शीर्षे सर्पः क्रुधाविष्टः ।

लौकिकन्यायमञ्जरी

१ अजाकृपाणीन्यायः

[यथा कण्डूयनार्थं स्तम्भादौ ग्रीवां घर्षयन्त्या अजाया स्तत्रैव स्तम्भे लम्बमानस्य खड्गस्य पातेन ग्रीवा च्छिद्यते, तथैव यत्राऽकस्मादनर्थ आपतेत्तत्राऽस्य न्यायस्याऽवसरः]

२ अन्धगजन्यायः

[यथाऽन्धानां समाजे समुपस्थित एको गजः, तेषामन्धानां मध्ये यः पुच्छदेशे तं स्पृष्टवान् तस्य मते गजः सर्प इव, यश्च शुण्डदेशे स्पृष्टवाँस्तन्मतेन गजः स्तम्भाकृतिः, यश्च कर्णभागेऽस्पृशत् तस्य बुद्धौ सूर्पइवेत्यस्तिबुद्धिभेदः, एवमेवैकस्मिन् पदार्थे अज्ञानवशाद् बुद्धिभेदेजायमानेऽस्य न्यायस्यावतारः]

३ अन्धस्येवान्धलग्नस्य विनिपातः पदे पदे

[स्पष्टोऽस्याशयः]

४ काकतालीयन्यायः

[कस्याप्यर्थस्याकस्मादुपनिपातेऽस्य प्रयोगः क्रियते । 'अजाकृपाण' न्यायोऽप्येतद्विषय एव]

५ कूपमण्डूकन्यायः

[यथा मण्डूकाः कूपे तिष्ठन्तस्तावन्मात्रमेव ब्रह्माण्डं कल्पयन्ति, तथैव यस्य सङ्कुचितं ज्ञानं तदुपहासेऽस्य न्यायस्यावसरः]

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

६ घुणाक्षरन्यायः

[यथा घुणेन काष्ठे भुज्यमाने दैववशात् किमप्यक्षरं निष्पद्यते, न च तत्र किमपि तदक्षरनिर्वृत्तौ घुणस्य तस्य गौरवं तथैव यत्र कस्यचिद्-दक्षस्यापुष्कलेनापि (फलान्तराभिसन्धिप्रवृत्तेन वा) प्रयासेन किमपि कार्यं जन्यते तत्रास्य न्यायस्यावतारः]

७ तुष्यतु दुर्जनन्यायः

[यथा कस्यचित् सत्पथप्रवृत्तस्याऽपि वक्तुः स्वप्रतिवादिनः कियतांशेन तोषाय तदुक्तिविषये ध्यानदानं जायते, तथैव वस्तुतोऽनिच्छायामपि तत्तोषमात्रधिया प्रवृत्तावस्यावसरः]

८ पङ्कप्रक्षालनन्यायः

['प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्' इत्येवास्याशयः]

९ अरण्यरोदनन्यायः

[यथाऽरण्ये वर्त्तमानः कोपि रुदन् कस्यापि हृदयं स्वविषयकदयाभावेदयार्द्रं विधातुं न प्रभवति तथैव वृथा प्रयासस्थलेऽस्य न्यायस्य प्रयोगः] (अत्रैवाशये 'भस्मन्याज्याहुतिन्यायः' प्रयुज्यते, प्रचलितप्रयोगश्चायमपि न्यायः)

१० पिष्टपेषणन्यायः

[जातेऽपि कार्ये तत्सिद्ध्यनुकूलकार्यानुष्ठानस्थलेऽस्य प्रयोगं कुर्वते बुधाः]

११ सूचीकटाहन्यायः

[यथा केन चित्सूचीं कटाहं च निर्मातुमिच्छता लाघवादरेण प्रथमं कटाहनिर्माणे प्रवृत्त्यते. तथैव गुरुलघुभावविभावनया लघुनि कार्ये प्रवृत्तिरस्य न्यायस्यावसर मुपस्थापयति]

१२ स्थालीपुलाकन्यायः

[यथा स्थालीगतास्तण्डुलाः पक्वा न वेति सन्देहे निश्चयाय प्रवर्त्तमानस्ततः स्थाल्यास्तण्डुलद्वितयं तत्त्रितयं वा भूमौ निधाय तदीयसिद्धत्वासिद्धत्वेपाणिना परीक्ष्य तदनुसारेण समस्तमपि स्थालीगतं तण्डुल प्रकरं सिद्धमसिद्धं वा निश्चिनोति, तथाविध एव विषयेऽस्यावसरः]

१३ फलवत्सहकारन्यायः

[यथा आम्रे फलोपभोगाय रोप्यमाणे छायासुगन्धौ विना पृथक्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रयत्नमेवोत्पद्येते, तथैव कस्यापि कार्यस्य अपृथग्यत्ननिर्वर्त्यतायामस्य प्रयोगः]

१४ कण्ठचामीकरन्यायः

[चामीकरं-सुवर्णम्, यथा कण्ठगतं हेमभूषणं स्थानान्तरे न्यस्तं पतितं वोत्प्रेक्षमाणस्तदन्वेषणाय व्यग्रतां प्रदर्शये, तथैवात्मरूपतया ब्रह्मणि प्राप्तेऽपि तदुपायानुसन्धाने प्रवृत्तिरस्य न्यायस्य प्रयोगस्थानम्]

१५ तृणजलौकान्यायः

[यथा तृणजलौकाः तृणान्तरमाश्रित्यैव पूर्वतनं तृणं त्यजति तथैव परमाश्रयमाप्यैव पूर्वस्थानत्यागेऽस्य न्यायस्यावतारः]

१६ स्थूणानिखननन्यायः

[यथा ऽसकृत्सञ्चाल्य निखाता स्थूणा स्थिरा भवति तथैव ज्ञातोऽप्यर्थो यत्र पुनः पुनः सन्दिह्य दृढीक्रियते तत्रैवास्य प्रयोगः]

१७ सिंहावलोकनन्यायः

[यथा सिंहः कञ्चिन्मृगं हत्वाऽग्रे गच्छन्नन्योऽपि चेत्स्यात्तमपि हन्यामिति धिया पश्चादवलोकते, तथा बुद्धिपथागतस्वप्रतिपादितकल्पित युक्तिनिरासाय यत्रोत्तरग्रन्थस्यावतार स्तत्रास्यावसरः]

१८ गड्डलिकाप्रवाहन्यायः

[यथा मेषीणां गणादेका मेषी यद्यकस्मात्कूपे पतति तदा वार्यमाणा अप्यपराः कूपे पतितुमारभन्ते, तथैव कारणाविमर्शेन कार्ये प्रवृत्तावस्योपयोगः]

१९ रेखागवयन्यायः

[यथा केनचिद् ग्रामीणेन पृष्टो वन्यः 'कीदृशो गवय' इति स तं लिखित्वा दर्शयति-गवयोऽयमिति स चर्जुबुद्धित्वाद्रेखां गवयं मन्यमानः पश्चा द्वन ङ्गत्वा तत्र च गवयं बोदय रेखायां गवयधियं मुञ्चति, तद्वदसत्यदृष्टान्तेन कस्यचित् सत्यार्थप्रतिपादनेऽस्याऽवसरः]

२० मण्डूकतोलनन्यायः

[यथा मण्डूकतोलने प्रक्रम्यमाणे तुलास्था मण्डूका स्तुलात उत्प्लुत्य पलायन्ते तोलनं च निरुध्यते, तथैवातिव्यर्थकार्यप्रवृत्तौ प्रसरोऽस्य न्यायस्य]

२१ कीटभृङ्गन्यायः

[यथा कीटो भ्रमरेण गृह्यमाणो भ्रमरमनुध्यायन् कालेन भ्रमरत्व-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मापद्यते तथा संसर्गप्रभावाद् गुणसङ्क्रमस्थलेऽस्य न्यायस्य प्रसारः]

२२ नीरक्षीरन्यायः

[हंसो हि पयसि चञ्चुं न्यस्य जलं पयसः पृथक्करोति तथैव सत्यासत्यप्रविवेकेऽस्य न्यायस्यावसरः]

२३ सुन्दोपसुन्दन्यायः

[अन्योऽन्यनाश्यनाशकभावविवक्षायां प्रवृत्तिरस्य न्यायस्य, एवं हि श्रूयते पुरा तिलोत्तमानामकवेश्यार्थं सुन्दोपसुन्दनामानौ सहोदरौ दैत्यौ परस्परं विरोध्य अन्योन्यखड्गप्रहारेण च्छिन्नशिरस्कौ बभूवतुरिति]

२४ नष्टाश्वदग्धरथन्यायः

[एकं कार्यमुद्दिश्य प्रवर्त्तमानौ द्वौ पुरुषौ स्त, स्तयोरुभयोरपि साधनं कियत्यंशे न्यूनमिवासीत् मिलित्वा चोभयोः साधनसामग्री पूर्णतां गताऽभूद्दृश्यैव स्थाने न्यायोऽयं प्रयुज्यते । न्यायस्यास्यायमितिहासः-''द्वौ रथिनौ कञ्चिद् ग्रामं प्रविश्य स्वाभ्यां रथाभ्यामवतीर्याश्वाँस्ताभ्यां मोचयित्वा विश्रमितुं प्रवृत्तौ । दैवाज्जातेऽग्निकाण्डे तयोरेकस्य दग्धो रथोऽपरस्य चाश्वो बन्धनमुन्मोच्य पलाय्य च नष्टः । एवं द्वावपि विरथौ बभूवतुः । ततश्च तौ परस्परं मन्त्रयित्वा रथमश्वं चैकत्रोपयुज्य स्वं देशं प्रत्यावृत्तौ'']

२५ मत्स्यन्यायः

[प्रबला मत्स्या अबलान्मत्स्यानदन्ति, तथाव्यवहारेऽस्य प्रवृत्तिः, तथाच नैषधीये-''अबलस्वकुलाशिनो झषान्''] योगवासिष्ठेऽपि—

एतावताऽथ कालेन तद्रसातलमण्डलम् ।
बभूव राजकं तीक्ष्णं मात्स्यन्यायकदर्थितम् ॥

२६ धान्यपलालन्यायः

[हेयपदार्थोपादानमन्तरा यत्रोपादेयोपादानमपि दुष्करं तत्र हेयमप्युपादायोपादेयमाददति, पश्चाच्च हेयं निरस्यन्ति, तत्रैवास्यावसरः, तथा च स्मर्यते—

''ग्रन्थमभ्यस्य मेधावी ज्ञानविज्ञानतत्परः,
पलालमिव धान्यार्थी त्यजेद्ग्रन्थमशेषतः'' ॥

(पञ्चदशी)]

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

२७ देहलीदीपन्यायः

[यथा देहल्यां निहितेन दीपेन गृहे बहिश्च प्रकाशकार्यं सम्पाद्यते, तथा यत्र प्रयासेनैकेन कार्यद्वये तुल्य उपकार आधीयते तत्रास्यावसरः। अत्रैव चावसरे 'मध्यमणिन्यायः' 'काकाक्षिगोलकन्यायः' इति वा व्यवह्रियते]

२८ लूतातन्तुन्यायः

[यथा लूता स्वयं निर्माति तन्तूंस्तैरेव च तथा बध्यते यथा स्वान् प्राणानपि विपादयति, तथैव स्वकृतकर्मणाऽऽपदुपनिपातेऽस्यावसरः]

३० गुडश्लेष्मन्यायः

[यथा गुडः श्लेष्माणं वर्द्धयित्वा पश्चात्तं शमयति, तथा यत्र विश्वासमुत्पाद्य प्रहारः क्रियते तत्रास्य व्यवहारविषयः]

३१ कुञ्जरस्नानन्यायः

[यथा हस्ती सद्यः स्नात्वा परावर्त्तमानो मध्येमार्गं शिरसि रजः शुण्डादण्डेन किरति तथा स्वच्छं कर्म कृत्वा पुनरतित्वरितमेव मलिनं कर्म कर्त्तुमारभते तदाऽयं न्यायोऽवतार्यते]

एते न्यायाः स्वरूपतः प्रयोगविषयतश्चात्र निरूपिताः, एतदधिका न्याया यद्यपि स्मृतिपथमधिरोहन्ति, परन्तेषां मध्ये कतिपये शास्त्रोयतत्त्वप्रतिपादन एव लभन्तेऽवसरं, कतिपये शास्त्रोयेण विषयेण सह लौकिकेऽपि व्यवहारे प्रयुज्यमाना अपि प्रयोगविषयस्य वैरल्येन नात्र सङ्गृहीता यथा 'स्नुषाश्वश्रून्यायः' 'कपिञ्जलाधिकरणन्यायः' इत्यादयः। किञ्च प्रबन्धविषये उपयोक्ष्यमाणा एव न्याया अत्र निवेशिताः, प्रबन्धेषु च भाषा प्रवाहान्तःपातिनि सरसवाक्यावलीवीचौ त एव न्यायाः प्रयोगमर्हन्ति, येऽतिप्रचलिताः, अर्थतः सुबोधाश्च। इतोऽपि हेतो र्बहवो न्याया नोपन्यस्ताः। अत्र विषयेऽधिकं जिज्ञासुभि रेतद्विषये ग्रन्थान्तरेषु गवेषणीयम्।

इति प० रामचन्द्रमिश्रकृते प्रबन्धपारिजाते पञ्चमः पल्लवः।

समाप्तश्चाऽयं ग्रन्थः। २.....

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ग्रन्थकर्त्तुः परिचयः ।

माण्डरसंज्ञकमैथिलभूसुरवंशेऽजनिष्ट कृती ।
श्रीमान् 'कन्हाइ' मिश्रो हृतजनताऽज्ञानतामिस्रः ॥ १ ॥
उदित 'रुक्षीतन' शर्मा ततः सुमेरोरिवादित्यः ।
योऽस्मानि मानिनिवहश्रेयान् सुकृतावदातात्मा ॥ २ ॥
मृतपितृकः स बाल्ये मातुलकुलमाश्रितः शरणम् ।
ग्रामे पकडीनामनि गृहस्थतांप्रापितो न्यवसत् ॥ ३ ॥
तत्तनयेषु प्रथमो वयसा ज्ञानेन यशसा च ।
'मधुसूदन' मिश्राख्यो भक्तश्चतुराग्रणीरभवत् ॥ ४ ॥
तत एव श्री 'जयमणि' संज्ञायां मातरि प्रापम् ।
जनिमम्बिधरामवसुभूमितशाके 'रामचन्द्रो'ऽहम् ॥ ५ ॥
प्रभवादष्टमशरदि स्नेहान्मामुपनिनोषन्तम् ।
तातं सदा स्वतन्त्रा नियतिरकार्षीत्कथाशेषम् ॥ ६ ॥
बाल्ये पण्डित 'भिक्षुरशर्म'कृपाप्राप्तबोधस्य ।
अथ चक्षुषो चमत्कृतसंस्कृतभाषाप्रयोगेषु ॥ ७ ॥
उन्मीलिते अभूतां श्री 'श्रीनाथाख्य' विबुधस्य ।
मम मातुलस्य चरणौ निषेवमाणस्य न चिरेण ॥ ८ ॥
गूढं शास्त्ररहस्यं ज्ञातुं निखिलं निबद्धकक्षस्य ।
उपदेशको ममाभू'दीश्वरनाथो' विदद्वन्द्यः ॥ ९ ॥
स्वाभाविकया कृपया-स्नेहेनान्तःप्ररूढेन ।
ममतादृशा च यो मामपुषत्सोदर्यभावेन ॥ १० ॥
तत्कृपयाधिगताखिलसंस्कृतसाहित्यमर्माणम् ।
बुधवर 'किशोरिशर्मा' मां व्यधिताचार्यपदभाजम् ॥ ११ ॥
श्रीयुत 'जटेश्वरा'भिधविद्वद्वरपादमुपजीव्य ।
दर्शनशास्त्ररहस्यं नचिरेणाशेषमाचकलम् ॥ १२ ॥
एतानन्याँश्च गुरून्मनसि ममावस्थितान्सततम् ।
ध्यायामि यत्कृपा मे मानुष्यकमञ्जसाऽसाक्षीत् ॥ १३ ॥
द्वाविंशद्वर्षवयः-समधिगताध्यापनावसरः ।
अध्यापयामि दर्शनशब्दालङ्कारशास्त्राणि ॥ १४ ॥
सोऽहं 'प्रसन्नराघव' टीकावरजं निबन्धममुम् ।
निरमामिह विद्वांसः कृपास्पृशं स्वां दृशं दध्युः ॥ १५ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

गणितकौमुदी प्रथमभाग (चतुर्थ संस्करण)

गवनमेंट संस्कृत कालेज बनारस, बिहार, उत्कल की प्रथमा परीक्षा तथा हिन्दूविश्वविद्यालय की प्रवेशिका परीक्षा में निर्धारित गणित का यह **"गणित-कौमुदी"** चतुर्थ संस्करण बहुत ही उपयोगी हुआ है। इस ग्रन्थ में **अभिन्न** अर्थात् साधारण और मिश्र संख्याओं का सङ्कलन, व्यकलन, गुणन और भाग उदाहरण सहित, **अभिन्नपरिकर्मचतुष्टयम्** (जोड़ घटाव, गुणा, भाग उदाहरण, सहित) आदि विषयों के लक्षण तथा अभ्यास के लिये भिन्न २ प्रकार के उदाहरण, मान तथा भिन्न २ परिभाषायें भी रक्खी गयी हैं। अङ्कों का सोदाहरण सङ्केत तथा पारिभाषिक शब्दों का विवरण प्रश्नोत्तर आदि विषय भी दिये गये हैं ।।।)

किरातार्जुनीयम् ।

स्वान्वय–घण्टापथ–सुधा-व्याख्याद्वयोपेतम्

इसमें सर्व प्रथम पात्र–परिचय–संक्षिप्त कथा तथा प्रत्येक श्लोकों में क्रमशः अवतरण–श्लोक–मल्लिनाथ कृत घण्टापथव्याख्या–सुधा व्याख्या–कोश–समासादि–व्याकरण–वाच्यपरिवर्तन–सरलार्थ–हिन्दीभाषार्थ उपयुक्तटीप्पणियां–शिक्षासंग्रह–प्रश्नपत्रसंग्रह आदि विषय दिये गये हैं। विद्यार्थियों के उपयुक्त इतना सुन्दर संस्करण अन्यत्र नहीं छपा है। १ से ३ सर्ग का १।।।)

बृहत् संस्कृतशिक्षावाटिका १–४ भाग।

प्रथम भाग में सन्धि विषयक विचार, द्वितीय भाग में शब्दों के भेद, कारक भेद, शब्दों के रूप जानने की सरल शैली, प्रसिद्ध शब्दों का संग्रह, शिक्षाप्रद कथा, स्तोत्र आदि अनेक विषय हैं। इसी प्रकार तृतीय तथा चतुर्थ भागमें अजन्त नपुंसकलिङ्ग और हलन्त शब्दों के रूप जानने की शैली, धातुरूप बनाने की क्रिया, प्रयोग में आने वाले धातुओं का संग्रह, औपदेशिक वाक्यसंग्रह, स्तुति, स्वास्थ्यपालन विधि आदि अनेक विषय दिये गये हैं। प्रथम भाग ।) द्वितीय भाग ।=) तृतीय भाग ॥) चतुर्थ भाग ।।।) संपूर्ण १–४भाग १।।।)

तर्कसङ्ग्रहः ।

न्यायबोधिनी–पदकृत्य-विरला–इन्दुमती टीका चतुष्टयोपेतः ।

इस 'विरला' टीका में मूलग्रन्थ तथा न्यायबोधिनी, पदकृत्य टीका के सभी कठिन स्थलों को अति सरल रूपसे व्याख्या की गई है। तथा इन्दुमती नामक हिन्दी टीका तो मूल ग्रन्थ को अक्षरशः स्पष्ट कर देती है। परीक्षार्थियों के लिये इससे बढ़कर परीक्षोपयोगी दूसरा कोई भी संस्करण नहीं है १)

प्राप्तिस्थानम्–चौखम्बा संस्कृत पुस्तकालय, बनारस सिटी।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

संस्कृतरचनानुवादशिक्षकः ।

(अभिनव परिवर्द्धित द्वितीय संस्करण)

इसमें प्रथमापरीक्षा के छात्रों को अनुवाद करने के नियम अत्यन्त सरल रूपमें समझाए गये हैं और तदनुसार अनुवादार्थ अभ्यास भी दिए गये हैं। अभ्यासार्थ वाक्यों में आए हुए प्रत्येक कठिन शब्दों के संस्कृत से हिन्दी तथा हिन्दी से संस्कृत अनुवाद करने के प्रबन्ध भी पुस्तक के अन्त में ९० प्रकरणों में दे दियेगये हैं जिनसे अनुवाद करने में अत्यन्त सरलता हो गई है। पुस्तक की उपादेयता पर गवर्नमेण्ट सं० कालेज, हिन्दू विश्वविद्यालय काशी तथा आगरा, खुर्जा, सहारनपुर, इन्दौर आदि के बड़े बड़े विद्वानों ने मुक्तकण्ठ से प्रशंसापत्र दिए हैं जो पुस्तक में प्रकाशित आप को प्राप्त होंगे। प्राथमिक विद्यार्थियों के लिए इस से बढ़कर अनुवाद के लिए पथ-प्रदर्शक दूसरी पुस्तक नहीं है। १)

श्रीकोषः ।

[अभिनव परिवर्द्धित द्वितीय संस्करण]

याद रखिये इसी "श्रीकोश" के द्वारा आपको एक शब्दके कई अर्थ एवं पर्याय पर्याप्तरूपेण मिल सकेंगे। इसमें लिङ्ग, क्रिया, क्रियाविशेषण, संज्ञा, भाव वाचकसंज्ञा, आदि का निर्देश समुचित रूपसे दिया गया है। एक्सरे, कुर्सी, टेबुल, आलमारी, बेंच, म्युनिसिपलिटी, कचहरी, जज, कोतवाल, थानेदार, आदि वर्तमान चलते-फिरते शब्दों की ओर (जिनकी संस्कृत बनाने में आप लोगोंको कठिनाई पड़ती थी) द्वि०संस्करण में और भी विशेष ध्यान दिया गया है १)

रूपचन्द्रिका

[अभिनव परिवर्द्धित द्वितीय संस्करण]

इस संस्करण में 'लघुकौमुदी' में आये हुए सभी शब्दों तथा धातुओं के रूप देकर तत्समानाकार अन्य प्रसिद्ध शब्दों और धातुओं के भी बहुत से रूप दिये गये हैं एवं सभी धातुओंके सेट, अनिट, सकर्मक, अकर्मक आदि का भी निर्देश कर दिया गया है। प्रथमा परीक्षार्थियों के लिये बड़ी उपादेय पुस्तक है २)

प्राप्तिस्थानम्—चौखम्बा संस्कृत पुस्तकालय, बनारस सिटी।

Kirtikant Sharma Collection, Najafgarh